Digitized by Arya Samaj Foundation Chennai and eGangotri

Digitized by Arya Samaj Foundation Chennai and eGangotri

112604

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूर्योदयः

भारतधर्ममहामण्डलस्य
मासिकं मुखपत्रम्

वर्षम् ५०

अङ्कः २

सम्पादकः
गो० न० वैजापुरकरः

मार्च
१९७४

वार्षिक-मूल्यम्
५) रूप्यकाणि

प्रत्यङ्क-मूल्यम्
अर्धरूप्यकम्

जीवन-यात्रा !

त्वया सह कोऽपि न चेदायाति वीर ! गच्छैकाकी मार्गे ।
सुखं यत् जगतः सङ्घर्षेषु लभ्यते तन्न सखे स्वर्गे ॥ १ ॥
मञ्जुलं कर्मपथं सम्प्राप्य कीदृशं काठिन्यं ते दक्ष ।
न यावल्लभसे स्वोद्देश्यं न तावत् त्वं विश्रामं गच्छ ॥ २ ॥
निशायां ध्वान्तच्छन्नायां वरं वर्षत्वनलं मेघः ।
निश्चिते मार्गे भवतु तदापि धीर ! ते तीव्रतरो वेगः ॥ ३ ॥
गमनतस्त्वं मिथ्यैव बिभेषि कियत्कालं तिष्ठति शयनम् ।
समेषां जीवानामन्ततः सुनिश्चितमस्तीदं गमनम् ॥ ४ ॥
निरन्तरमागम्यते तवैव पवित्रायां यात्रायां देव ।
विना विस्मरणं विभो ददस्व धीरता-संबलमिह दययैव ॥ ५ ॥
अहो संबलचिन्ताऽपि वृथैव यदा प्राप्तोऽस्मि तस्य मार्गम् ।
स्वयं द्रष्टुं योगक्षेमं य आगच्छति हित्वा स्वर्गम् ॥ ६ ॥

—डॉ० शिवशरण शर्मा

112604

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ग्राहका विनिवेद्यन्ते

'सूर्योदय'स्य ५० वर्षस्याऽयं तृतीयोऽङ्कः पाठकानां करसरोजयोः समर्प्यते । अद्यावधि प्रत्नैर्नैकैः ग्राहकैः नववर्षस्य वार्षिकं शुल्कं पञ्चरूप्यकात्मकं कार्यालये न प्रहितम् । कर्गजस्य भीषणाकालायितेऽस्मिन् काले अस्माभिरद्यावधि निश्शुल्क पाठका अपि इत परं स्वल्पतममिदं शुल्कं प्रेषितुं प्रार्थिताः । पुनरप्यनेन निवेदनेन ते प्रत्न ग्राहकाश्च प्रार्थ्यन्ते यदङ्कप्राप्तेः समकालमेव तैः वार्षिक शुल्कं सत्वरं प्रेषणीय मिति ।—व्यवस्थापकस्य

अनुक्रमः

प्रपानकः	पत्रपुटम्	परिवेषकः
श्रीरामपद-महिमा	४९	श्री स्व० विलट्टपन्त दफ्तरदार
श्रीमहर्षि-ज्ञानानन्दचरितं महाकाव्यम्	५०	स्वर्गीयाः श्री विन्ध्येश्वरी प्रसाद शास्त्रिणः
विपक्षा युवशक्तिः कथंदेशोत्थाने नियोज्येत	५१	सम्पादकीयम्
तैलास्त्रम्	५४	श्री उमाशंकर शर्मा त्रिपाठी
दिवंगताः श्रीक्षेत्रेशचन्द्र चट्टोपाध्यायाः	५५	श्री जगन्नाथ शास्त्री तैलङ्गः
(२) सूर्यनमस्कारो व्यायामश्च	५७	श्री डॉ० नरेश झा शास्त्री
सन्ति सन्तो वसन्तः !	५८	श्री बटुकनाथ शास्त्री खिस्ते
संस्कृत विरोधिनी विचारास्तन्निराकरणोपायाश्च	५९	श्री विद्याधर द्विवेदी
(२) रूप-दीपिका	६३	श्री रामानन्द द्विवेदी
पञ्चम महाधिवेशन वृत्तान्तः प्रादेशिक संस्कृत विद्यालयाध्यापकसमितेः	६५	सङ्कलितम्
कार्यकारिणी समितिः, ज्ञापनञ्च	६७	,,
संस्कृत-संस्कृतज्ञ संरक्षण राष्ट्रीयं कर्तव्यम्	६९	श्री राधासर्वेश्वरशरण देवाचार्याः
महाधिवेशन-प्रस्तावाः	७२	सङ्कलितम्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

112604

सूर्योदयः

H L.
SURYOYODAYA
1974
G.K.V.
Lib
HARDWAR

५० वर्षे] [३ अङ्कः

चन्द्रो वै ...

ईदृक् सन् ...

जातः सन् ... ससवत वारुणी

शुभ्राङ्घ्रिर्गुरुदारधर्षणकरो ब्रह्मघ्नसंसर्गभाक् ।

ईदृक् सन्नपि यद् द्विजेन्द्रपदवीमारूढवान् साम्प्रतं

सोऽयं रामपदप्रसङ्गमहिमा लोके समुज्जृम्भते ॥ २ ॥

द्राक्षादीनि फलानि सन्ति मधुराण्येवेति नैवान्यथा

किन्त्वेको भृशमात्रमेव भवति प्रेमान्नृणां सर्वतः ।

आत्तस्य त्वमुना कथञ्चिदपि यद् रामेति सर्वात्मनो

नाम्नो वर्णचतुष्टयस्य महिमा सोऽयं समुज्जृम्भते ॥ ३ ॥

चापः पुष्पमयो मधुरव्रतमयी मौर्वी मिता मार्गणाः

हीनाङ्गः स्वयमप्यसौ जयति यन्मारो जगत्सर्वशः ।

आत्तस्य त्वमुना कथञ्चिदपि यद् रामेति सर्वात्मनो

नाम्नो वर्णचतुष्टयस्य महिमा सोऽयं समुज्जृम्भते ॥ ४ ॥

अङ्ग श्रीराममातः ! त्वदमृतरसो नामनामा स्तनोऽयं

हृद्यस्तेऽस्यानवद्यः क्रम इह परमं विस्मयं नस्तनोति ।

बालानेवाद्विजान् यो जनयति न सुखं केवलं सेवमानान्

यत्प्रौढान् सद्विजानप्यतितरलयते सद्रसेनातितृप्तान् ॥ ४ ॥

—स्वर्गीयाः श्रीविठ्ठलपन्त दफ्तरदार महोदयाः—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

112604

...सवत्र सूर्योदयः ॥

५० वर्षे] वाराणसी, चैत्रः, २०३० वैं० : मार्च, १९७४ ई० [३ अङ्कः

श्रीरामपद-महिमा

चन्द्रो वै परदारधर्षणरतो नक्षत्रमार्गस्थितो
नित्यं क्षीणतनुः कलङ्ककलुषो दोषाकरोऽन्तर्जडः ।
ईदृक् सन्नपि यच्च राजपदवीमारूढवान् साम्प्रतं
सोऽयं रामपदप्रसङ्गमहिमा लोके समुज्जृम्भते ॥ १ ॥

जातः सन् कुटिलत्वमेव भजते संसेवते वारुणी
शुभ्राङ्घ्रिर्गुरुदारधर्षणकरो ब्रह्मघ्नसंसर्गभाक् ।
ईदृक् सन्नपि यद् द्विजेन्द्रपदवीमारूढवान् साम्प्रतं
सोऽयं रामपदप्रसङ्गमहिमा लोके समुज्जृम्भते ॥ २ ॥

द्राक्षादीनि फलानि सन्ति मधुराण्येवेति नैवान्यथा
किन्त्वेको भृशमात्रमेव भवति प्रेमान्नृणां सर्वतः ।
आत्तस्य त्वमुना कथञ्चिदपि यद् रामेति सर्वात्मनो
नाम्नो वर्णचतुष्टयस्य महिमा सोऽयं समुज्जृम्भते ॥ ३ ॥

चापः पुष्पमयो मधुव्रतमयी मौर्वी मिता मार्गणाः
हीनाङ्गः स्वयमप्यसौ जयति यन्मारो जगत्सर्वशः ।
आत्तस्य त्वमुना कथञ्चिदपि यद् रामेति सर्वात्मनो
नाम्नो वर्णचतुष्टयस्य महिमा सोऽयं समुज्जृम्भते ॥ ४ ॥

अङ्ग श्रीराममातः ! त्रवदमृतरसो नामनामा स्तनोऽयं
हृद्यस्तेऽस्यानवद्यः क्रम इह परमं विस्मयं नस्तनोति ।
बालानेवाद्विजान् यो जनयति न सुखं केवलं सेवमानान्
यत्प्रौढान् सद्विजानप्यतितरलयते सद्रसेनातितृप्तान् ॥ ४ ॥

—स्वर्गीयाः श्रीविट्ठलपन्त दफ्तरदार महोदयाः—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीमहर्षि-ज्ञानानन्दचरितं महाकाव्यम्

-- स्वर्गीयाः श्री विन्ध्येश्वरीप्रसाद शास्त्रिणः --

(विंशे सर्गे)

८१. सर्वा इमाः संस्कृतमाध्यमेन संशिक्षणीया यदि संभवेयुः ।
न नाशमीयुर्न च कोऽपि तासां दुष्टोपयोगं किल कर्तुमीशः ।।

८२. शश्वल्लसद्-देवसरस्वतीतोऽतिरिक्तवाण्यः परिवर्तशीलाः ।
व्रजन्त्यपायं ह्यत एव तत्स्थो विज्ञानराशिर्न चिराय तिष्ठेत् ।।

८३. ये देवभाषाममृतामनिन्द्यां निन्दन्ति हा हन्त मृतां वदन्तः ।
तस्यास्तु सद्रूपनिरूपणे ते भ्रान्तिं गताः सन्ति विवेकिनोऽपि ।।

८४. रूपान्तरं वा परिवर्तनं वा मृत्योर्बुधा लक्षणमामनन्ति ।
असर्गकालादपि देववाणी दृष्टा विपश्चिद्भिरिहैकरूपा ।।

८५. एतर्हि पाश्चात्त्यमनोषिभिर्या प्रचारिता शिक्षणरीतिरेषा ।
सा सर्वथाऽऽध्यात्मिकलक्ष्यशून्या निभाल्यते धर्मबहिर्मुखी च ।।

८६. तदीयशिक्षासरणौ त्वविद्या - विद्याविमर्शस्य च लेशतोऽपि ।
सद्भावना नास्ति ततः कथं स्यादास्थाऽत्र शिक्षाविदपश्चिमानाम् ।।

८७. निःश्रेयसस्याऽभ्युदयस्य चैव प्राचीनशिक्षासरणौ वरेण्यः ।
भावो यथाऽऽसीन्न तथा प्रतीच्यां शिक्षासरण्यामिति निर्विवादम् ।।

८८. पदार्थविद्याद्भुतबोधराशेः शिल्पोन्नतेश्चाप्यथ युद्धरीतेः ।
संशिक्षणं धर्म-समाज-राजनीतेश्च तद्भौतिकसौख्यमूलम् ।।

८९. परात्मविज्ञान - विहीनशिक्षारीतेरवश्यंभवदुर्विपाकः ।
नरैः समग्रैरखिलेऽपि देशेऽनुभूयतेऽन्तेऽनुभविष्यते च ।।

९०. अजस्रमुद्यंस्तमसः प्रवाहः शिक्षाविधानैर्न निरुद्ध्यते चेत् ।
यथा विनष्टा भुवि जातयोऽन्यास्तथैव चैषाऽपि विनाशमीयात् ।।

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकीयम्

विपक्षा युवशक्तिः कथं देशोत्थाने नियोज्येत ?

छात्राः किलाऽस्माकं भावि - राष्ट्रनिर्मातारः। जातेः, समाजस्य, प्रदेशस्य, राष्ट्रस्य अन्ताराष्ट्रस्य च नैकविधानां श्रेयःप्रवृत्तीनां तत्स्रोतसां च ते सुनियोजिताः प्रगतयः। यत्र देशे सुसंस्कृता प्रत्यग्रतमा चेयं युवशक्तिः अनुद्बुद्धा अविकसिता च प्रतितिष्ठते, तस्य सर्वविधो विकासपादपो विविध-वात्याचक्रैः प्रकम्पितो मूलेन क्रमशो वियुज्यमानः कालेन धरामधिशयानः स्वीय-पत्र-पुष्प-फलसम्पदां लाभेन छायया चातपत्रया कमपि देशं सन्तर्पयितुं न प्रभवति। अतो राष्ट्रोन्नयनप्रणयिनामनुपेक्ष्यं कर्म यत्ते देशस्येमां केन्द्रभूतां युवशक्तिं छात्रान् तथा नियोजयन्तु यथा ते राष्ट्रस्य यथार्थत आधारस्तम्भा भवेयुरिति। पुराणीनां सार्वदिक्कानां प्रवृत्तीनां नवाऽवतारयिता छात्रसम्पदियं प्राच्यकौशलस्य सुस्थिरं स्मारकम्। सत्येवं को नाम मतिमान् प्रज्ञावान् राष्ट्रभक्तोऽस्या अनुप्राणने सम्पोषणे च न प्रवर्तेत ?

अत एव प्राचीनकाले शैशवे एव समुपनीय शक्तिकेन्द्रमिदं सर्वथा आदर्शायितस्य स्वतन्त्रस्य गुरुकुलस्याधीनं क्रियते स्म। तत्र चेदमुर्वरितायां धरित्र्यां समारोपितक्षुपमिव संवादिमृज्जल-पवनादिसाहाय्येव सुदृढं शतशाखं भवद् राष्ट्रस्य विविधसांसारिकातपनिवारणेन तं फल-पुष्पैः समर्चयितुं रसैश्च आप्याययितुं प्रभवति स्म। नूनमासीत् सोऽस्माकं स्वर्णिमः कालः। गुरुकुलेऽस्मिन् सम्राजो भिक्षावृत्तेश्च बालौ सर्वथा समानव्यवहारभाजौ स्तः। तेषां समग्रं व्यक्तित्वं उपाध्याये निहितं सत् न केवलमद्वैतस्य सक्रियं निदर्शनं जायते स्म, तन्निर्मितिकारणस्य उपाध्यायस्य सर्वे गुणा अपि कारणगुणप्रक्रमेण तेषु सर्वांशतः संक्रामन्ति स्म। गुरुकुलाय समर्पितं बालं दिदृक्षुः सम्राडपि उपाध्यायानुज्ञामन्तरा कथमपि तत्र प्रवेष्टुं न प्रभवति स्म। राजपुत्रो द्विजार्भकश्च सममेव तत्र आत्मनिर्भरतायाः स्वावलम्बितायाश्च शिक्षामासादयन्तौ आस्ताम्। गुरुरपि आदर्शस्य सर्वथा प्रतिकृतिः निखिलविद्यानां प्रतिमूर्तिः दयाया वात्सल्यस्य च नवावतार आसीत्। इत्थं द्वादशवार्षिक - विद्यातपतप्त - आविर्भूत यौवनोद्भेदश्छात्रो गुरुकुलरूपादर्शमूषानिषिक्तो यदा कटकायितो बहिरायाति स्म तदा स नूनं राष्ट्ररक्षणक्षमो भाविराष्ट्रनिर्मातेति विरुदेनालङ्क्रियते स्म।

एतादृशानामेव आदर्शराष्ट्रनिर्मातॄणां बलं स्वात्मनि आदधानो प्राचीनभारतीयः कश्चिच्छासको महता गर्वेण वक्ति—

न मे स्तेनो जनपदे न कदर्यो न मद्यपः।
नानाहिताग्निर्नाविद्वान् न स्वैरी स्वैरिणी कुतः॥

इतोऽपि पूर्वं भारतीयः कश्चित् क्रान्तदर्शी ऋषिः स्वात्मनो राष्ट्रस्य गौरवावहं शब्दचित्रमित्थमालिखति—

न राज्यं नैव राजासीत् न दण्डो न च दाण्डिकः।
धर्मेणैव प्रजाः सर्वा रक्षन्ति स्म परस्परम्॥

अत एव कालेन प्रसृतं मात्स्यन्यायमपाकर्तुं प्रवृत्ताया राज्यसंस्थायाः कश्चन तात्कालिकः शासको वक्ति—

स्नेहं दयां तथा सौख्यं यदि वा जानकीमपि।
आराधनाय लोकस्य मुञ्चतो नास्ति मे व्यथा॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

किन्तु गतः सोऽस्माकं स्वर्णिमः कालः। समागतश्च विविधदौर्बल्यदूषितः कलिकालो यस्य कृते भागवतकारादयो महर्षय एतादृशं भीषणं भविष्यं व्याचख्युः—

अट्टशूला जनपदाः शिवशूला द्विजातयः।
कामिन्यः केशशूलिन्यो भविष्यन्ति कलौ युगे॥

नूनमद्य सर्वमेव पूर्वोक्तं शोभनं दृश्यं सर्वथा भयावहे दृश्ये परिणतम्। गतमस्माकं तद् गुरुकुलम्। अद्य तेषामुत्तराधिकारित्वं यैर्नाम 'विश्वविद्यालय-महाविद्यालयैः साम्प्रतिकैरुह्यते, तेषां दशा नहि वृत्तपत्रपाठकानां तिरोहिता। महावृक्षायितस्य तस्य संस्थानस्य वसन्त इव क्रमशोऽद्य गुरुतरादर्शपत्राणां शातनं जायमानं दरीदृश्यते। नास्ति तत्र उपाध्यायः स्वीये भाविराष्ट्रनिर्मातृ-प्रजापतिकार्ये उत्तरदायित्वपूर्णस्य कर्तव्यस्य निर्वहणेऽनुशिष्टः। ततः सर्वथा विहीन एव तुच्येत चेन्न तदतिशयितं वचः। शासका अपि स्वीयं सर्वथा स्वार्थलोकेषणादि-लौकिक-क्षुद्रलोभजातं संसाधयितुं यं कमपि उपायं तत्र प्रयोक्तुं न लज्जन्ते। तैरिदमभिसन्धीयते यदित्थं वयं भाविराष्ट्रनिर्मातॄन् मुष्टिबद्धान् कर्तुं प्रभविष्याम इति।

फलोपधायके विद्यादाने गुणाधाने च उदासीने उपाध्याये अधीयानाश्छात्रा मननीयविषय-चिन्तनेन विरताः स्वतन्त्रमतिका बाह्येषु नैकेषु विषयेषु लिप्ता अपक्वबुद्धिकृतान् नैकानुत्पातान् कर्तुं प्रवर्तन्ते। शिक्षकेषु शिक्षालयेषु च ज्ञानसम्पल्लाभाभावेन तेषामधमर्णतामनासादयन्तस्ते शिक्षकाणां शिक्षालयानाञ्च नियन्त्रणमपि नानुमन्तुं प्रभवन्ति। तद्विरोधाय च नैकैः अकल्पितैः स्वेच्छाप्रसूतैरुपायैः महाभियानाय (आन्दोलनाय) प्रवर्तन्ते। विगतेषु वर्षेषु विश्वविद्यालय-महाविद्यालयेषु जायमानानां छात्रोपद्रवाणामिदमेव मूलम्। यदि शिलालयेन शिक्षकैश्च अञ्जसा ते शिक्षिता गुणान्विताश्च विधीयेरंस्तदा प्रायस्तेषामियम् अनुशासनहीनता तादृशं विद्याधनलाभेन निरुद्धा स्यात्। किन्त्वद्य शिक्षालयेषु प्रायस्तदभावाद् या परिणतिः स्वाभाविकी, सैव अक्षणोर्गोचरीक्रियते।

अन्यच्च, एवस्थितावपि यथाकथञ्चित् किमपि कृत्वा छात्रैः परीक्षाः समुत्तीर्यन्ते। तथापि अग्रिमजीवनयात्रायातस्समुचित-आशाबन्धस्तु कथमपि तैर्न दृश्यते। राजनैतिकदलीयस्पर्धाभिनिविष्टेन शासनेन तेषामायतिसमुन्नयने किमपि नावधीयते। आदर्शायितशब्दमात्रशृङ्खलितस्य निर्मर्यादस्य व्यक्तिविशेषेच्छापरतन्त्रस्य शासनस्य स्वाभाविक - परिणतिरूपो भ्रष्टाचारोऽनाचार उत्पीडनमभावश्च पूरयितो दरीदृश्यते सर्वत्र। सत्येवं पूर्वोक्ताः प्रबुद्धा आशाबन्धविहीना अनुशासनातीताश्च छात्रा एतादृशं छलबलसहायं शासनम् अव्यवस्थितं विधातुं प्रयतन्ति चेत्तत्र किमाश्चर्यम्? अचिरादेव गुर्जरप्रदेशे बिहारप्रदेशे च छात्रैर्यथा प्रयतितं तन्नापरोक्षं वृत्तपत्राध्यायिनाम्। व्याधिरयमिदानीं संक्रामिक इव संवृत्तो दरीदृश्यते। भगवानेव रक्षतु देशमनेन प्रवृद्धयुवजनाभियानेन!

किन्तु नैतावदेव कथनेनास्माकं कर्तव्यस्य इति भवति। देशभक्तस्य संस्कृतिसभ्यताप्रणयिनः प्रत्येकस्य प्रज्ञावतोऽनुपेक्ष्यं कर्तव्यं यदस्य अत्याहितस्य परिहाराय प्रयतेत। नूनमेतादृशैः पक्षविशेषानभिनिविष्टैर्विवेकिभिः नेतृत्वशक्तिसम्पन्नैः पुरुषैः सम्भूय शासनस्य शुद्धिर्विधेया। स्वार्थास्मितादिपरिप्लुतं तस्य प्रत्येकं पदमहिंसासत्याश्रितया नीत्या निरोद्धव्यम्। वैदेशिक - साम्यवाद - मृगमरीचिकाग्रस्ता देशवासिनो भारतीय - प्राचीन विश्वबन्धुत्वभावैः सुनियोजितं बोधनीयाः। अधिकारेण सह कर्तव्यस्य अनिवार्यतयाऽनुष्ठानदिशि ते प्रत्यावर्तनीयाः। सरलजीवनमुच्चविचारस्य विभूषणेन सर्वे भारतीया अलङ्करणीयाः। ऐहिकसुखसमुन्नतितोऽपि परा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

काचन आमुष्मिकी सुखसमृद्धिर्नूनमास्ते इत्यस्य तेभ्योऽपरोक्षः साक्षात्कारः कारयितव्यः। शासनमपि यथा एभिर्गुणैः सुसंस्कृतं भवेत्तया योजनीयम्। राष्ट्रगतं भ्रष्टाचारमनाचारजातं च न केवलं दण्ड-भयेन, प्रत्युत धर्मराजभयेनापि निरोद्धव्यम्। श्रमस्य अखण्डिता प्रतिष्ठा स्थापनीया। अशेषतः सर्वे देश-वासिनो यथा विश्वनियन्तुः शासनेनानुशासिता भवेयुस्तथा तैर्नूनं प्रयतनीयम्।

समासतोऽस्येदं तात्पर्यं यत्सर्वस्य राष्ट्रियप्रमादस्य मूलं तदेव शासनं शासको वा, येन तद्राष्ट्रं शासितं भवति। तस्मै शासनाय सर्वथा स्वराष्ट्रिय-सभ्यता-संस्कृतिनिष्ठा परमावश्यकी। ततः परं दण्डनिरपेक्षता, ततश्च सर्वसाधारणाय न्यायदान वैचक्षण्यं दण्ड-शक्तिश्चापि परमावश्यकी। यतो हि अस्माकं शासनं लोकतान्त्रिकम्, अतः स्वकर्तव्यानुसारेणे प्रत्येकाय भोजनम्, वसनम्, आवास, औषधञ्च सर्वथा यथा सुलभं भवेत्, तथा प्रयतनं शासनस्यानिवार्यं कर्तव्यम्। यदि नाम तत्तथा स्वात्मानं न परिणमयति, तदा तादृश शासनापेक्षया अराजकतैव वरम्।

ततः परं राष्ट्रस्य युवशक्तिः सर्वथा देशोन्नयन-दिशि परावर्तनीया। तदर्थं प्रत्येकवयस्कनागरिकस्य कृते शिक्षा कर्मकारिता वाऽनिवार्यतो भाव्या। भारतीयेयं मर्यादा यदत्र शिक्षा आदित एव शासना-नियन्त्रिताऽऽसीत्। अद्यः पुनः सा पदेपदे शासन-नियन्त्रणेन नियन्त्र्यते। यत्र कुत्रचन शासननियन्त्रणं नास्ति, तत्रापि मुग्धास्तत्सञ्चालका तस्या राष्ट्रीय-करणाय प्रार्थयन्ते। वस्तुतः सर्वापि शिक्षा शासना-नियन्त्रिता सर्वथा समाजगतानां महापुरुषाणां वीत-रागाणां निष्पक्षातिनामादर्शभूतानामेव हस्तगता भाव्या। शासनेन पुनस्तेषामनुरोधेन तदर्थं केवल-मार्थिकमनुदानमेव दातव्यम्।

एतादृशेषु शिक्षालयेषु तादृशा एव शिक्षका नियोज्या ये केवलं शिक्षाव्रतिनः सदाचारिण उदा-राश्च स्युः। ते सर्वथा भारतीय-सभ्यता-संस्कृति-संस्कृताः संस्कृतभाषासु वेदादिशास्त्रेषु आस्था-शीलास्त्यागपरायणाश्च भवेयुः। छात्रेभ्यो विद्या-दानेन सहैव तेषां हृदि भावनेयं सुदृढीकरणीया यत् न जातु ऐहिकं सुखमेव मानवस्य चरमं लक्ष्यम्। आमुष्मिकं सुखं मोक्ष एव मानवजीवनस्य परमं श्रेयः। लौकिकमपि कार्यजातं यथाऽनेन आध्यात्मिकेन उत्कर्षेण सङ्गतं भवेत् तथैव सर्वेषा मुद्यमेन भाव्यम्। कामानां भोगेन कामस्य न जातु तृप्तिर्जायते, 'त्यागे-नैके अमृतत्वमानशुः' इति श्रुतेः। व्यवहारेऽपि 'परोपकारः पुण्याय पापाय परपीडनम्' इति व्यासोक्ति-मनुसृत्य सर्वैर्व्यवह्रीयेत तदा कुत्रापि अशान्ते-रवसर एव नापद्येत। युवशक्तेः नैतिकताऽऽध्या-त्मिकता-स्वावलम्बिता-कर्तव्यनिष्ठा-त्यागादि-सद्गुणेषु नियोजनं तदर्थञ्च तन्नियोजकानामपि तथानुष्ठातृत्वं साम्प्रतिकयुगस्य जाज्वल्यमानः सन्देशः। यदीमं सन्देशमादाय भारतीयाः व्यवहरेयुस्तदा नूनं युव-शक्तिः देशोत्थाने नियुक्ता सर्वक्षेमकारिणी च भवेत्। भगवन्तं प्रार्थयामो यत्सोऽस्मान् एतदर्थं सद्बुध्या योजयत्विति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तैलास्त्रम्

--श्री उमाशंकर शर्मा त्रिपाठी--

१

ब्रह्मास्त्रमिव तैलास्त्रं सन्धाय जगतां मनः ।
मरुभूः विदध्यतीत्थं या वन्दे तां तैलिकस्नुषाम् ॥

२

शून्ये राजपथे विशीर्णविभवा 'कारा'वली सीदति,
नैव व्योमपथे चरन्ति विमले वैमानिकाः साम्प्रतम् ।
रात्रौ पौरगृहेषु नैव शतशः विद्युत्प्रदीपाश्च ते,
नूनं निष्फलमेव तैलरहिते देशे वयो जन्म वा ॥

३

तेलं वीक्ष्य दुरापमद्य सहसा यात्राव्ययो वर्धते,
निस्तैलाः किमु कर्षकाय नवलाः मोघाः इमे ट्रैक्टरा ।
यासां 'फट्फट'रागिनीमनुपलं नैवावकाशोऽश्रयत्,
ता वै फट्फटियाः चरन्ति भवने मौनव्रतं साम्प्रतम् ॥

४

येषां नैव धरातले सुचरिता 'पेत्रोल'कूपस्थली,
येऽर्थैः पूर्वमवाप्य तैलनिश्चयं देशोत्तमाख्यां गताः ।
ते हालैण्ड-बृटेन-जर्मन-चिली-चीनामरीकादयः,
आरब्याङ्घ्रिरजःपवित्रशिरसो देशाः सहन्तेऽधमान् ॥

५

धन्या शर्करिलाऽपि सा मरुधरा याऽऽरब्यदेशाभिधा,
यस्यां नैव फलन्ति केऽपितरवो नग्नाऽवनिर्धूर्णते ।
वैधव्याहतयौवनेन रमणी भोगोल्लसल्लालसा,
याऽन्तःसम्भृतसस्पृहाङ्कचटुला लोकान् समाकर्षति ॥

६

याचमानः परस्नेहम्मातमस्नेहपराङ्मुखः ।
कथं भारतवर्षोऽयं जनतोषं विधास्यति ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतसमुन्नत्यै समर्पितजीवनाः

दिवंगताः श्री क्षेत्रेशचन्द्र चट्टोपाध्यायाः

—श्री जगन्नाथ शास्त्री तैलङ्ग, एम० ए० साहित्याचार्यः—

विद्याविनयमूर्तीनां श्री क्षेत्रशचन्द्र चट्टोपाध्यायानां महाप्रयाणेन न केवलं भारतवर्षस्य विद्वदग्रेसराणाम्, अपितु पाश्चात्यपण्डितानामपि अपूरणीया क्षतिः समभवत् । एतेषां जन्म १८९६ आंग्लाब्दस्य अक्तूबर-मासे २७ तिथौ वंगप्रदेशीय 'चौबीस-परगना' जनपदान्तःस्थिते 'निमता'ग्रामे समभवत् । एतैः शैशवत एव मातृनिष्ठां धार्मिकीं प्रवृत्तिं पैतृकीं च विद्याव्यसनितामधिगत्य विद्याध्ययनं प्रारब्धम् । एतैः कलिकाता - विश्वविद्यालयतः 'इण्टर-मीडियेट' परीक्षां समुत्तीर्य प्रयागविश्वविद्यालयतश्च 'बी० ए०' पदवीं संप्राप्य काश्यां १९१९ ईशाब्दे 'क्विन्स-कॉलेजज्' संज्ञक-शिक्षासंस्थातः एम० ए० पर्यन्तं समधीतम् । विद्याव्यसनितया एतैः प्राच्यपद्धत्या वेदान्त-व्याकरण-साहित्य-नव्यन्यायप्रभृतीनि प्राच्यशास्त्राण्यपि समधिगतानि ।

एतेषां गुरुपरम्परायां डॉक्टर गङ्गानाथ झा महाभागाः विशेषतः समुल्लेख्याः, येषामेते स्नेहभाजनान्यासन् । अथ च एतैः चिन्नस्वामि शास्त्रिपादेभ्यः वेदानां वैदिककर्मकाण्डस्य च सम्यक् अध्ययनं विधाय तुलनात्मकदृष्ट्या वेदान् अध्येतुं श्री जे. जे. मोदी महोदयेभ्यः 'जेन्दअवेस्ता'याः अध्ययनं कृतम् । एतेषां गुरुपरम्परायां श्रद्धेयाः श्री गोपीनाथ कविराजाः, आॅर्थर वेनिस महाभागाः, तैलङ्ग लक्ष्मण-शास्त्रिणः, वामाचरण भट्टाचार्याः, अम्बादासशास्त्रिणश्च गणयितुं शक्याः । तातपादेभ्यः समधीत्य एतेषां भाषाशास्त्राध्ययनस्य या प्रवृत्तिः अङ्कुरिता, सा टी० के० लद्धू महोदयतः पाली-प्राकृतिकभाषाध्ययनप्रसङ्गे पल्लविता, डॉ० सुनीतकुमार चट्टोपाध्याय महोदयानां सम्पर्कं प्राप्य पुष्पिता, डॉ० तारापुरवाला महाभागानां नैकट्याच्च फलिता ।

'विद्याधनं सर्वधनप्रधानम्' इति सूक्तिमेते निजजीवने सर्वतः सफलयन्ति । अत एव एते निजशास्त्र-कोषागाराभिवृद्ध्यर्थम् 'अनभ्यासतश्च विद्या मा विषायताम्' इति भिया च समग्राणि लाभकारीणि पदानि समुपेक्ष्य एतैः 'रंगपुरस्थित-महाविद्यालये संस्कृतप्रवक्तृपद स्वीकृतम् । तत्र पञ्च वर्षाणि यावत् अध्याप्य १९२४ ईशाब्दे एते प्रयाग-विश्वविद्यालये समागताः । तत्र च चतुस्त्रिंशद्वर्षपर्यन्तमविरतं विद्यादानं कृतवन्तः ।

वेदोपनिषद्-ब्राह्मणारण्यक-सूत्रग्रन्थानां खलु एते धृतावताराः जङ्गमाः 'शब्दकल्पद्रुमाः' आसन् । वेद-ब्राह्मणादिग्रन्थाः 'जेन्द-अवेस्ता' च एतैः करतलामलकवत् स्वायत्तीकृताः । वैदिकवाङ्मयतः सम्बद्धानि ब्ल्यूमफील्ड-बेबर-ह्विटने-मैक्समूलर-मैकडॉनल-प्रभृति-पाश्चात्यविदुषां च परस्परप्रतिकूलानि मतानि एतैः कण्ठस्थीकृतान्यासन् । कालिदासाऽश्वघोषयोः पूर्वापरवर्तित्वनिर्णयावसरे डाक्टर कीथ महोदयैः संस्कृत-साहित्येतिहासस्य भूमिकायां चट्टोपाध्याय महाभागानामपि मतमुट्टङ्कितं वर्तते ।

आत्मानुशासनं किल एतेषां जीवनपाथेयम् । एकदा मातुः पत्न्याश्च किञ्चित् वैमनस्यमवबुद्ध्य एतैः निजपत्नी निजाप्तवर्गे निक्षिप्ता, स्वयं च मात्रा सह

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रयागे समागतम् । मातुः निधनानन्तरमेव एतैः निजपत्न्या सह तत्र वसितम् । धर्मशास्त्रसम्मताम् आहारादिसम्बन्धिनीं जीवनपद्धतिमवलम्ब्य एतैः न कदापि शिरोवेदना अनुभूता । प्रयाग-विश्वविद्यालयतो लब्धावकाशैः एतैः वार्धक्येऽपि रूसदेश-निवासप्रसङ्गे पञ्चदश दिनानि यावत् केवलं फलाहारः कृतः । तत्रत्यं जलमपि अपेयं मत्वा न पीतम् । तेन सम्भवतः वर्षत्रयपर्यन्तं 'वृक्क-क्षत'-व्याधिग्रस्ताः कलकत्तास्थिते आतुरालये रोगनिदानं कुर्वाणा आसन् । आत्मबलेन एते स्वस्था भूत्वा १९५८ ईशाब्दस्य अगस्तमासे वाराणसीं समागताः । गुरुपुत्राणां निजशिष्याणां डॉ० आदित्यनाथ झा महाभागानामनुरोधं स्वीकृत्य एते वाराणसेय-संस्कृत-विश्वविद्यालयस्य प्रथमे अनुसन्धानसञ्चालकाः सञ्जाताः । कतिपयसमयं यावत् तत्रैव उपकुलपति-पदस्यापि उत्तरादायिता निर्व्यूढा । अवकाशप्राप्त्यनन्तरमेते काशीविश्वनाथमेव शरणं ययुः, अन्ते च शिवसायुज्यं लब्धवन्तः !

पण्डित सरस्वतीप्रसाद चतुर्वेदः, डॉ० उदयनारायण तिवारी, पण्डित गोवर्धनराय शर्मा, डॉ० गोविन्दचन्द्र पाण्डेयः (जयपुर), अमलानन्द घोषः, एवमादयः अन्ये च विद्वांस एतेषामेव शिष्याग्रगण्याः वर्तन्ते ।

नूनं सन्तोषस्यायं विषयो यत् एतेषां विशालो दुर्लभो ग्रन्थागारः प्रयागस्थितेन अनुसंस्थानसंस्थानेन 'गङ्गानाथ झाँ रिसर्च इंस्टीटयूट'-संज्ञकेन स्वायत्तीकृतः । एतेषां त्रयः पुत्राः कन्याश्च लब्धोच्चशिक्षाः विद्याविनयमूर्तयश्च वर्तन्ते । एतेषां निधनेन विशेषतः विद्याव्यसनिनां शिष्याणामेव अपूरणीया क्षति समभवत् । प्रयाग-विश्वविद्यालये वाराणसेय-संस्कृत-विश्वविद्यालये च वैदिक-वाङ्मयस्य तुलनात्मक-गवेषणाय एतेषां शिष्यैः एकैकं स्वाध्यायपीठं (चेयर) स्थाप्येत चेत्, तदेव एतेषां शाश्वतं स्मारकं स्यात् ।

सूर्योदयस्य स्वामित्वविषयकं विवरणम्

प्रपत्रम् : ४

(द्रष्टव्यो नियमः ८)

१. प्रकाशनस्थलम् : **वाराणसी**

२. प्रकाशनावधिः : **मासिकम्**

३. मुद्रक-नाम : **गोविन्द नरहरि वैजापुरकरः**
राष्ट्रियता : **भारतीयः**
पत्र-सङ्केतः : **के० ३०/४०, घासीटोला, वाराणसी—१**

४. प्रकाशक-नाम : **गोविन्द नरहरि वैजापुरकरः**
राष्ट्रियता : **भारतीयः**
पत्र-सङ्केतः : **वाराणसी**

५. सम्पादक-नाम : **गोविन्द नरहरि वैजापुरकरः**
राष्ट्रियता : **भारतीयः**
पत्र-सङ्केतः : **वाराणसी**

६. तेषां व्यक्तीनामंशभाजां वा नामानि येषां सविधे समग्रस्य मूलधनस्य एकप्रतिशततोऽधिको भागो वर्तते :

श्रीभारतधर्म-महामण्डलम्, जगतगंज कैण्ट, वाराणसी

अहं गोविन्द नरहरि वैजापुरकर एतद्द्वारा घोषयामि यदुपरिलिखितं विवरणं मदीयज्ञानविश्वासानुसारं सत्यमस्ति ।

(ह०) गोविन्द नरहरि वैजापुरकरः
प्रकाशकः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पूर्वतोऽनुवृत्तम्

सूर्यनमस्कारो व्यायामश्च

--डॉ० नरेश झा शास्त्री--

सूर्यकिरणानां महत्त्वम्

सूर्यतन्त्रे सूर्यसहस्रनामावल्यां सहस्रपात्, सहस्राक्षः, सहस्ररश्मिः, सहस्रांशुः, सहस्रकरः, सहस्रकिरणः, सहस्रार्चिः इत्यादीनि पदानि समुपलभ्यन्ते। एतेन सूर्यस्य सहस्रकिरणत्वं सुप्रसिद्धम्। अथर्ववेदे लिखितं यत् सूर्ये सप्तकिरणाः वीर्यरूपेण तिष्ठन्ति, कर्मणामुत्पत्ति-रूपेण च वृष्टिकाले जगति प्रसरन्ति।[1] सामवेदस्य एकस्मिन्मन्त्रे इन्द्रं सम्बोध्योक्तं यत् सूर्यः स्वकिरणैः यथाऽन्तरिक्षं व्याप्नोति तथैव त्वामपि सोमयानेन व्याप्नुहीति।[2] मैत्रायण्युपनिषदि अपि—

सहस्ररश्मि शतधा वर्तमानः
प्राणः प्रजानामुदयत्येष सूर्यः।[3]

प्रश्नोपनिषद्यपि - **आदित्यो ह वै प्राणः। (१.५)**

एवमेव सूर्यकिरणवैशिष्ट्यं महाभारतेऽपि प्रति-पादितम्—

रश्मिभिस्तापितोऽर्कस्य सर्वपापमपोहति।[4]

पाप-पदेनात्र दुःख-दारिद्र्यादेः ग्रहणम्। दुःख-दारिद्र्यञ्च रोगमूलकमिति प्राचीनं सिद्धान्तमभि-लक्ष्याऽधुनापि चिकित्सकाः सूर्यकिरणैश्चिकित्सां विदधति या हि 'सौर-चिकित्सा' इति व्यवह्रियते। वेदायुर्वेदेषु क्रमयो रक्ष-राक्षस-निशाचर-यातुधानादि-शब्दैः परिगण्यन्ते, ते च सूर्यकिरणैः नश्यन्ति। अत्र

१. अथर्व० ९.५.१०।

२. साम० उत्तरार्चिक, अ० ६, खण्ड ७, मं० १ : 'आ त्वां पृणक्त्विन्द्रियं रजः सूर्यो न रश्मिभिः।'

३. साम० पञ्चनरपाठकान्ते।

४. महामा०, अनु० १२५.५६।

वेदः—**उद्यन्नादित्यः क्रमीन् हन्ति।** नैतावदेव, अन्यान्यपि वैदिकानि वचनानि यथा—

न सूर्यस्य संदृशे मा युयोथाः।[1]

सूर्य आत्मा जगतस्तस्थुषश्च।[2]

अर्थात् सूर्यप्रकाशैः (किरणैः) नास्माकं कदापि वियोगो भवेत्। सूर्यो हि स्थावर-जङ्गमाना-मात्मा। एतेन निर्विवादं सिद्धयति यत् सूर्यकिरणानां जीवने व्यापकं महत्त्वम्। अत एव प्राचीने भारते गृहद्वारनिर्माण काले पूर्वोत्तरदिशोरेव प्राथमिकता दीयतेस्म येन सूर्यरश्मयः पूर्णरूपेण गृहं प्रविशेयुरिति। तथा चात्र चरके—

प्राङ्मुखमुदङ्मुखं वाऽभिमुखतीर्थं कूटागारं कारयेत्।[3]

प्राग्द्वारमुदग्द्वारं वा सूतिकागारं कारयेत्।[4]

नहि सूर्यरश्मिभिः गृहाभ्यन्तरदूषितवायोरेव शुद्धिः, बाह्यशुद्धिविषयेऽपि सूर्यरश्मिनामुपयोगः। यजुर्वेद आयुधानां शुद्धिः सूर्यकिरणैः वर्ण्यते—

सवितुस्त्वा प्रसव उत्पुमाम्यच्छिद्रेण
पवित्रेण सूर्यस्य रश्मिभिः।
सवितुर्वः प्रसवऽ उत्पुनाम्यच्छिद्रेण
पवित्रेण सूर्यस्य रश्मिभिः॥[5]

इत्थं सूर्यरश्मयो नूनमस्माकं बाह्याभ्यन्तरशुद्धिं विधाय जीवनदायिनीं शक्तिं विदधति।

आदित्यविषये पाश्चात्त्यविदुषां विचाराः

शर्मण्य (जर्मन) - देशीयेन स्वतन्त्रविचारकेण तर्कवादिना शास्त्रज्ञेन च श्रीमता 'अन्स्र्ट हेकेल' महो-

१ ऋक्० २.३३.१। २. ऋक्० १.११५.१।

३. चरकसंहिता १४.४६।

४. तत्रैव ८.३३। ५. यजुः० १.३१।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दयेन स्वविरचिते 'दि दिडल् ऑफ दी युनिवर्स' नाम्नि ग्रन्थे पञ्चदशे पाठे प्रतिपादितं यत् 'सूर्यः प्रकाशस्य उष्णतायाश्च देवता। सूर्यशक्त्या अखिल-जीवधारिणोऽवलम्बिताः। समस्तास्तिकवादेश्वर-वादयोरपेक्षया सूर्योपासना (Solarism or Heilotheism) श्रेष्ठा इति अर्वाचीनशास्त्रज्ञानां मतम्।[१]

'फिजिकल कल्चर' (अमेरिका) नामिकायाः मासिकपत्रिकाया (जुलाई १९२६) अङ्के डॉ० गार्डनर रोनी महोदया लिखन्ति—'वस्त्ररहितो भूत्वा आतपे तिष्ठ।' सूर्यो वैद्यानामोषधीनाञ्च राजा। शास्त्रं वदति यत् सूर्य आरोग्य-शरीरस्वास्थ्ययोः मूलस्थानम्। सूर्यकिरणशास्त्रस्य निष्णाताः विद्वांसः डॉ० हेस् महाशयाः कथयन्ति यत् सूर्यकिरणाः सम्पूर्णनाम् अन्नानां मूलम्। सूर्यकिरणसदृशं प्रोत्तेजकं पौष्टिकं रोगनिवारकञ्च द्रव्यमन्यत् किञ्चिन्नास्ति।

स्विट्ज़रलैण्डे 'स्कूल इन दी सन' (School in the sun) नाम्नी संस्था वर्तते। अस्याः संस्थापकाः डॉ० रोलीअर सूर्यचिकित्सा-प्रवर्तकाः। सर्वप्रथमं (आदौ) तैरेव अन्विष्य प्रकटीकृतं यत् वनस्पतीनां वृद्ध्यर्थं पुष्ट्यर्थं च यथा सूर्यप्रकाश आवश्यकस्तथा मनुष्याणां विशेषतो लघुबालकानां वृद्धये पुष्टये च स नितान्तमावश्यकः।

डॉ० रोलिअर महोदयाः कथयन्ति—विद्यालय-कार्यक्रमे क्रीडादिव्यायामवत् 'सूर्यस्नानम्' (Sunbathing) अर्थात् आतपसेवन-भ्रमणे नूनं योजितव्ये।

डॉ० वेलप्रोजः Whnt's best to eat नाम्नी पुस्तके लिखति—सम्पूर्णं संसारव्यापिनी विद्युच्छक्तिः पृथिव्यामस्मान् सूर्यप्रकाशोष्णतारूपाभ्यां मिलति।

डॉ० ई० सी० ग्रे० एम० डी० वदति—आरोग्य-दायक - सूर्यप्रकाशोपचार - पद्धत्या बालकानामङ्ग-प्रत्यङ्गेषु शक्तिरायाति, तेषां रोगप्रतिबन्धक-शक्तिश्च वर्धते।

डॉ० एच० सी० मेकलस्य इदमभिमतं यत् 'सूर्यस्य कोमलकिरणेषु 'डी' जीवनद्रव्यं तिष्ठति।[२]

(क्रमशः)

१. सूर्य-नमस्कार, पृ० ४८।
२. तत्रैव, पृ० ४९।

सन्ति सन्तो वसन्तः !

१. अनुदिनमभिवृद्धिं प्राप्य दुर्दान्तवर्गः
प्रशममुपगतानां हिंसया खेलतीव।
परिभवमुपयाताः साहसायत्तचित्ता-
दिह हतमहिमानः सन्ति सन्तो वसन्तः॥

२. परहितमभिहर्तुं कूटकौटिल्यसारात्
प्रतिदिशमधुनास्ते दस्युवृत्तेः प्रवृत्तिः।
सुजननिधननीत्या धन्यतां मन्यमाने-
रिह हृतधनमानाः सन्ति सन्तो वसन्तः॥

३. विततविभवतृष्णैर्भूरि कृष्णाभियोगै-
रनुपद - भवभूतिप्राप्त - यत्न प्रयोगैः।
शकलित - कलितश्री - सौमनस्यैकबन्धा
जगति गलितगन्धाः सन्ति सन्तो वसन्तः॥

४. अनुपदपदचित्ताः सद्गुणग्रामलुब्धा
अनुपमरमणीयानर्थसार्थान् स्मरन्तः।
अभिमतशतवामा दक्षिणासक्तचित्ताः
कवय इव महान्तः सन्ति सन्तो वसन्तः॥

—श्री बटुकनाथ शास्त्री खिस्ते—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृत-विरोधिनो विचारास्तन्निराकरणोपायाश्च

— श्री विद्याधर द्विवेदी, साहित्याचार्यः —
[साहित्य-प्राध्यापकः—स्याद्वाद-महाविद्यालयस्य, वाराणसी]

[संस्कृतभाषामधिकृत्य साम्प्रतं तद्विरोधे यत्किमपि वक्तव्यमद्यतनीयानां तथाकथित-'प्रगतिशीला'नाम् आचार इव संवृत्तः। उदीयमानेनानेन विदुषा तेषामेव वक्तव्यानां सरलतरया भाषाया प्रौढैस्तर्कैः प्रमाणैश्च शवपरीक्षणमत्र विहितं यद्धि संस्कृतप्रणयिनां कृते नूनं मोदावहं भवेदिति।—सम्पादकः]

अस्माकं देशस्य स्वतन्त्रताया इयति काले व्यतीतेऽपि सर्वासां समस्यानां मध्ये भाषासमस्याऽतितरां मुख्या। तत्र संस्कृतमेकत्र दिनानुदिनं वर्धमानमस्ति, अन्यत्र तत्सम्बन्धे अनेके विरोधिनो विचारा अपि समायान्ति। संस्कृतानुरागिभिः निःशेषैः संस्कृतज्ञविद्वद्भिः तदुपरि विचारः कर्तव्यो यत् तेषां विचाराः, संस्कृतविरोधिन्य उक्तयो वा समीचीनाः सन्ति अथवा असमीचीनाः? यदि समीचीनास्तर्हि अस्माभिस्तेषां विचाराणां सिद्धान्तानाञ्च समर्थनं विधाय तदनुसारं संस्कृतभाषायाः पठनं पाठनं च कर्तव्यम्, संस्कृतसाहित्यस्यानुशीलनं विधेयम्; तथैव तद्विरोधे किञ्चिदपि न वक्तव्यम्। यदि ते सिद्धान्ता असमीचीना एव प्रतिभान्ति, तर्हि तेषां सप्रमाणं सोदाहरणं सयुक्तिकं च खण्डनं विधाय संस्कृतभाषाया महत्त्वप्रतिपादकाः, गौरववर्धकाः, निर्दोषतासमर्थकाश्च विचारा उन्नेयास्तथा उल्लेख्याः। तदत्र संक्षेपेण विरोधिनां ते विचारा ये अनेकत्र श्रुताः, विविधासु पत्र-पत्रिकासु चालोकिताः, अधस्ताद्दीयन्ते। तेषां क्रमशो युक्तियुक्तं खण्डनमपि यथासंभवं प्रस्तूयते। आशास्यते च यदन्येऽपि सुरभारतीसमुपासका विद्वांसः स्वलेखनीं विषयेऽस्मिन् प्रवर्त्य किमुचितं किञ्चानुचितमिति विवेचयिष्यन्ति।

१. हिन्दीभाषा संस्कृतस्य ज्येष्ठपुत्रीति चक्षुषोः धूलिप्रक्षेपः।

२. संस्कृतं पुरा जनभाषा आसीदिति अनृतमिव प्रतिभाति।

३. व्यतीतेष्वेकसहस्रवर्षेषु कोऽपि महत्त्वपूर्णो ग्रन्थो न विरचितः।

४. सपरिश्रमं निरन्तरं विंशतिवर्ष-पर्यन्तमधीतवन्तः शास्त्र्याचार्याश्चेत् शुद्धसंस्कृते वक्तुमप्रभवस्तर्हि रटनैकशरणाया एतस्याः, तेषु निर्बोधबालकेषु बलाद् भार-प्रदानेन किं प्रयोजनं येषामागामिनि जीवने कदापि अस्या उपयोगो न सम्भाव्यते?

५. संस्कृतभाषणे, सक्रियाया जिह्वायाः स्वाभाविकं सारल्यं मन्ये नास्त्येव।

६. न केवलं संस्कृतमिदं मृतभाषा, अपितु स्वसान्निध्यभाजोऽपि भाषा निष्प्राणा इदं विदधाति।

७. संस्कृतस्य काठिन्यं सर्वा भाषास्तिरस्करोति।

८. सामन्तवादिनो युगस्य पालिता-पोषिता भाषेयं जनतन्त्रयुगेऽस्मिन् लाभदायिका न सेत्स्यति।

९. कला-समाजशास्त्र-धर्म-भारतीयदर्शन-प्रभृति-विषयाध्येतॄणां कृते संस्कृताध्ययनं काममपरिहार्यं स्यात्, किन्तु विज्ञान-प्राविधिकादिविषयाध्येतृभ्यः को नाम उपयोगः संस्कृतस्य?

१०. संस्कृत-पाठशालानां शिक्षापद्धतिः, इयती कठिना, अशोभना, एतावती निरुपयोगिनी चास्ति यत् कृतेऽपि डिण्डिमघोषेऽद्यावधि तत्र छात्रसंख्या अल्पीयसी एव।

१. तत्र ये हिन्दीभाषां संस्कृतस्य ज्येष्ठपुत्रीं न स्वीकुर्वते, तदुचितं न प्रतिभाति। यतो हि जागतिकभाषाणामखिलानामयं नियमो यत्ताः समृद्धभाषातः शब्दान् गृह्णन्ति। तदनुसारं भारतीयाः सर्वा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भाषाः संस्कृतादेव प्रायो निःसृताः। याश्च काश्चन दाक्षिणात्या वर्तन्ते, ता अपि अनया प्रभाविता एव। तत्र उत्पन्नासु सर्वासु भाषासु हिन्दी एव अतिसान्निध्यं भजमानाऽस्तीति प्रत्यक्षम्। अद्यावधि ये केचन हिन्दीभाषाया विद्वांसः समभवन्, ते सर्वेऽपि निश्चितमेव संस्कृतज्ञातार आसन्। यैश्चापि सनियमं संस्कृतं नाधीतं तेषां हिन्द्यां गतिरवरुद्धैव। महात्मना गान्धिमहोदयेन एतदेव विमृश्य उक्तमासीत् यत्—

"जो अच्छी हिन्दी, बंगाली, गुजराती या मराठी सीखना चाहें, उन्हें संस्कृत तो सीखनी ही पड़ेगी।'

—('गांधीजीकी सूक्तियाँ', पृ० १६४)

संस्कृतमेव एतादृशी भाषा या भारतीयभाषासु सूत्ररूपेण ग्रथिताऽस्ति। नूनं यदि इयं सर्वाभ्यो भाषाभ्यो दूरीकृत्य स्थाप्येत तर्हि का वार्ता हिन्द्याः, निखिला एव भाषा निर्मूलाः निष्प्राणाश्च भविष्यन्ति। इदञ्च विशेषतोऽवधारणीयं यद् हिन्द्याः संस्कृतवत् प्रामाणिकं सुनिश्चितं च व्याकरणं नास्ति। यतो हि इयं संस्कृतेन इयती प्रभाविता, सन्निहिता च वर्तते यद् व्याकरणान्तरस्य आवश्यकतैव न जाता। भाषावैज्ञानिकानाञ्चेदं मतं यत्संस्कृतात्प्राकृतस्य प्राकृतादपभ्रंशस्य, अपभ्रंशाच्च हिन्द्या उत्पत्तिरिति। अतः संस्कृतस्य ये केचन गुणा आसन् प्रायस्ते सर्वेऽपि मातुः पुत्रीमिव हिन्दीमधिचक्रुः। उक्तञ्च डा० अमरनाथ झा महोदयेन 'विचारधारा'नाम्नि स्वपुस्तके—'समस्त देश के विभिन्न समुदायोंपर संस्कृत का प्रभाव है और सभी भाषाएँ आर्य अथवा द्रविड़ संस्कृत से प्रभावित हैं। **हिन्दी तो संस्कृततनया ही है।**

—('विचारधारा', पृष्ठ ९७)

अतो हिन्द्या संस्कृतज्येष्ठपुत्रीत्वमनवद्यमेव।

२. संस्कृतस्य पुराकालिक-जनभाषात्वविषये संशयदोलायितानां मतमपि असङ्गतमेव। कस्याश्चनापि भाषाया अयं क्रमो भवति यत्सा सर्वप्रथमं साधारणैव तिष्ठति। पुनः क्रमशः उत्थानशीला सती चरमोत्कर्षं प्राप्नोति। यद्यपि बह्व एतादृश्योऽपि भाषाः सन्ति या चिरकालं यावन्न जीवन्ति, परन्तु या निरन्तरं भाषमाणा भवन्ति ताः कदाचन अवश्यमेव साहित्यिकभाषापदवीमलङ्कुर्वन्ति। जनभाषात्वमन्तरा काऽपि भाषा अन्ततः पराकाष्ठां नाधिगच्छति। संस्कृतमिदानीमस्माकं समक्षं साहित्यिकताया परां कोटिं समारूढा अनुभूयते। अतोऽस्या जनभाषात्वे सन्देहः खपुष्पमिव निराधार एव। पाणिनीयव्याकरणमहाभारतादिग्रन्थेषु 'भाषा'शब्दप्रयोगोऽस्या जनभाषात्वमेव द्रढयति। तस्मादियमवश्यमेव कदाचन जनभाषाऽऽसीदेव इत्यत्र नास्ति कश्चन सन्देहावसरः।

३. अतीतेष्वनेकसहस्रवर्षेषु महत्त्वपूर्णग्रन्थलेखनाभावस्य सर्वथा सत्यता न प्रतिभाति। कारणमत्रेदं वर्तते यत्संस्कृतस्य स्वर्णकालस्तु प्रायः समाप्त एव, अस्याश्चरमसीमा क्वचन विराममधिगता। अतः प्राचीनसाहित्यस्य तुलनायामसामञ्जस्ये विद्यमानेऽपि सर्वथाऽभावो नास्ति। विविधप्रकारकाणि नाटकानि, प्रहसनानि, महाकाव्यानि, खण्डकाव्यानि, गद्यकाव्यानि च विरचितानि। कालिदास-सदृशमहाकवीनामसत्त्वेऽपि महाकवयो नाभूवन्निति वक्तुं न शक्यते। किंवा, तथाविधग्रन्थानां लेखनाभावस्य कारणेषु पारतन्त्र्यमपि कारणम्। परतन्त्रा जना परतन्त्रा एव, तत्प्रसङ्गे तेषां क्व स्वाधीनता? तदानीं तु येन केन प्रकारेण उदरपूरणमेव प्रधानमुद्देश्यं भवति। अतः किं वक्तव्यं स्वतन्त्रसंस्कृतग्रन्थ-लेखनसम्बन्धे। संस्कृतस्य पतने परतन्त्रतैव मूलभूता।

४. शास्त्र्याचार्यपरीक्षोत्तीर्णाः संस्कृतभाषणे योग्या न भवन्तीति मुग्धा अबोधा च बालका न शिक्षणीया इत्यपि तावत्समीचीनं नास्ति। यतो हि न खल्वयं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भाषाया दोषः, अपितु शिक्षाप्रणाल्याः देशनिर्धनतायाश्च दोषः। शिक्षाया उद्देश्यमिदानीं धनप्राप्तिः, दरिद्रता-निराकरणं च संवृत्तं वर्तते। भाषायास्तलस्पर्शिज्ञाने जाते एव वक्तुं सर्वे समर्था भविष्यन्तीति निश्चितं नास्ति। त्यज्यतां संस्कृतस्य प्रसङ्गः, हिन्दीमाङ्ग्लभाषां वाऽऽदाय कति एम. ए. परीक्षोत्तीर्णाः ये शुद्धं वक्तुं लिखितुं वाचयितुं वा पारयेयुः? अतः केवलं संस्कृतस्योपरि एतादृश आक्षेपो न युज्यते।

५. संस्कृतभाषणे जिह्वायाः सारल्यं सुगमत्वं च नास्तीति आपातरमणीयं प्रतिभाति। किञ्च जिह्वायाः सारल्यं भाषाया हेयतामुपादेयतां वा न प्रतिष्ठापयति। संस्कृतशब्दोच्चारणे काठिन्यमुत्पद्यते, जिह्वायां बलञ्चापततीति उभयमपि केवलं संस्कृतस्य प्रयोगशून्यतामेव द्रढयति। आङ्ग्लप्रभृतयो भाषा रात्रिन्दिवं सर्वैरुच्चार्यन्ते, अत एव तत्र तथा काठिन्यं नावगम्यते। सुललितानां सुगमानां शोभनोच्चारणसम्पन्नानाञ्च शब्दानां संस्कृतवर्जं सर्वत्र अभावो दृश्यते। जयदेवेन उचितमेवोद्घोषितं यत् "ललितकोमलकान्तपदावलीं शृणु तदा जयदेवसरस्वतीम्" इति। यत्र कवीनां महाकवीनां च ललितकोमलकान्तपदावलीनां कृते परस्परं स्पर्धा विद्यते, यत्र च श्रुतिकटुत्वादयो नितान्तमेव काव्यादिषु हेया निगदितास्तस्यां भाषायां जिह्वायाः सारल्यं नास्तीति वचने किमिव उत्तरणीयम्। वस्तुतस्तु 'दोषे प्रयत्नः सुमहान् खलानाम्' इति भणितिरेवात्र चरितार्था भवति। ईदृशभ्रमनिराकरणायैव श्रीमता मालवीय-महाभागेन उपन्यस्तम्—

'मनुष्य के चिन्तित तथा उत्कृष्ट विचारों को सुमधुर ललितशैली में व्यक्त करने का सुन्दर माध्यम सदैव संस्कृत ही रही है।'

—(श्रीमालवीय-जीवनचरित्र, मा० २, पृ० ५६)

६. संस्कृतं स्वयं तु मृतं विद्यते, सान्निध्यभाजश्चापि निष्प्राणान् विदधातीति द्वयमपि भ्रमग्रस्तमेव। वस्तुतः संस्कृतमेव एवंविधमस्ति यत्स्वयं जीवन्नन्यानपि स्वामृतरसेन जीवयति। प्रत्यक्षं चास्ति साम्प्रतं विविधभाषाणां जीवनम्। सम्यगेवोक्तं डॉ० सम्पूर्णानन्देन—'संस्कृत जीवित ही नहीं, बल्कि मुर्दों के लिए भी सञ्जीवनी है।' ('संसार' २ नवम्बर १९४८)। न केवलं यावदन्या भाषाः स्थास्यन्ति तावदेव संस्कृतस्य सत्ता; अपितु इयं प्रलयेऽपि विलयं न गमिष्यतीति निर्विचिकित्सितम्।

७. संस्कृतमतिकठिनमिति असंस्कृतज्ञस्य भाषाज्ञानविधुरस्योक्तिः। अत्र कीदृशं काठिन्यमित्यहं नावगच्छामि। 'अनभ्यासे विषं विद्या' इति वचनानुसारं नितरामज्ञातविषयाणां दूरतश्च बिभ्यतां कृते सर्वमपि कठिनम्। यदि रटनप्रधानेयमित्युच्यते तर्हि एतद्विपक्षे वक्तुं शक्यते यद् का भाषा को वा विषयो रटनं नापेक्षते? आङ्ग्लभाषैव तावद् गृह्यताम्। अस्या 'स्पेलिङ्ग'रटने कियदसौविध्यमिति प्रत्यक्षमेव। तत्र च लिख्यते किञ्चिदन्यत्, उच्चार्यते च किञ्चिदन्यत्। 'RAM लिख्यते, राम इति रैम इति वा उच्चार्यते। संस्कृतस्यैतादृशी स्थितिर्नास्ति, देवनागरीलिप्यां यदेव लिख्यते तदेवोच्चार्यते। तस्मात्संस्कृतं कठिनमिति वचनं न युक्तियुक्तम्।

८. सामन्तवादिनो युगस्य भाषेयं जनतन्त्रयुगे लाभदायिका न सेत्स्यतीति संकुचिता विचारधारा विद्यते। यतो हि भाषा तु व्यवहारपक्षमेव आदाय जीवति। यावद् जनाः व्यवहरन्ति, परस्परं प्रयोगं कुर्वन्ति, तावत्कालपर्यन्तं सा भाषा जीवत्येव। अतः सामन्तवादियुगवत् जनतन्त्रयुगेऽपि अस्याः प्रयोगे व्यवहरणे वा न कापि बाधा। हिन्दी अपि कदाचित् सामन्तवादिनो युगस्य भाषाऽऽसीत्। बिहारिप्रभृतयो रीतिकालीनाः कवयः किं केषाञ्चन राज्ञां प्रशंसातिरिक्तं किञ्चित् लिखितुं समर्था अभूवन्? न चेत् कथङ्कार-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मद्य जनतन्त्रयुगे हिन्दी राष्ट्रभाषापदमलङ्करोति ? तस्मादिदं दूषणं संस्कृतस्य सर्वथैवानुचितम् ।

९. विज्ञान - प्राविधिकादिविषयाध्येतॄणां कृते संस्कृतस्य कश्चिदपि उपयोगो नास्तीति न वक्तव्यम् । तत्र कारणमिदं यत् सर्वस्य स्वदेशवासिनः कृते स्वीयेतिहासज्ञानं नितान्तमपेक्षितं भवति, न केवलमितिहासविषयाध्येतॄणां कृते । तत्रापि संस्कृते सर्वे विषयाः सुनिबद्धाः सन्ति । ते हि कला, समाजशास्त्रम्, धर्मः, भारतीयदर्शनम्, विज्ञानादयः केऽपि भवेयुः । अतः संस्कृताध्ययनं विना संस्कृतज्ञानमन्तरा एतेषामैतिहासिकदृष्ट्या समीचीनं अध्ययनं केन प्रकारेण सम्पत्स्यते ? तस्मात् प्रत्येकभारतीयस्य कृते संस्कृतमपरिहार्यमेव । विज्ञान-प्राविधिकादिविषयाध्येतॄणां कृते तु संस्कृतज्ञानं कथमपि न परिहार्यम् । यतो हि भारतीयं विज्ञानं कीदृशमासीत्, तस्य, तुलनायां साम्प्रतिकविज्ञानं किं विधमित्यादिविषयाणां तलस्पर्शिगवेषणं प्राचीनसंस्कृतग्रन्थानुसारं नवीनतममन्वेषणं च संस्कृतभाषाया ज्ञानमन्तरेण कथं सम्भाव्येत । अद्यावधि विज्ञानादिविषया आङ्गलभाषायामेव प्रचलन्तो विद्यन्ते । कदाचित् चेत् आङ्गलभाषेय देशाद् लुप्येत तर्हि एतस्याः स्थाने का भाषा भविष्यतीति विचारे समुपस्थिते युक्तमेवोक्तं श्री गुलजारीलाल नन्दा महाभागेन—

'हमारे देश में विज्ञान की भाषा एक होनी चाहिए और वह भाषा संस्कृत ही हो सकती है ।'

—(राजस्थान सं० साहित्य-सम्मेलन स्मारिका)

तस्मात् विज्ञानप्रभृतिविषयाणां कृतेऽपि संस्कृतमपरिहार्यमेव ।

१०. संस्कृत-विद्यालयेषु छात्राणामल्पतायां भाषा कारणं नास्ति, न वा संस्कृतशिक्षापद्धतिः । किन्तु अत्र कारणान्तरैरेव भाव्यम् । सर्वप्रथममिदमवधारणीयं यत् शासनस्य संस्कृतं प्रति तादृशी अभिरुचिर्न वर्तते यादृशी अन्येषु क्षेत्रेषु । सपरिश्रमं विंशतिवर्षाणि अधीत्य संस्कृतपण्डिताः कियद् वेतनं लभन्ते, का च प्रतिष्ठा साम्प्रतिके युगे संस्कृतं प्रतीत्युभयमपि कस्यचन नाविदितम् । द्वितीयं कारणं यत् संस्कृतस्य व्यवहारक्षेत्रेऽनवतारणम् । एतस्मिन् च विषये कटु सदपि वक्तुं शक्यते यत् संस्कृतविद्वांसः पाठनकलानुसारं नितरां न पाठयन्ति । ततश्च छात्रेषु प्रारम्भे एव काठिन्यबुद्धिर्जागृता भवति । फलतः संस्कृताध्ययने अभिमुखा अपि ततः पराङ्मुखा जायन्ते । कक्षायां प्रविशद्भ्यश्छात्रेभ्योऽध्यापकाः पृच्छन्ति यत् कियद्रटितमिति । आम्, एतन्निश्चितमेव यत् संस्कृतस्येमां दशामवबुद्ध्वाऽपि स्वेच्छया वंशपरम्परया संस्कृतपठने छात्राणां श्रद्धैव मूलम् । स्पष्टमेव तेऽधिकं धनं नार्जयितुं प्रभवन्ति, यतो हि तेषां मुख्यमुद्दिष्टं ज्ञानार्जनमेव भवति ।

अतः सुस्पष्टं यदियं छात्राणामल्पता न स संस्कृतशिक्षापद्धतेर्दोषः । मूलतोऽयं शासनस्यैव दोषः । शासनं यदि समुचितवेतनमानस्य सर्वसाधारणशिक्षापद्धतिसुलभसुविधानाञ्चैव नहि, विशेषतोऽपि संस्कृतस्य कृते लौकिकसमुन्नतिसाधनानामपि व्यवस्थां कर्तुमग्रेसरं भवेच्चेत् संस्कृतशिक्षायामेतादृशी छात्रसम्पत्तिः स्यात् या किल सर्वाभ्यः शिक्षापद्धतीभ्यः कृते नूनं स्पर्धाया विषयो भवेत् । अतः संस्कृतदूषकैः पूर्वं शासनमेव एतदर्थं बलात्तथाकर्तुं प्रेरणीयमिति ।

★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रूप-दीपिका

—श्रीरामानन्द द्विवेदी—

उपपदीया अपि विभक्तयः

प्रथमा

प्रभू रामः इति ख्यातो लक्ष्मणो नाम चानुजः ।
स भाति वन्द्यये सोऽपि हे राम, सततं जय ॥

द्वितीया

रामं पश्यति कौशल्या रामं प्रश्नं च पृच्छति ।
सरामं शोभते सीता राममनु च लक्ष्मण ॥
रामो याति वने क्रोशं रामं गच्छन्ति वै जनाः ।
रामं च लक्ष्मणं चैव ह्यन्तरा याति जानकी ॥
श्रीरामं परितो वीराः श्रीरामं निकषा कपिः ।
राममधिवसत्येव श्रीर्विजयो धृतिर्मतिः ॥
यत्सुखं परमं लोके न राममन्तरेण तत् ।
तं रामं शरणं यामि रामं प्रति निवदये ॥

तृतीया

रामेण सह वै सीता धर्मसंस्थापनेच्छया ।
वनं याति तथा तत्र वसति तेन हेतुना ॥
रामः साधुः प्रकृत्या च जटाभिश्च प्रतीयते ।
जयन्तश्चक्षुषा काणो लब्ध्वा रामेण वै क्षमाम् ॥
दुःखेन स ह्यनिर्विण्णो नाम्ना रामो नरोत्तमः ।
रामेण लभते सौख्यं रामेण रावणो हृतः ॥
श्रीरामेण विना सौख्यं लभ्यते न कथञ्चन ।
रामेण किमिति ज्ञात्वा रामेणालं सते न हि ॥
श्रीरामेण विहीनस्य किं वृथा जीवितेन च ।
रामेण सदृशो नास्ति बन्धुरन्यः कुतश्चन ॥

चतुर्थी

रामाय दीयते राज्यं वनं रामाय रोचते ।
धारयामश्च रामाय सौख्यं रामाय वै नमः ॥
रामाय द्रुह्यति द्वेषी स च रामाय कुप्यति ।
प्रभवति तथा रामो रावणाय न संशयः ॥
रामाय चानसूयन्तः रामार्चनाय प्रस्तुताः ।
धर्माचारोऽस्ति रामाय रामाय स्पृहयाम्यहम् ॥

पञ्चमी

कश्चिद् रामाद् गरीयान्न नास्ति रामाद् द्वितीयकः ।
रामाद् दूरं द्विषो रामात् कस्य हर्षो न जायते ॥
पूर्वं राज्याभिषेकाद्धि रामाद् दुष्टो विलीयते ।
निवारयति सः पापाज् जनः पापाज्जुगुप्सते ॥
रामात्सर्वं च गृह्णाति रामाद् विना कृतः सुखम् ।
आमूलाद्धि कथां श्रुत्वा रामादन्यश्च नेप्सितः ॥

षष्ठी

आविर्भावश्च रामस्य हेतोर्धर्मस्य नान्यथा ।
तुल्यो नास्ति च रामस्य रामस्य बहवो गुणाः ॥
श्रीरामस्य कृते वीराः वानराश्च युयुत्सवः ।
श्रीरामस्य सकाशं च दूरं च प्रसृतो मुदा ॥
रामस्य वामतः सीता दक्षिणतश्च लक्ष्मणः ।
पुरतो मारुतिस्तस्य तस्य स्मरामि सर्वदा ॥

सप्तमी

वनं गच्छति रामे च प्रस्थिता जानकी मुदा ।
शस्त्रे दक्षो हरिः हन्ति मायामृगं च चर्मणि ॥
जटा च शोभते रामे रामो लग्नो रणे तथा ।
श्रीरामे चागते युद्धाद् मोदते सकला जनाः ॥
मोक्षे चेच्छास्ति चेत्तर्हि यत्ने कृते स सिद्ध्यति ।
रामेषु राघवः स्तुत्यो धृतो येन जनः करे ॥
धन्यः स नृषु, रामेण धृतः करेण यः करे ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उत्तरस्थः पाठः

प्रथमा

प्रथमा नाममात्रे च सम्बोधने त्वितिग्रहे।
कर्तरि कर्तृवाच्यस्य कर्मवाच्यस्य कर्मणि॥

द्वितीया

ऋतेविनादिभिर्योगे द्वितीया कर्मणीष्यते।
धिक्प्रतीत्यादिभिश्चैव योज्या क्रियाविशेषणे॥

तृतीया

तृतीया करणे योज्या कर्मवाच्यस्य कर्तरि।
ऊनवारणहेत्वर्थैः सहशार्थैः सहग्रहे॥

चतुर्थी

चतुर्थी सम्प्रदाने च नमोयोगे तथाशिषि।
रुच्यर्थानाञ्च सुप्रीतौ तादर्थ्ये च क्रियायुते॥

पञ्चमी

पञ्चमी स्यादपादाने हेत्वर्थे तु विभाषया।
ऋतेपूर्वादिभिर्योगे ल्यबर्थे च भये तथा॥

षष्ठी

षष्ठी योज्या तु सम्बन्धे कृदन्ते कर्तृकर्मणोः।
तथा तुल्यार्थयोगे सा कृत्यानां कर्तृकारके॥

सप्तमी

आधारे सप्तमी योज्या भावे तु कर्मयोजने।
षष्ठी वा सप्तमी योज्या निर्धारे च ह्यनादरे॥

उपसंहारः

विभक्तिकारके योज्या क्रमान्, न कर्मवाच्यके।
तृतीया कर्तरीहैव कर्मणि प्रथमा यथा॥

विभाषया

द्वितीया वा चतुर्थी वा विभक्तिश्च विभाषया।
गत्यर्थकर्मणि स्याद्धि तु चेष्टायामनध्वनि॥
ऋतेविनादिभिर्योगे द्वितीया वा च पञ्चमी।
तृतीया पञ्चमी वा स्याद् हेत्वर्थे च विभाषया॥
योज्या षष्ठी तृतीया वा कृत्यानां कर्तृकारके।
तुल्यार्थैरतुलोपम्ये विभक्तिस्तद् विभाषया॥
तृतीया सप्तमी वा स्यात् प्रसिते चोत्सुके तथा।
अनादरे च निर्धारे षष्ठी वा सप्तमी भवेत्॥

तद्धितम्

वेद्यो हि धारणाद् धर्मः सत्यधर्म्मी सदा जयेत्।
धर्म्यमेव हि कर्तव्यं भुवि धन्योऽस्ति धर्मवान्॥
शब्दितं धार्मिकत्वं यद् धारयेत् सर्वमात्मवत्।
स कुलीनो गुणी धीमान् धार्मिकतामयो हि यः॥
वैष्णवो राघवं पश्येदेकाकिनमनेकधा।
विश्वं तदीयकं भाव्यं सर्वत्र धर्मतः सुखम्॥
रुच्या धर्मधुरीणाय कौशल्येयस्य नीलिमा।
विमलः श्यामलो ध्येयो विधिना येनकेनचित्॥
नामैव महिमन् श्रेष्ठं चाद्यतनं सनातनम्।
धार्यं महद् हरेर्नाम महत्तरं महत्तमम्॥

धातुरूपम्

पठ्

(कृदन्तम्)

रामस्य चरितं दिव्यं पाठ्यं सर्वविधं जनैः।
पठनीयं समासेन पठितव्यं सविस्तरम्॥
पठिष्यन् पाठकः पाठं पाठं - पाठं प्रपूरयेन्।
श्रद्धया पठितं चेद्धि पठितवान् सुखी भवेत्॥
गुरुणा पाठ्यते चैव स्वयं पठति भाग्यवान्।
पाठयति स्वकं वत्सं चैवं तैः पठ्यते कथा॥
गुरुणा पाठ्यमानञ्च पठ्यमानं तथात्मना।
सुपाठ्यं सुपठं कुर्यात् पिपठिषेत् जनः सदा॥
कथां पापठ्यते भक्तः पठनीयति भूयशः।
पठनं पाठनं कुर्वन् बोधयति परस्परम्॥
पठितुं श्रद्धया गच्छेत् पठन् सन् श्रीहरिं स्मरेत्।
आवर्तेत पठित्वेदं सपठ्य स्वं समुद्धरेत्॥

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१९७४-७५ वर्षीया
प्रादेशिकी कार्य-कारिणी समितिः

वृन्दावन-महाधिवेशने १९७४-७५ मितेशत्रीय-संवत्सरयोः कृते कार्यसञ्चालनाय या प्रादेशिकी कार्य-कारिणी-समितिः सार्वमतेन निर्वाचिता, तस्याः पदाधिकारिणः सदस्याश्च निम्नलिखिताः सन्ति—

अध्यक्षः—आचार्य रामाश्रय त्रिपाठी। **उपाध्यक्षाः** १. (पूर्वखण्डस्य) श्री ज्वालाप्रसाद मिश्रः, वाराणसी। २. (मध्यखण्डस्य) श्री बैजनाथ द्विवेदी, अयोध्या। ३. (पश्चिमखण्डस्य) डॉ० श्यामसुन्दर-दासः, हरिद्वार। **महामन्त्री**—श्री गोविन्द नरहरि वैजापुरकरः। **संयुक्तमन्त्रिणः**—१. (पूर्वखण्डस्य) श्री त्रिवेणीप्रसाद दीक्षितः, वाराणसी। २. (मध्य-खण्डस्य) श्री चन्द्रदेवमणि त्रिपाठी। ३. (पश्चिम-खण्डस्य) श्री ओङ्कारनाथ मिश्रः, लखीमपुर। **उपमन्त्रिणौ**—१. श्री माणिकचन्द्र मिश्रः, प्रयाग। २. श्री दामोदर विष्णु कालविण्टः, वाराणसी। **कोषाध्यक्षः**—श्री वायुनन्दन मिश्रः, वाराणसी। **सङ्घटनमन्त्रिणौ**—१. श्री प्रभुदास आचार्यः, अयोध्या; २. श्री हरिपाल द्विवेदी, देवरिया। **प्रचारमन्त्री**—श्री डॉ० शिवशङ्कर द्विवेदी, अयोध्या।

सदस्याः—सर्वश्री १. राजनारायण शास्त्री शुक्लः, वाराणसी। २. मदनसैन मिश्रः, वृन्दावनम्। ३. शिवाकान्त मिश्रः, बस्ती। ४. रामकिशोर शर्मा, खुरजा। ५. हरिवंश चतुर्वेदी, चुनार, मिर्जापुर। ६. हरिवंश पाण्डेयः, अयोध्या। ७. हनूप्रसाद पाण्डेयः, शाहजहाँपुर। ८. संकठाप्रसाद उपाध्यायः, जौनपुर। ९. कपिलदेव मिश्रः, खेतासराय जौनपुर। १०. हृदयनाथ शास्त्री, जलालाबाद (शाहजहाँपुर)। ११. प्राणगोपाल आचार्यः, वृन्दावन। १२. पूर्णचन्द्र उपाध्यायः हरिद्वार। १३. कृष्णविहारी पाण्डेयः (पञ्चसमितेरपि सदस्यः), लखनऊ। १४. बुद्धि-वल्लभ शास्त्री (पञ्चसमिति - सदस्यः), हरिद्वार। १५. रामवृक्ष उपाध्यायः (पञ्चसमिति - सदस्यः), घुघुली, गोरखपुर। १६. प्रेमकृष्ण गुजराती (तदर्थ-समिति-सचिवश्च) कानपुर। १७. यमुनाप्रसाद शास्त्री, मऊरानीपुर बाँदा। **विश्वविद्यालयप्रतिनिधि-सदस्यः**—श्री डॉ० विद्यानिवास मिश्रः वाराणसी। **संस्कृत-संघटनप्रतिनिधि-सदस्यः**—श्री वासुदेव द्विवेदी, वाराणसी।

अध्यक्ष-महामन्त्रिणोः महाधिवेशनीयं ज्ञापनम्

प्रतिमहाधिवेशनं प्रादेशिक-संस्कृत-विद्यालयाध्यापक-समितेः अध्यक्ष-महामन्त्रिणोः संयुक्तं ज्ञापनं प्रचार्यते, यत्र सङ्घटनस्यास्य तात्कालिक-प्रमुखलक्ष्यविषये पथप्रदर्शनं प्रार्थना च क्रियते। पञ्चममहाधिवेशनोपसंहारेऽपि समितेः अध्यक्षैः आचार्य रामाश्रय त्रिपाठिभिः, महामन्त्रिभिः श्री गोविन्द नरहरि वैजापुरकर शास्त्रिभिश्च यत्संयुक्तं ज्ञापनं प्रस्तोतितं तदधः प्रकाश्यते।

किमपि राष्ट्रियं शासनं न तावत् अञ्जसा राष्ट्रियं वक्तुं पार्येत यावद्धि तत् स्वराष्ट्रस्य संस्कृतेः सभ्यतायाश्च पोषणम् अनुपालनं च नाचरति। भारतस्य संस्कृतिः केवलं संस्कृतभाषा-वाङ्मययो-र्निहिता। अतः संस्कृतेः सामान्य-विशेषरूपेण सम्पो-षणे राष्ट्रियशासनस्य अनिवार्यकर्तव्ये भवतः।

दृशाऽनया विचार्यमाणे विवशतो वक्तव्यं भवति यदस्माकं प्रादेशिकं शासनं स्वात्मानं कथमपि राष्ट्रियं व्याहर्तुं न प्रभवति। यतो हि अद्यावधि संस्कृतस्य अध्यापकाः शासनेनानेन सर्वथा समुपेक्षिताः। देशस्य अन्यान्य - राज्यशासनैः संस्कृतस्य कृते यावत्कृतम्, तावदपि अस्माकमिदं शासनं न करोति। शासने-नानेन अद्यापि शिक्षायाः सर्वोच्चकक्षां यावत् व्यापिनी

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतशिक्षा तस्यामेव कक्षायां प्रस्थापिता वर्तते यस्यां वैदेशिकांग्लशासकैः संस्थापिताऽऽसीत्। अर्थात् अद्यापि संस्कृतविषयकं सर्वमपि व्यवहारं स्वदेशीयं राष्ट्रियं शासनमिदं 'प्राच्य-पाठशाला, अरबी-फारसी मदरसा' इति शीर्षकेणैव सञ्चालयति या हि अरबी-फारसी शिक्षा न जातु हाईस्कूलेति-माध्यमिकशिक्षा-स्तरतः कथमपि प्रगतौ आद्यापि प्रभूता। तथ्यं त्वेतदेव यत् तस्यै अपि अरबी-फारसीशिक्षायै दीय-माना सुविधाऽपि राष्ट्रियमिदं शासनं संस्कृत-पाठशालाभ्यो न ददाति। अद्य किल 'अरबी-फारसी मदरसा' - परपर्यायेभ्यः पाठशालाभ्यो दीयमानम् 'अनुपालनानुदानम्' वर्तमानमहर्घतामालक्ष्य द्विगुणी-कृतं शासनेन, परं संस्कृतपाठशालाभ्यस्तदपि सौभाग्य-मनेन न दीयते !

प्रादेशिक - संस्कृतविद्यालयाध्यापक - समितिरियं प्रादेशिकानां पञ्चसहस्र - संस्कृतविद्यालयाध्यापकानां प्रतिनिधीभूय विगतैः पञ्चभिर्वर्षैः अनवरतं तेषां हिताय वैधानिकं सङ्घर्षं समाचरन्ती विद्योतते। तथापि उत्तरप्रदेश - राज्यशासनेन अस्याः समग्र-शिक्षायाः कृते—या किल स्नातकोत्तरकक्षां यावत् सञ्चाल्यते, विश्वविद्यालयविशेषेण च सम्बद्धा वरी-वर्ति—केवलं माध्यमिकस्तरीणमेव वेतनमानं तृतीय-वेतनायोग - प्रतिवेदनद्वारा स्वीकृतमास्ते। तत्र हि कार्यरत-संस्कृताध्यापकानां कृते लाभत्रयी-योजनायाः महर्घताभृतेश्च औचित्यस्य स्वीकारेऽपि यदाऽद्य माध्यमिकशिक्षाप्रदातृभ्यो नववेतनक्रमदानस्य प्रसङ्गः समुपस्थितः, तेभ्यश्च राजकीयमाध्यमिक - शिक्षका-नुरूपश्च स क्रमः संशोध्य कार्यरूपेण वितरितुं शासनं प्रवर्तते, तदा संस्कृतशिक्षाप्रदातॄणां कृते सिद्धान्ततः स्वीकृतस्या 'स्वल्पं तदपि दुर्लभमि'त्याभाणकायितस्य-नववेतनक्रमस्य राजाज्ञामपि तन्न घोषयति, तद्दानं पुनः सुदूरतरं वस्तु।

प्राच्यपाठशालाम् 'अरबी-फारसी मदरसे'त्युपपदां पाठशालाञ्च 'टके सेर भाजी टके सेर खाजा' इत्या-भाणकायमाणां कुर्वदिदं तथाकथितं राष्ट्रियं राज्य-शासनं उर्दूभाषाशैल्या अध्ययनाय यत्र पाठशालासु एकोऽपि छात्रो न मिलति, तत्र बलात् ४६०० संख्यकान् उर्दूशिक्षकान् नियोजयति। अपरत्र च कीदृशेनापि लौकिकप्रलोभनेन विरहितेभ्यः संस्कृतच्छात्रेभ्यः संस्कृतशिक्षाव्यवस्थां विदधतीनां संस्कृतपाठशालानां कृते तदेव शासनं विंशति-त्रिंशन्मितानां भूयसीनां छात्रसंख्यानामनिवार्यतां घोषयति। नवभिर्मासैः महति कोलाहले कृतेऽपि इमामसङ्गतिं दूरीकर्तुं मन्थरगत्या प्रयतते च। राष्ट्रस्य मानबिन्दुभूतया संस्कृतशिक्षया सह कस्यापि राष्ट्रियशासनस्य कृते सापत्नोऽयं भावो न कथमपि विचारणीयः समर्थनीयो वा वक्तुं शक्यते।

अत एव पञ्चममहाधिवेशनमुखेन वयं साम्प्रतिकम् उत्तरप्रदेशशासनम्, विशेषतश्च तस्य मुख्यमन्त्रिणं माननीयं श्री हेमवतीनन्दन बहुगुणा महाभागं शिक्षा-मन्त्रिणं श्री रामजीलाल सहायक महोदयञ्च साग्रहं प्रार्थयामो यत् ते शीघ्रातिशीघ्रं संस्कृतपाठशालासु स्थापितं छात्रसंख्याप्रतिबन्धं दूरीकृत्य वेतनायोग-प्रस्तावित - वर्गीकरणमुखेन संशोधितवेतनमानस्य लाभत्रयीयोजना - सेवानियम - महर्घताभृतिसहितां राजाज्ञां प्रचारयन्तु, तस्मिंश्च वेतनमाने जायमानम् अतिरिक्तं व्ययभारं स्वयमेव वहन्त्विति।

सहैवानेन प्राच्यसंस्कृतशिक्षायाः समुचितव्यव-स्थायै यथाशीघ्रं पृथक् स्वतन्त्र-संस्कृतनिदेशालयं च तत् सङ्घट्टयतु। राजस्थान - मध्यप्रदेशादिषु संस्कृत-शिक्षाविषये सामान्यीभूतेषु प्रदेशेषु चिरात् स्वतन्त्र-संस्कृतनिदेशालयाः प्रस्थापिता। किन्तु संस्कृतस्य मातृगृहायमाणे उत्तरप्रदेशे प्रबलजनमतेऽपि अद्यापि स्वतन्त्र-संस्कृतनिदेशालयो न दृश्यते। अतो राज्य-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वृन्दावने यमुनापुलिने

प्रादेशिक संस्कृत-विद्यालयाध्यापक समितेः

पञ्चमं महाधिवेशनं विराट् संस्कृत-सम्मेलनञ्च

(संक्षिप्तं कार्य-विवरणम्)

वृन्दावनम्। भगवतो नन्दनन्दनस्य श्रीकृष्णचन्द्रस्य नित्यलीला-विहारभूमौ वृन्दावने कालिन्दीपुलिने वैष्णवकुम्भमेलकावसरे नवनिर्मिते दूष्ये श्रीनिम्बार्कनगरे विगत मार्चमासस्य प्रथमादि-तृतीयदिनाङ्केषु प्रादेशिक - संस्कृतविद्यालयाध्यापक - समितेः पञ्चमं महाधिवेशनं तदन्तर्गतञ्च विराट् - संस्कृतसम्मेलनं महता समारोहेण सम्पन्नमभूत्। विशालतरेऽस्मिन् समायोजने प्रदेशगताः नैके संस्कृतविद्यालयाध्यापक-प्रतिनिधियो विद्वांसः समुपस्थिता आसन्। सम्मेलनस्यास्य संरक्षकत्वं वेददर्शनाचार्यैः उदासीनसम्प्रदाय-शिरोमणिभिः श्रीगङ्गेश्वरानन्द स्वामिपादैः अनन्तश्री-विभूषितैः श्रीमदखण्डानन्दसरस्वति स्वामिपादैश्च स्वीकृतमासीत्। समायोजनस्य समुद्घाटनम् आन्ध्र-प्रदेशस्य भूतपूर्वसंस्कृतोपशिक्षानिदेशकैः श्री के० लक्ष्मणशास्त्रि महाभागैः कृतम्। विराट्-संस्कृत-सम्मेलनस्य पञ्चममहाधिवेशनस्य च सभापतिपदं जगद्-गुरुभिः श्रीमन्निम्बाकाचार्यपीठाधीश्वरैः श्री श्रीजी महाराज पदप्रसिद्धैः श्री राधासर्वेश्वरशरण देवाचार्य-वर्यैः समलङ्कृतमासीत्।

प्रथम-दिवस-विवरणम्

श्रीरुद्राभिषेकः—सम्मेलनस्य शुभारम्भो विघ्नेश्वरस्य महागणपतेः वाग्देवतायाश्च महापूजनेन समभूत्। ततो वैदिकैः विद्वद्भिः आशुतोषस्य भगवतः सदाशिवस्य लघुरुद्राभिषेकेण समर्चनं विहितम्। ततः परं प्रदेशस्य विभिन्नजनपदेभ्यः समागतानां विदुषां परिचय-विचारगोष्ठी सर्वेषां तेषामावासस्थले श्रीरङ्ग-लक्ष्मी-संस्कृतमहाविद्यालये समभूत्।

उद्घाटन-समारोहः—अपराह्णे एकवादनतो महा-योजनस्यास्य नान्दीरूपेण समायोजनस्य विराट्-सभा-मण्डपे एव भगवतो नन्दनन्दनस्य रसमयो होलिका-महोत्सवः समायोजितोऽभवत्, यत्र विविधरङ्गानां पिष्टातकचूर्णानां पुष्पाणाञ्च प्रवर्षणं महत्प्रमोदावहं साङ्गीतिकश्च महो नितरां सरस आसीत्।

तदनन्तरम् आन्ध्रप्रदेशीय-संस्कृतशिक्षोपनिदेशक-चरैः श्री के० लक्ष्मणशास्त्रिपादैः वैदुष्यपूर्णं भाषणं विधाय समायोजनस्य समुद्घाटनं कृतम्।

विभिन्नविदुषां प्रवचनैः श्रीमज्जगद्गुरूणामाशी-र्वचनैश्च समारोहोऽयं पूर्णतामगमत्। रात्रौ सरसे हिन्दी-संस्कृत-कविसम्मेलने समभवातम्।

द्वितीय-दिवस-विवरणम्

सप्तशती-पाठः—समायोजनस्य द्वितीयदिने प्रात-र्भगवत्याः पराम्बायाः प्रसादनाय सप्तशती - महा-मन्त्रस्य पाठो नैकैर्विद्वद्भिः समाचरितः, भगवत्याश्च महापूजा समभवत्। ततः परमन्तरङ्गसमितेरुपवेशनं रङ्गलक्ष्मी-महाविद्यालये समभूत्।

विराट्-संस्कृत-सम्मेलनम्—अपराह्णे द्विवादनतो विशाले सभामण्डपे विराट्-संस्कृतसम्मेलनं समभवत्। सम्मेलनस्य समुद्घाटनं सार्वभौम - संस्कृतप्रचार-कार्यालयसञ्चालकैः श्री वासुदेव द्विवेदि महाभागैः कृतम्। अध्यक्षाणां जगद्गुरूणामभिभाषणं समुल्लेख्य-मासीत्। आयोजनस्यास्य महत्तरं वैशिष्ट्यं नाम सर्वस्य कार्यक्रमस्य देववाण्यां परिचालनमासीत्। आश्चर्यमेतत् यद् सहस्र-सहस्रसंख्यया समवेतैः जन-साधारणैः सर्वथा शान्तिपूर्वकं रात्रौ अष्टवादनं यावत्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समुपविश्य सर्वः कार्यक्रमः श्रुतो दृष्टश्च। नैकेषां व्रजमण्डलीयविदुषां प्रादेशिकानाञ्च विदुषां संस्कृत-प्रचार-प्रसारविषये भाषणानि समभवन्। महत्त्व-पूर्णाश्च प्रस्तावाः पारिताः समभूवन्। सम्मेलने मध्येमध्ये संस्कृतगीतानां कार्यक्रमः समुल्लेख्य आसीत्, यत्र महिलाछात्राणां श्री बलराममिश्राणाञ्च सहयोगो नितरां प्रशंसनीयोऽभवत्। रात्रौ सरसं सङ्गीतसम्मेलनञ्च समभूत्।

तृतीय-दिवस-विवरणम्

रासपञ्चाध्यायि-पाठः—तृतीयदिने प्रातर्विद्वद्भिः सम्भूय श्रीमद्भागवतान्तर्गतायाः रासपञ्चाध्याय्याः सुमधुरं पाठं विधाय भगवान् नन्दनन्दनोऽभिष्टुतः। ततो रङ्गलक्ष्मी-महाविद्यालये महाधिवेशनीय-प्रस्तावानां निर्माणं प्रादेशिकमहासमितेर्नवनिर्वाचनञ्च समभवत्।

महाधिवेशनम्—अपराह्णे पञ्चम - महाधिवेशनस्य शुभारम्भः समभवत्। वैदिक-पौराणिक-साङ्गीतिक-मङ्गलाचरणानन्तरं वैद्यनाथायुर्वेदभवन-संस्थानाधि-पतिभिः श्री रामनारायणशास्त्रिभिः सर्वेषां स्वागतं कृतम्। ततः परं प्रादेशिक-संस्कृतविद्यालयाध्यापक-समितेर्महामन्त्रिभिः श्री गोविन्द नरहरि वैजापुरकर महाभागैः मुद्रितं वार्षिककार्यविवरणं समागतानां शासनाधिकारिणां विशिष्टविदुषाञ्च शुभसन्देशाश्च श्राविताः। महाधिवेशनस्य शुभारम्भो राष्ट्रियसंस्कृत-संस्थानस्य उपसञ्चालकैः श्री स्वामिनाथन् महाभागैः कृतः। अत्रावसरे प्रयागीय - गंगानाथझा - संशोधन-संस्थानसञ्चालकैः श्री मण्डन मिश्र शास्त्रिभिः संस्कृत-विदुषां मुद्बोधनात्मकं भाषणं कृतम्।

सम्मेलने १२ प्रस्तावाः प्रस्ताविताः येषु विभिन्न-विदुषां नैकैः प्रमाणैः युक्तिभिश्च अतीव सारभूतानि समर्थनानुमोदनानि समभूवन्। प्रादेशिक-संस्कृतविद्या-लयाध्यापकसमितेः अध्यक्षैः आचार्य रामाश्रय त्रिपाठी महोदयैः स्वीये ओजःपरिपूरिते भाषणे स्फुटं प्रकटीकृतं यद् 'अस्माभिः पञ्चभिर्वर्षैः प्रादेशिकं शासनं संस्कृत-विद्यालयाध्यापकानां जायमाने घोरतमसमुपे-क्षणविषये नैकैः उपायैः प्रबोधितम्, तथापि तेन किमपि सन्तोषास्पदं कार्यं न कृतम्। एते विद्वांसः सम्प्रति भीषणमहर्घतायुगे प्राणानपि धारयितुम समर्थाः सन्ति। तेषां सङ्घटनशक्तिरपि इदानीं सुदृढा सम्पन्ना। धैर्यस्य बन्धस्तेषां समित्या बलादद्यावधि संगोपितः। यदि शासनमचिरादेव प्रस्तावानेतान् सार्वमतेन पारितान् कार्यरूपे न परिणमयिष्यति तदा तस्य यद्यद् अप्रियं फलं स्यात्, तस्य सर्वस्य दायित्वं तस्मिन्नेव भवेत्। आशास्महे यत् शासनमचिरादेवात्र अवधास्यतीति।'

अन्ते च जगद्गुरुभिः श्री निम्बार्काचार्यपादैः अध्यक्षीयेऽभिभाषणे संस्कृतस्य माहात्म्यं प्रदर्श्य संस्कृत-संस्कृतज्ञानां संरक्षणं शासनस्य राष्ट्रियं कर्तव्यं समुद्घुष्टम्।

अन्ते महामन्त्रिभिः सर्वेभ्यो धन्यवादा वितीर्णाः। तैरुक्तं यत् सम्मेलनस्य कृते या स्वागतसमितिः सङ्घटिता, तत्र समस्तस्य व्रजमण्डलस्य मान्यतमा विभिन्नसम्प्रदायाचार्याः प्रतिनिधयः सदस्या विराजन्ते। तत्रापि आगरा - क्षेत्रीय - संस्कृतविद्यालयाध्यापक-समितेः अध्यक्षाः श्रीवैद्यनाथ झा महाभागाः, सचिवाश्च श्री प्राणगोपालाचार्या, मथुरा-जनपदसमितेः अध्यक्षाः श्री रामादर्शपाण्डेयाः सचिवाश्च श्री गिरिराज-शास्त्रिणः, कोषाध्यक्षाः श्री सदाशिवशास्त्रिणः अन्ये च रङ्गलक्ष्मी-महाविद्यालयप्राध्यापकाः, निम्बार्क-महाविद्यालयप्राध्यापकाः, माथुरचतुर्वेद - महाविद्या-लयस्य खटलास्थ रामानुजमहाविद्यालयस्य, गोवर्धन-स्थमाधव-संस्कृत-महाविद्यालयस्य प्राचार्या अध्या-पकाश्च विशेषतो धन्यवादार्हाः। श्री गिरिराज-शास्त्रिभिः सर्वाऽपि शक्तिरत्र व्ययीकृता। अहोरात्रं तीव्रं यत्नं विधाय सर्वेषामाचार्याणां विदुषाञ्च साहाय्येन तैः सर्वथा सफलीकृतं महाधिवेशनमिति ते नितान्तं धन्यवादार्हाः। समितेः स्थायि-शान्तिपाठेन सह महाधिवेशनमिदं पूर्णतामगमत्।

महारासः—रात्रौ श्रीनिम्बार्काचार्याणां कृपया अतीव सरसो महारासो रासमण्डलिनेतृत्वे समभवत्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दण्डनेतृत्वं वाऽधिकरोति, अपि तु सर्वलोकाधिपत्यमप्यधिकर्तुं प्रभवतीति भगवान् मनुराह—

सैनापत्यं च राज्यं च दण्डनेतृत्वमेव च।
सर्वलोकाधिपत्यं च वेदशास्त्रविदर्हति ॥

(मनु० १२.१००)

आवश्यकता इयमेव यद् वयं तेषां ग्रन्थानां स्वाध्यायं कुर्याम, प्रचारं विदध्याम, गृहे गृहे संस्कृतस्य जागरणं सम्पादयेम प्राचीनगौरवं च प्राप्नुयाम। इतिहासः साक्षी किल, पुराकाले देशस्य राष्ट्रियजीवने प्रत्येकक्षेत्रे अस्माकं संस्कृतज्ञानां साम्राज्यमासीत्, सर्वत्र संस्कृतविपश्चितामेव पुरोयायित्वमासीत्। भवन्तो निश्चितं जानन्तु, यदा पुनर्भवतां हस्ते देशस्य शासनमायास्यति, यस्मिन् दिने संस्कृतज्ञा देशस्य नीतिनिर्धारकाः भविष्यन्ति, तद्दिन एव देशस्य भाग्यं परिवर्तेत, सर्वत्र सुख-शान्त्योश्च स्रोतस्विनी प्रवहेत्। सुखशान्त्योरेक एव मार्गो यत् देशे पुनर्वेदानुसारिसमाजव्यवस्था शासनव्यवस्था च भवेताम्। एतदर्थं संस्कृतज्ञैः स्वीयज्ञान-विज्ञानयोः, स्वीयस्वाध्याये, स्वकीय-चिन्तने निजविचारधारायां च मौलिक परिवर्तनं विधेयं स्यात्। अस्माभिः आत्मचिन्तनं विधेयम्—किमस्मासु कियन्तः देशनेतृत्व-समाजनेतृत्वयोः क्षमतां दधानाः सन्ति? अद्य स्वराज्य-प्राप्त्यनन्तरं देशस्य विविधासु प्रगतिषु जातासु अस्माकं संस्कृतज्ञानां कियान् सहयोगः, कियती चाभिरुचिः, कियती चास्मासु राष्ट्रियभावना? नूनं नात्र अस्माकं शास्त्राणां दोषः, न वाऽस्माकं साहित्यस्यैव वा कापि न्यूनता। अस्माकं पुराणेषु धर्मशास्त्रेषु च व्यावहारिकी सर्वा अपि वार्ता सम्यक् प्रदर्शिता। अद्यापि न्यायालयेषु विशेषतया दायभागनिर्णयाय अस्माकं स्मृतिसाहित्यमेव अनुष्ठीयमाणं दरीदृश्यते। एतदर्थमस्माकं 'मिताक्षरा' भारते प्रसिद्धा। व्यवहारस्य काऽपि वार्ता नास्ति ततो वञ्चिता। विश्वस्मै व्यावहारिकशिक्षाप्रदायकाः संस्कृतज्ञाः अद्य अव्यावहारिका व्यवह्रियन्ते इति कियती विडम्बना!

वस्तुतः पुरा सर्वेऽपि भारतीयाः द्विजाः संस्कृतभाषायां द्विजेतराः प्रमदाश्च प्राकृते व्यवहरन्तिस्म, सा प्राकृतभाषाऽपि संस्कृतस्यैव अपभ्रंशरूपा। भारते कीराङ्गनादयोऽपि संस्कृतभाषाभाषिण आसन्। आंग्लभाषाऽध्येतारः षष्ठ-सप्तमकक्षात एवांग्लभाषायां व्यवहरन्ति। परञ्च हन्त! संस्कृताध्ययनशीलेषु केचित्तु एकस्मिन् विषये आचार्यपरीक्षोत्तीर्णा अपि संस्कृते व्यवहर्तुं न शक्यन्ते, छात्राणान्तु कथैव का? अतः सर्वैः संस्कृते व्यवहर्तुं प्रयतितव्यम्। अन्यथा कथं समाजनेतृत्वं कथं वा देशनेतृत्वं लभ्येत, कथं वा समाजे सम्मानं प्राप्येत इति वयं शोचेम।

वेदशास्त्रविदर्हति इति वाक्यानुसारं वेदविदो सर्वलोकाधिपत्यं समुचितम्, तथापि कियन्तोऽधुना वयं वेदज्ञाः! अङ्गुलिगणनीयाः खलु वेदपारङ्गताः समग्रेऽपि भारते। प्राचीनसमये भगवन्तः श्रीनिम्बार्काचार्याः, श्रीशङ्कराचार्याः, श्रीरामानुजाचार्याः, श्रीरामानन्दाचार्याः, श्रीविष्णुस्वामिनः, श्रीमध्वाचार्याः, श्रीवल्लभाचार्याः, श्रीकृष्णचैतन्याचार्यादयः, एतेषां सर्वेषां परम्परानुगता महानुभावाश्च कीदृशाः विद्वद्वराः। मल्लिनाथ-कुल्लूकभट्टादीनां टीकाकाराणाञ्च विस्मापकं वैदुष्यं श्रूयते। तयोः कुल्लूकभट्टस्यैव एकं वचो हृदि धार्यम्—

मीमांसे बहु सेवितासि सुहृदस्तर्काः समस्ताः स्थ मे
वेदान्ताः परमात्मबोधगुरवो यूयं मयोपासिताः।
जाता व्याकरणानि बालसखिता युष्माभिरभ्यर्थये
प्राप्तोऽयं समयो मनूक्तविवृतौ साहाय्यमालम्ब्यताम् ॥

प्रदेशस्य प्रतिजनपदेभ्यः देशस्य अन्यान्यप्रदेशेभ्यश्च समागतानां विदुषां कृतेऽधिकं किमपि वक्तव्यं नावशिष्यते। अस्माभिः पुनः हनूमतो विस्मृतस्वीय-→

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

महाधिवेशने स्वीकृताः प्रस्तावाः

वृन्दावने मार्चमासस्य ३ दिनाङ्के सम्पन्ने प्रादेशिक-संस्कृतविद्यालयाध्यापक-समितेः पञ्चमाधिवेशने निम्नलिखिताः प्रस्तावाः सर्वसम्मत्या स्वीकृता अभवन्—

१. सम्मेलनमिदम् उत्तरप्रदेशशासनं साग्रहं निवेदयति यत् शीघ्रातिशीघ्रं तत् छात्रसंख्यानिर्वन्धं श्लथीकृत्य प्रदेशगतान् ८०३ संस्कृतविद्यालयान् वर्गीकरणयोजनान्तर्गतान् विदध्यात्, अस्मिश्च वित्तीये वर्षे महर्घताभृति-लाभत्रयीयोजनासहितं तृतीयवेतनायोगसंस्तुतं वेतनमानं कार्यान्वियीकुर्यात्। अन्यथा पञ्चसहस्रसङ्ख्यकाणां संस्कृतविद्यालयाध्यापकानां धैर्यबन्धो विशकलितो भवेद् यस्य समग्रमुत्तरदायित्वं शासनस्यैव स्यात्।

२. सम्मेलनमिदं सुदृढं सम्मनुते यत् तृतीयवेतनायोगस्य प्रतिवेदने विहिते संस्कृतविद्यालयानां वर्गीकरणे सर्वत्र संस्थापितः छात्रसंख्यानिर्वन्धः संस्कृतशिक्षायाः संरक्षण-प्रसारविधौ सर्वथा हानिकरः। कारणविशेषेण छात्रसंख्यानिर्बन्धोऽनिवार्यश्चेत् विकल्परूपेण पूर्वतनीययोः 'क'-'ख'वर्गयोः कृते पूर्वनिर्धारित-छात्रसंख्यानिर्बन्ध एव पर्याप्तः। तृतीय (ग) वर्गस्य नवीनवर्गीकरणे केवलं १५ १० वा छात्रसंख्याया निर्बन्ध एव स्थाप्येत। चतुर्थ (घ) वर्गस्य कृते पुनः कीदृशोऽपि छात्रसंख्यानिर्बन्धो न स्यात्। आधुनिकशिक्षालयेषु एकस्यापि छात्रस्याभावे उर्दूभाषाया ४६०० अध्यापकानां कृते व्ययं कुर्वतः समुदारस्य राज्यशासनस्य कृते राष्ट्रमूलसम्पत्तिरूपायाः संस्कृतभाषाया रक्षायै तुरीय (घ)-वर्गस्य सर्वथा छात्रसंख्यानिर्वन्धराहित्यं शासनस्य नैतिकं कर्तव्यम्।

३. सम्मेलनमिदं राज्यशासनं साग्रहमनुरुणद्धि यद् राज्यीय - विश्वविद्यालयान्तरसम्बद्धेभ्यो महाविद्यालयेभ्यः (डिग्री कालेज) इव वाराणसेय-संस्कृत-विश्वविद्यालयतो महाविद्यालयरूपेण मान्येभ्यः तत्सम्बद्धेभ्यः 'क'-'ख'वर्गीय - महाविद्यालयेभ्योऽपि विश्वविद्यालयानुदानायोग'द्वारा (यू० जी० सी०) दीयमानाः सर्वाः सुविधा अविलम्बं प्रदेयाः, अचिराच्च प्रस्तोतिता शतमुद्रात्मिका (१०० रु०) मासिकी तदर्थवृद्धिश्च एतेभ्योऽपि कृते प्रदेया।

४. सम्मेलनमिदं राज्यशासनं प्रार्थयते यद् अन्यशिक्षासंस्थाभ्य इव संस्कृतविद्यालयाध्यापकेभ्योऽपि निर्धारितवेतनस्य समग्रो भागः प्रतिमासं 'चेक'पत्रद्वारा प्रदेयः। त्रि-षष्ठ-नवमासैः एकवारं वा वर्षस्मिन् शासकीयानुदान - वितरणक्रमस्तेषां जीवनयात्रायै सर्वथाऽपर्याप्तः सिद्ध्यतीति।

५. सम्मेलनमिदं याचते यत् संस्कृतमद्यतनयुगोपयोगिनं विधातुं संस्कृतपरीक्षापाठ्यक्रमे समावेशितानाम् आधुनिकविषयाणामध्यापनाय प्रतिविषयं पृथक् पृथक् अध्यापकपदमविलम्बं स्वीक्रियेत। तेभ्योऽन्यूनं माध्यमिक-व्याख्यातृपदस्य (सीनियर प्रोफेसर) वेतनमानोऽविलम्बं स्वीक्रियेत, तेषामपि सर्वेषामेको विभागाध्यक्षो नियोजनीयः। सम्मेलनस्य दृढेयं मान्यता यदद्य प्रचलितव्यवस्थाविधौ संमुचिताः स्थायिनश्च शिक्षका न मिलन्ति, तत्समावेशनस्य मूलोद्देश्योऽपि विनश्यति।

६. सम्मेलनमिदं मनुते यद् देशेऽस्मिन् नैतिकतायाः अनुशासननिष्ठायाश्च जागरणाय समस्त-

---

→सामर्थ्यस्य समुद्बोधनमात्रं विधीयते। त्यागेनैके **अमृतत्वमानशुः** इति श्रुतिभगवत्याः सर्वथा विधेयैस्तत्र भवद्भिरिदानीं देववाण्याः समुद्धरणाय सुप्रचारप्रसाराय च बद्धपरिकरैस्तदर्थञ्चात्र भगवतो लीलाभूमौ प्रतिश्रुतैश्च भूयेत, तदा सर्वोऽपि देववाणीविषयकः खेदविषयः सर्वथा तिरोभूय सर्वत्र प्रकाशस्यैव साम्राज्यं वितन्येत। भगवन्तं श्रीसर्वेश्वरं सप्रश्रयं प्रार्थयामो यत्सोऽस्मान् सद्बुध्याऽनया योजयतु।

सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।
सवे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग्भवेत्॥

ॐ शान्तिः शान्तिः शान्तिः!

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृत-संस्कृतज्ञ-संरक्षणं राष्ट्रियं कर्तव्यम्

—अध्यक्षाणां श्री श्रीजी महाराज नामभिभाषणम्—

संस्कृतभाषाया महत्त्वम् :

•विश्वस्मिन् वर्तमानासु सर्वासु भाषासु संस्कृतभाषैव ज्येष्ठा श्रेष्ठा चेति न तिरोहितम्। यदि गाम्भीर्येण परिशीलनं विधीयेत तर्हि एतदपि निश्चप्रचमुद्घोषयितुं शक्यते यद्वर्तमानजगति प्रयोगपथे प्रवर्तमानासु सर्वास्वेव भाषासु संस्कृतस्य व्यापकता प्रभावश्च दरीदृश्यत एव। अस्या विशालत्वमाकलय्य कियन्तो वैदेशिका विपश्चितः 'सर विलियम जॉन्स, मैक्समूलर, मैकडॉनल, कीथ, प्रभृतयो मन्त्रमुग्धा अभवन्। वस्तुतो व्याकरण-कोषदृष्ट्या सर्वासु भाषासु इयमेव आढ्यतमेति सर्वैरेव स्वीक्रियते। एकस्यैव अर्थस्य कृते यावन्तः पर्यायशब्दा अस्यामुपलभ्यन्ते, तावन्तः भाषान्तरे कल्पयितुमपि न पार्यन्ते।

आर्यसंस्कृतेः सकलां सम्पदमात्मनि अन्तर्भाव्य विराजमाना संस्कृतभाषा भारतीयात्मनो गौरवसंरक्षिका वरीवर्ति। सकलजगदुपजीव्यभूतानां ज्ञानविज्ञाननिधीनां वेदानाम्, निखिलदर्शनजगत्प्रतिष्ठितानामुपनिषदाम्, ब्रह्मसूत्राणाम्, दर्शनषट्कस्य, स्मृतीनां पुराणानां चेयमेव भाषा परमाधारभूता। संस्कृतवाङ्मयस्य लोकोत्तरेण गरिम्णा सकलं जगदाकृष्टम्। इदानीं प्रायः सर्वेष्वेव पाश्चात्यविश्वविद्यालयेषु संस्कृतविभागा द्रष्टुं पार्यन्ते। रूस-चेकोस्लोवाकिया-बल्गेरिया-हङ्गेरी-प्रभृतिषु साम्यवादावलम्बिषु देशेष्वपि संस्कृतविभागमहिता विश्वविद्यालयाः समुपलभ्यन्ते। क्वचित् भाषादृष्ट्या, क्वचिद् दर्शनदृष्ट्या, क्वचिद् वैदिकादर्शदृष्ट्या संस्कृतगरिमा स्वीक्रियते अनुशील्यते च। संस्कृतभाषाया विश्वव्यापकं प्रभावं निभालयतां प्रबुद्धमतीनां विदुषामिदं नानवगतं यदिदानीं विभिन्नैर्वादैः, राजनीतिकपद्धतिभिः, साम्प्रदायिककलहैश्च विषादविषयीकृतेऽस्मिन् कटुत्वात् जर्जरिते जगज्जीवने शान्तेः, सौजन्यस्य, सद्भावस्य च सुधां निषेक्तुमियं सुरभारती एव सामर्थ्यं बिभर्ति। विश्वमानववन्दनीयानां जगद्धितैकधनानां तपोधनानामस्मत्पूर्वजानां प्रातःस्मरणीयानामृषीणां जीवनसन्देशवाहिका शान्तिपीयूषवर्षिणी सुरगीरेव अनादिकालाद् भारतस्य गौरवास्पदत्वं जगति प्रकाशयन्ती इदानीमपि विश्वस्मिन् आर्यसंस्कृतेर्वैजयन्तीमुच्छ्राययति। अस्याः संरक्षणसंवर्धनसम्बन्धेऽस्माभिर्भारतीयैः सततं जागरूकैर्भाव्यम्। भारतीयानां कृते स्वकीयसंस्कृतेर्निदानभूतायाः सुरभारत्याः संरक्षणं संवर्धनञ्च प्रथमं पवित्रतमं कर्तव्यम्।

परमदुःखास्पदीभूतमेतद् यदधुना भौतिकोन्नतिमात्रप्रणयिभिः स्वयं भारतीयैरेव इयमुपेक्ष्यमाणा वर्तते। कतिपयैर्वैदेशिककूटनीतिवशंवदैः पण्डितम्मन्यैः संस्कृतभाषा 'मृतभाषा' इत्यपि भण्यते। परं विचा-

---

शासनस्य अनुपेक्ष्यं कर्तव्यं यत्तदचिरात् स्वतन्त्रसंस्कृतनिदेशालय - स्थापनेन संस्कृतशिक्षया सह जायमानं शोषणमन्यायञ्च दूरीकुर्यात्। वाराणसेय - संस्कृतविश्वविद्यालयस्य पूर्वतनेऽधिष्ठानभूते संस्थाने राजकीय - संस्कृतमहाविद्यालये निर्धारितानि चत्वारि पदानि (प्राचार्यः, प्रस्तोता, प्रथमाध्यापकः पुस्तकालयाध्यक्षश्चेति) अद्यापि रिक्तान्येव। तेषामेव धनमस्मिन् स्वतन्त्र - संस्कृतशिक्षानिदेशालय - सङ्घट्टने विनियोजयितुं शक्यते। तदर्थं पृथक् धनमपि नापेक्षितम्। अतोऽत्रापि राज्यशासनं दृढमवधास्यतीति वयं दृढमाशास्महे। •

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रणीयं भवत्येतद् यद् यस्या भाषायाः कमपि सन्देश-लवमङ्गीकृत्य मानवोऽमरत्वमासादयति, यस्या उपदेशकणिकामास्वाद्य कोऽपि जीवनसाधको मृत्वाऽपि जीवितुं शक्नोति, यस्याः सर्वोपजीव्यत्वं विश्वभाषा-जगता स्वीकृतम्, ताममरभाषां "मृतभाषा" इति व्यपदिशतां मिथ्यापण्डितमानिनां दुर्विचारः केन अजडेनाङ्गीकर्तुं पार्येत ? अतोऽस्मदादिभिः स्वात्मानमार्यसंस्कृतेरवलम्बित्वेन भारतीयत्वेन चाभिमन्यमानैरस्यां दिशि सर्वदैव जागरितैर्भवितव्यम् । विद्वद्भिः स्वस्या विद्वत्तायाः, धनवद्भिः स्वस्य धनस्य, बलवद्भिश्च स्वस्य बलस्य सदुपयोगं विधाय भारत-सर्वस्वभूताया आत्मविद्यायाः संरक्षणाय महता संरंभेण चतुरस्रः प्रयत्नो विधेयः । संस्कृतविद्या-संरक्षण-परेण सत्प्रयत्नेनैवास्माकं जीवनं याथार्थ्येन जीवन-व्यपदेशभाजनं भविष्यति ।

अद्य आधुनिकप्रणाल्या परिचालितेषु विश्वविद्यालयेषु, तत्सम्बद्धमहाविद्यालयेषु तथा माध्यमिक-विद्यालयेषु अहरहः छात्राध्यापकयोः, अध्यापक-व्यवस्थापकयोः यः पारस्परिककलहः प्रतिदिन वृत्तपत्रेषु श्रूयते, तमाकर्ण्य कस्य नाम भारतीय-संस्कृति श्रद्धानस्य चित्तं नोद्विजेत ? अस्मिन् देशे पुरा—

सह नाववतु, सह नौ भुनक्तु, सह वीर्यं करवावहै ।
तेजस्विनावधीतमस्तु, मा विद्विषावहै ॥

इत्यादिरीत्या गुरुशिष्ययोः प्रात्यहिकी प्रार्थना भवतिस्म, तत्रैव पदे-पदे गुरुणामनादरः, प्राचार्याणां गृहावरोधश्च (घेराव) नितान्तं खिन्नतां प्रापयतः । परं प्रमोदस्य विषयः यद्यापि प्राचीनपरिपाटीमनुसृत्य सञ्चलत्सु संस्कृतविद्यालयेषु महाविद्यालयेषु च कुत्रापि तादृशी घटना अदृष्टचरा अश्रुतपूर्वा चापि । एतेषु विद्यालयेषु महाविद्यालयेषु च अद्यापि—

गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वरः ।
गुरुः साक्षात् परं ब्रह्म तस्मै श्रीगुरुवे नमः ॥
अज्ञानतिमिरान्धस्य ज्ञानाञ्जन-शलाकया ।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरुवे नमः ॥

इत्यादि गुरुमाहात्म्यसूचकानि पद्यानि सश्रद्धं छात्रैर्गीयमानानि श्रूयन्ते । अस्यापि सकलं श्रेयः श्रीमतामेव संस्कृतविदुषाम् ।

संस्कृतभाषाप्रचारस्य आवश्यकत्वम् :

भारतीयसंस्कृतेः स्वरूपपरिज्ञानार्थं, भारतीय-संस्कृतेः संरक्षणाय प्राचीनभारतीयेतिहासावबोधाय, समस्तभारतीय - भाषापरिपोषणाय भाषावलम्बि-प्रान्तीय-कलहोपशमनाय, देशे भावात्मकैकता-सम्पादनाय, विश्वबन्धुत्व-भावानायाः संवर्धनाय च संस्कृतं नितान्तमावश्यकमिति संसारो जानाति । देशस्य सर्वेऽप्युत्तरदायिनो नेतारो जानन्ति, परं हन्त तथापि स्वतन्त्रेऽपि भारते संस्कृतं स्वानुरूपं पदं, प्रतिष्ठां, गौरवं च नालभत । अद्यापि तदुपासकाः विद्वांसो विषीदन्तीति शासनस्य कृते लज्जायाः विषयः ! समाजस्य परमादरणीया विद्वांसः भवन्तः अस्या एव अमूल्यनिधेः संस्कृतभाषायाः संरक्षकाः । यावदयममूल्यनिधिः भारते सुरक्षितस्तावदेव भारतस्य भारतत्वम्, यदाऽयं निधिः, विनश्येत्, यदेयं सुरभारती विलुप्येत, तदा भारतीयतायाः का कथा, मानवता-नामकमपि किमपि वस्तु जगति दृष्टिगोचरं न स्यादिति विदुषां विनिश्चयः ।

संसारे किमप्येवविधं ज्ञान-विज्ञानं नास्ति यदस्माकं संस्कृतसाहित्ये न भवेत् ।

यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित् ।

इयं गर्वोक्तिरस्माकमेकस्य पुस्तकस्य **महाभारतस्य** । वेदस्य तु कथैव का ? स चास्माकमशेषज्ञान-विज्ञानानां भाण्डागार एव यत्र न केवलं मानवजीवन-सम्बद्धमशेषं ज्ञान विज्ञानजातमुपवर्णितम्, अपि तु जीवमात्रसम्बद्धमखिलं ज्ञातव्यं सूक्ष्मातिसूक्ष्मरूपेण संवर्णितम् । अत एव वेदज्ञो न केवलं सेनापत्यं, राज्यं,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारतीयभाषाणाञ्च शब्दसम्पत्तये शिक्षायाः प्रत्येकस्मिस्तरे सर्वभाषाजनन्याः संस्कृतभाषायाः तदादर्शप्रेरकस्य वाङ्मयस्य चापि शिक्षाऽत्यावश्यकी। अतः सम्मेलनमिदं याचते यत् प्राथमिकशिक्षात एव संस्कृतमनिवार्यं विधेयम्, प्राथमिकविद्यालयेषु च एकैकः संस्कृतशिक्षकोऽनिवार्यतो नियुज्येत।

७. सम्मेलनमिदं राज्यशासनं साग्रहं याचते यद् अन्यशिक्षेव संस्कृतशिक्षासमुत्थानायापि स्वतन्त्रः संस्कृतशिक्षानिदेशालयः शीघ्रातिशीघ्रं स्थापयतु। केन्द्रीय'संस्कृतायोग'द्वारा चिरात् एतद्विषयकसंस्तुतौ सत्यामपि अद्यापि संस्कृतविद्यामातृगृहे उत्तरप्रदेशे अस्याभावो महद् दौर्भाग्यम्, यदा च राजस्थानसदृशमरुभूमेरपि शासनेन नैकवर्षैः पूर्वमेव एतत्सङ्घट्टने रसिकत्वं स्फुटं प्रादर्शितम्।

सम्मेलनमिदं शासनमिदमपि हितमुपदिशति यत् स्वतन्त्र-संस्कृतनिदेशालयस्थापनस्य अन्तरिमे काले संस्कृतोपशिक्षानिदेशकान् विषयेऽत्र सर्वथाऽधिकृत्य तेषां साक्षादेव शिक्षासचिवैः सम्पर्कस्य व्यवस्था विधीयेत।

८. सम्मेलनमिदम् उत्तरप्रदेशशासनं साग्रहमनुरुणद्धि यत् संस्कृतस्य विकास-प्रसारार्थं शासकांश्च संस्कृतप्रश्नैः अशेषतः परिचाययितुं स्वातन्त्र्यलाभस्य प्राथमिकेषु वर्षेषु अनुगृह्यमाणां महामहिम-राज्यपालद्वारा विधानपरिषदः कृते मनोनीतयोः विशिष्टसंस्कृतविदुषोः सदस्यताविषयिणीं पद्धतिं पुनस्तत् नवनिर्वाचनेनानेन सहैव परिचालयत्विति।

९. सम्मेलनमिदमपि याचते यत् शासनं माध्यमिकशिक्षकाणामिव संस्कृतविद्यालयाध्यापकेभ्योऽपि अन्यूनमेकं निर्वाचितपदं सुरक्षितं विदध्यात्, येन स निर्वाचितः सुरक्षितः प्रतिनिधिः संस्कृताध्यापकानां समस्याभिः शासनं यथासमये परिचाययतु।

१०. सम्मेलनमिदं राज्यशासनं प्रार्थयते यत् संस्कृतविद्यालयानां सञ्चालनाय शिक्षासंहितानुसारं प्रबन्धसमितेः संघटनमनिवार्यं घोषयेत्। सम्बद्धाधिकारितस्तस्याः सम्पुष्टेः, रिक्तस्य पदस्य च मासाभ्यन्तरे प्रपूर्तेश्च निर्बन्धो विधीयेत।

११. सम्मेलनमिदं भारतशासनम्, उत्तरप्रदेशराज्यशासनञ्च साग्रहमनुरुणद्धि यत् संस्कृतशिक्षामाराध्य कार्यक्षेत्रे प्रविविक्षूणां स्नातकानां कृते समकक्ष - समस्तपरीक्षानुमत - कार्यक्षेत्रेषु अनिर्बाध-प्रवेशस्य सौविध्येन सह तेषां कृते विशेषस्थानान्यपि सुरक्षितानि विधातव्यानि।

सम्मेलनमिदं मनुते यत् जीवनयात्रायाः सुदृढसाधनानामभावात् आधुनिकशिक्षादीक्षितैश्च सह स्पर्धया संस्कृताध्यायिनां छात्राणां संख्या क्रमशो ह्रासमुपगच्छति यद् देशस्य सांस्कृतिक-विकासोत्थानदृष्ट्या महान् अभिशापो वर्तते।

१२. सम्मेलनमिदं भारतशासनं प्रार्थयते यत् चलचित्र-संशोधनसमितौ संस्कृतस्य एक आचारनिष्ठो विद्वान् सदस्यत्वेन नियुज्येत। यतो हि अद्य चलचित्रेषु यावती उच्छृङ्खलता, भारतीयसंस्कृतिविपरीतप्रदर्शनानि च जायन्ते, तैः देशस्य गौरवः स्वास्थ्यं सम्पत्तिश्च भूयसा बाध्यते। संस्कृतविद्वान् नूनमेव तत्र स्थित्वाऽत्र नियन्त्रणे समुल्लेख्यं सहयोगं दातुं प्रभवेदिति।

१३. सम्मेलनमिदं वाराणसेय-संस्कृत-विश्वविद्यालयस्य उपकुलपतिमहोदयान् प्रार्थयते यत् ते स्वीयसंस्थया सम्बद्धेभ्यः प्रदेशगतेभ्यः संस्कृत-विद्यालय-महाविद्यालयेभ्यः 'शिक्षासंहिता'याः (एज्यूकेशन कोड), उत्तरप्रदेशस्य ७३ त्रिसप्तति - धारानुसारं शासनपक्षतो न्यायप्राप्तये सत्क्रिया भवन्तु।

७३ त्रिसप्ततितमधारायामुक्तमस्ति यत् "२२ मार्च १९५८ तः पूर्वं यावत् संस्कृताध्ययन-समिति द्वारा सञ्चाल्यमानाः संस्कृत-विद्यालय-महाविद्यालयाः उक्ततिथितो वाराणसेय-संस्कृत-विश्वविद्यालयतः शासिता भवेयुः। संस्कृतपाठशालाभ्यो या आर्थिकी सहायता पूर्वम् 'संस्कृताध्ययन-समितेः सहायतानुदानसमित्याः संस्तुत्या दीयते स्म, सम्प्रति तथैव देया स्यात् यथा कस्यापि अन्यस्य विश्वविद्यालयस्य सम्बद्धेभ्यो विद्यालयेभ्यः सुसम्बद्धेभ्यो महाविद्यालयेभ्यो वा दीयते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुस्तकालय
गुरुकुल कांगड़ी विश्वविद्यालय
हरिद्वार

पञ्जीकृत-संख्या—एल० १८९७

सूर्योदयस्य नियमाः

पत्र-संहिता

१. 'सूर्योदय'-मासिकपत्रस्य वार्षिकं शुल्कं रूप्यकपञ्चकं वर्तते। धनादेश (मनीआर्डर) द्वारा तत्प्रेषणीयम्। वी० पी० द्वारा प्रेषणे ५० पणाः पृथक् प्रदेयाः स्युः।

२. आवर्षं गम्भीरसाहित्यसमन्विताः १२ अङ्काः प्रकाश्यन्ते। नवीनग्राहकत्वं प्रथमाङ्कतः (जनवरी-अङ्कतः) एव स्वीक्रियते। माध्यमिकेन केनापि अङ्केन ग्राहकत्वं न स्वीक्रियेत।

३. आंग्लमासस्य २६ दिनाङ्के 'सूर्योदयः' प्रकाशितो भवति। वारद्वयं संशोध्य ग्राहकेभ्यः सः प्रेष्यते। अतस्तदलाभे पूर्वं स्वकीय-पत्रालयतस्तदनागमनस्य निर्णयं कृत्वैव १० दिनाङ्कानन्तरं वयं सूचनीयाः।

४. लेख-कवितादीनां भाषा संयता, सरला, शुद्धा च भाव्या। प्रकाशनीय-लेखादीनां स्पष्टाक्षरैः कर्गजस्यैकपृष्ठे एव लेखनमावश्यकम्। अस्वीकृता लेखादयः पोस्टविभागीय-चिटिका (टिकट) प्राप्त्यनन्तरं परावर्तयितुं शक्ष्यन्ते।

५. सम्पादकीय-विषयसम्बद्धे पत्र-व्यवहारे 'सम्पादकः' इति, व्यवस्थाविभागीय-पत्रव्यवहारे च 'व्यवस्थापकः' इति च स्पष्टं लेखनीयम्। तेन उत्तरलाभे मुधा विलम्बो न भवेत्।

विज्ञापन-शुल्कम्

सूर्योदये सुरुचिपूर्णं विज्ञापनं प्रकाश्यते। एकवारं तस्य प्रकाशनस्य शुल्कक्रमश्च अधोलिखितोऽस्ति। सार्वकालिकस्य दीर्घकालिकस्य च विज्ञापनस्य कृते विशेष-सौविध्याय पत्र-व्यवहारः कार्यः।

साधारणस्य प्रतिपृष्ठस्य	१००) रु०	साधारणस्य प्रत्यर्धपृष्ठस्य	६०) रु०
साधारणस्य चतुर्थांशपृष्ठस्य	३५) रु०	आवरण-चतुर्थपृष्ठस्य	२००) रु०
आवरण-द्वितीय-तृतीयपृष्ठयोः	१५०) रु०	प्रथमावरणपृष्ठे विज्ञापनं न स्वीक्रियेत।	

—सङ्केतः—

'सूर्योदय'-कार्यालयः, भारतधर्म-महामण्डलम्, जगतगंज, वाराणसी।

सम्पादकः, प्रकाशकः, मुद्रकश्च—गोविन्द नरहरि वैजापुरकरः,
श्रीभारतधर्ममहामण्डलम्, जगतगंज, वाराणसी कैण्ट।
मुद्रणस्थानम्—[illegible] प्रेस, सी० के० २६/२०, वाराणसी।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुरुकुल कांगड़ी विश्वविद्यालय,
हरिद्वार

सूर्योदयः

भारतधर्ममहामण्डलस्य
मासिकं मुखपत्रम्

वर्षम् ५०

अङ्कः ४

सम्पादकः
गो० न० वैजापुरकरः

अप्रैल
१९७४

वार्षिक-मूल्यम्
५) रूप्यकाणि

प्रत्यङ्क-मूल्यम्
अर्धं रूप्यकम्

देश-प्रार्थना !

प्रार्थयामो देश भारत हे देहि पूर्वस्मिन् स्वरूपे दर्शनम् !
यत्र स्युर्दुग्धस्य नद्यः सर्वतो मोदयुक्तं स्यत् समेषां जीवनम् !!

बन्धुवत् स्युर्यत्र सर्वे प्राणिनः स्नेहतः स्यात्सर्वमप्यनुशासनम् ।
यत्र भक्ति ज्ञान-सत्कर्मस्थितिर्यत्र शौर्यं दुष्कृतानां नाशनम् ॥ १ ॥
कुत्र गोपालस्त्वदीयो वर्तते ? श्रूयते किं तेन नहि गोक्रन्दनम्
रावणारिः किं न पश्यति साम्प्रतं दुर्जनानां कर्म परमं दारुणम् ।
नेह सौहार्दं न सत्यं शान्तिदं स्वार्थवृत्तेरेव भूमौ शासनम् ॥ २ ॥
संसृतौ घोरातिभीतेभ्यस्त्वया शक्तिशालिन् दत्तमभयं सर्वदा
दुर्मदान्धा लोकपीडाकारकास्त्वत्समक्षं संस्थिता युद्धे कदा ।
जम्बुकास्तिष्ठन्ति किं निकटे यदा श्रूयते सिंहस्य भीमं गर्जनम् ॥ ३ ॥
नाद्य तुष्टि - वैभवै - र्भोगैस्तथा नापि विज्ञानस्य यन्त्रैर्लभ्यते
कीदृशीयं भौतिकी सम्पन्नता मानसे शान्तिर्न चेदिह विद्यते ।
आत्मविज्ञानं त्वदीयं वाञ्छितं यत्समस्तानां सुखानां साधनम् ॥ ४ ॥

—डॉ० शिवशरण शर्मा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ग्राहका विनिवेद्यन्ते

यत् 'सूर्योदय'स्य पञ्चाशत्तमवर्षस्य वार्षिकं शुल्कमद्यावधि नैकैः प्रत्नग्राहकैर्न प्रेषितम् । अतस्तैः पुस्तक-प्राप्तेः समकालमेव पञ्चमुद्रात्मकं वार्षिकं शुल्कं धनादेश (मनिआर्डर) द्वारा प्रेषणीयम् । नव्योऽपि एकैको ग्राहको विधेयः ।

एवं नैके धनिनोऽपि ग्राहकाः व्यवसाय-संस्थानानि शासनानि च सर्वेभ्यो मुक्तहस्तं स्वव्यापार-विज्ञापनानि प्रददति । परं 'सूर्योदयः' तै कदापि न स्मर्यते । सूर्योदये सुरुचिपूर्णं विज्ञापनं प्रकाशयितुमस्माभि-रूप क्रान्तमस्ति । अतस्तेऽमुमपि कृपयाऽनया अनुगृह्णन्त्विति ।—व्यवस्थापकस्य

अ नु क्र मः

प्रपाठकः	पत्रपुटम्	परिवेषकः
भज, नरसिंह-मद्वयरूपिणम्	७३	श्री ब्रह्मलीनाः श्रीधरस्वामिनः
श्रीज्ञानानन्द-चरितम्	७४	स्वर्गीयाः श्री विन्ध्येश्वरीप्रसाद शास्त्रिणः
संस्कृत-परीक्षाः, परीक्षकाः, परीक्ष्याश्च	७५	सम्पादकीयम्
गङ्गा गौरवम्	७७	श्री विश्वनाथ केशव छत्रे
कूर्माचल (नैनीताल) जनपद-वर्णनम्	७८	श्री डॉ० ब्रह्मानन्द त्रिपाठी
मुकुन्दमाला	८१	श्री डॉ० कृष्णस्वामी अयङ्गारः
मानस-भारती	८६	श्री जनार्दन गङ्गाधर रटाटे
(१) पूर्णाहुतिः (नाटकम्)	८७	श्री कृष्णप्रसाद घिमिरे
(२) सूर्यनमस्कारो व्यायामः	९१	श्री डॉ० नरेश झा शास्त्री
(३) रूप-दीपिका	९३	श्री रामानन्द द्विवेदी
(१) रेडियो-दूतम् (खण्डकाव्यम्)	९५	श्री पद्मानन्द चतुर्वेदी

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूर्योदयः

रागद्वेषनिशाटनं विधुरयन् मोहं तमो नाशयन्,
तामिस्रं जडवादकैरवकुलं ज्ञानत्विषा ग्लापयन्।
विद्वत्कोकमशोकयन् नवसुधीरोलम्बमुन्मीलयन्,
सञ्जातः सुमनोमनो मधुरयन् सर्वत्र सूर्योदयः॥

५० वर्षे] वाराणसी, वैशाखः, २०३० वै० : अप्रैल, १९७४ ई० [४ अङ्कः

भज, नरसिंहमद्वयरूपिणम्!

१. भवनाशनैकसमुद्यमं करुणाकरं सगुणालयं
निजभक्ततारण - रक्षणाय हिरण्यकश्यपघातिनम्।
भवमोहदारण - कामनाशन - दुःखदारण - हेतुकं
भजपावनं सुखसागरं नरसिंहमद्वयरूपिणम्॥

२. गुरुसार्वभौममघान्तकं मुनिसंस्तुतं सुरसेवितम्,
अतिशान्तिवारिधिमप्रमेयमनामयं श्रितरक्षणम्।
भवमोक्षदं बहुशोभनं मुखपङ्कजं निजशान्तिदम्॥ भज ''॥

३. निजरूपकं विततं शिवं सुविदर्शनाय हि तत्क्षणम्,
अतिभक्तवत्सलरूपिणं किल दारुतः सुसमागतम्।
अविनाशिनं निजतेजसं शुभकारकं बलरूपिणम्॥ भज ''॥

४. अविकारिणं मधुभाषिणं भवतापहारणकोविदं
सुजनैः सुकामितदायिनं निजभक्तहृत्सुविराजितम्।
अतिवीरधीर - पराक्रमोत्कटरूपिणं परमेश्वरम्॥ भज ''॥

५. जगतोऽस्य कारणमेव सच्चिदनन्तसौख्यमखण्डितं
सुविधायि-मङ्गलविग्रहं तमसः परं सुमहोज्ज्वलम्।
निजरूपमित्यतिसुन्दरं खलु संविभाव्य हृदि स्थितम्॥ भज ''॥

६. पञ्चरत्नात्मकं स्तोत्रं नरसिंहस्य पावनम्।
ये पठन्ति मुदा भक्त्या जीवन्मुक्ता भवन्ति ते॥ भज ''॥

--समर्थानुगृहीतमहात्मानो ब्रह्मलीनाः श्री श्रीधरस्वामिपादाः—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीमहर्षि-ज्ञानानन्दचरितं महाकाव्यम्

— स्वर्गीयाः श्री विन्ध्येश्वरीप्रसाद शास्त्रिणः —

(विंशे सर्गे)

९१. आपातरम्या सदुदर्कशून्या विनाशयन्ती परधर्ममुग्रा ।
आमेरिकै-र्योरपदेशजैश्च प्रचार्यते सम्प्रति कूटशिक्षा ॥

९२. पुरातनो रोमनजातिजातो विख्यातनामा सिसिरो विपश्चित् ।
स आङ्ग्लवंशोद्भव-मेकले च तयोस्तनूजा किल कूटशिक्षा ॥

९३. छलं तथा छद्म समाश्रयद्भिर्विनाशयद्भिः परधर्मरूपम् ।
अटाटया धर्ममिषेण नित्यं चरद्भिरन्यैः परिपाल्यते सा ॥

९४. कोटिं व्ययीकृत्य सुवर्णराशिं सुसज्जिताऽन्यैः समलङ्कृता च ।
सा ह्येशियायां भुवि भारते च प्रयुज्यते हा विषकन्यकेव ॥

९५. अजायताऽत्यन्तभयावहं यत् पाश्चात्त्यदेशान् सकलान् ग्रसिष्णु ।
महत्तरं रौद्रमतीव युद्धं धरा समस्तापि यतश्चकम्पे ॥

९६. ततस्तु धर्मं समुपेक्ष्यमाणा तत्रत्यशिक्षाप्रगति - र्नितान्तम् ।
निरङ्कुशत्वं क्रमशो भजन्ती बभूव सांसारिकभीतिहेतुः ॥

९७. समाजबन्धः शिथिलीकृतोऽभूल्ललङ्घ सीमानमपि त्रपायाः ।
उच्छृङ्खलत्वं च जगाम लोकस्तत्कारणं शिक्षणमेव नान्यत् ॥

९८. प्रायेण पाश्चात्त्यनरैः स्वधर्मः प्राणप्रियोऽप्यद्य निराकृतोऽस्ति ।
क्रूरां तदाचाररतिं निभाल्य चेखिद्यते साधुजनान्तरात्मा ॥

९९. यैरादृतो नास्ति च कोऽपि धर्मस्ते नास्तिकाः सभ्यशिरोमणीन्द्राः ।
सदोविशेषेषु नराश्च नार्यो निर्वाससो हन्त मिथश्चरन्ति ॥

१००. धर्मोऽस्ति सर्वाभ्युदयस्य मूलमेनं निराकृत्य न कापि जातिः ।
प्राप्तुं समर्था भुवने कदापि समुन्नतिं वा सुखसम्पदं वा ॥

प्राच्यप्रतीच्यगुणदोषविवेकयुक्तं शिक्षास्वरूपमधिगम्य महर्षिवर्यात् ।
मोमुद्यमानमनसः सुधियो विनम्राः प्राणम्य योगिनममुं स्वगृहाणि जग्मुः ॥ १०१ ॥

॥ इति श्रीज्ञानानन्दचरिते महाकाव्ये विंशः सर्गः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकीयम्

संस्कृत-परीक्षाः, परीक्षकाः परीक्ष्याश्च

मासोऽयमावर्षं नाममात्रेण यथार्थतः सर्मजितस्य संस्कृतवाङ्मयज्ञानस्य इयत्तायाः परीक्षणकालः। मासस्यास्य व्याप्तिः एतत्पूर्वमासं पश्चात्तनं वा मासं कुत्रकुत्रचन व्याप्नोति। अत्रान्तरे नैकाः संस्कृतपरीक्षा-संस्थाः छात्राणां वार्षिकं सामूहिकं परीक्षणं समाचरन्ति, स्वीयं पदवी-प्रमाणपत्र-दानव्यापारं सुखेन समुज्जीवयन्ति।

आसीत् सुदूरपूर्वे काले देशेऽत्र गुरुकुलशिक्षण-व्यवस्था। उपनीय बटुं तदभिभावको निकटतमे गुरुकुले समानीय गुरवे ज्ञानाञ्जनशलाकया अज्ञान-तिमिरान्धं बटोश्चक्षुरुन्मीलयितुम् उपाध्यायं समर्पयति स्म। स च तस्मै द्वादशवर्षाणि यावत् यथाविधि यथाचारं सपरिश्रमं सरहस्यं वेदशास्त्राणि संपाठ्य पर्वविशेषे विद्वत्सङ्गीतेः पुरतस्तमुपस्थापयति स्म। समवेता विद्वांसश्च तदधीतं सर्वमपि ज्ञानं शलाका-पद्धत्या मौखिक्ययै परीक्षया प्रमापयन्ति स्म। तत उपाध्यायस्तस्मै पदवीं समर्प्य ससम्मानं प्रजातन्तो-रव्यवच्छेदाय समावर्तयति स्म। परीक्षायां ग्रन्थपृष्ठानां सम्मर्दो नासीत्। छात्रा अपि आप्रबोधात् सुप्तेः पर्यन्तं गुरोराज्ञापालने क्रीतदासतोऽपि सातिशायिनो भवन्ति स्म। सर्वमपि स्वीयं छात्रजीवनं सर्वथा स्वावलम्बनमुखेन कठोरश्रमसिञ्चितं विधाय यापयन्ति स्म। गुरुगृहवासे ज्ञानेन सहैव आदर्शजीवनो-पायभूता नैके गुणास्तेषु संक्रामन्ति स्म। इत्थं यथार्थत-स्ते छात्राः भाविराष्ट्रनिर्मातॄणां गुणान् स्वात्मनि आधातुं प्रभवन्ति स्म।

किन्तु वैदेशिकाङ्ग्लशासन-दासताभिशापवशात् सर्वाऽपि व्यवस्थेयं क्रमशो ह्रासपथं गच्छन्ती अद्य स्वतन्त्रे भारते तेनाभिशापेन सर्वात्मना समाक्रान्ता प्रायो नामशेषतां गता। अद्य अध्ययनमपि विशुद्धया व्यवसायरूपतां गतं दृश्यते। व्यवसायोऽपि स निम्नतमो वञ्चक - पाटच्चरादि - व्यवसायकल्पः सर्वस्य राष्ट्रस्य कृते भीषणतमसमस्यारूपतां परिणम्यमानोऽद्य वर्तते। सर्वाऽपि ज्ञानदान-व्यवस्था शासनस्य अनुत्तरदायिनीनां तथाकथित-स्वायत्तशासनसंस्थानामधीना संवृत्ता। वैदेशिका-ङ्ग्लशासक-कूटनीतिसमनुप्राणितां तथाकथितप्रगति-शीलता - समालिङ्गितां शिक्षापद्धतिमेव स्वातन्त्र्यस्य सप्तविंशतिवर्षेषु अस्मद्भागधेयनिर्मातारस्तथाकथित-लोकतन्त्रशासन-कर्णधाराः प्रचारयामासुः। तस्या एव आत्मघातकरं भस्मासुरायितं फलमद्य भुज्यते सर्वैर्भारतीयैरिति महद् दौर्भाग्यास्पदं वृत्तम्।

विलुप्ताऽद्य सा लौकिक-पारलौकिकसमुत्कर्ष-साधिका गुरुकुल-शिक्षापद्धतिः। तत्स्थाने विविधनाग-रिकव्यवसायसङ्कुला स्कूल-कालेज-विश्वविद्यालया-धीना लौकिकसमुत्कर्षमात्रोद्देश्या तथाकथितव्याव-हारिकी शिक्षापद्धतिः पदं चक्रे। तत्परिचालकानां वीत-रागाणां सदाचार-करुणामूर्तीनां महर्षिवर्याणां स्थाने सर्वथा लौकिकस्वार्थलोलुपा आचारविहीनाः मौखिक-महादर्शवावदूका - स्तथाकथिता नेतारः संस्थापिताः शासनेन। साक्षात्परम्परया वा सर्वापि शिक्षा शासनेन स्वायत्तीकृता। सुस्पष्टमेतद् यत्साम्प्रतिकं शासनमपि न धर्मनियन्त्रितं पारलौकिकाभ्युदयसाधनोद्देश्यकं प्राचीनं भारतीय शासनम्। सत्येवं वैदेशिकसिद्धान्त-प्रतिष्ठिते सर्वथा लौकिकाभ्युदयैकलक्ष्ये शासने लौकिकस्वार्थपरिपन्थिनाम् एकान्ततो मानवाभ्युदय-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कारिणां तत्वानां कियन्मूल्यं स्यात्? फलतस्तथा-विधशासनस्य दोषास्तन्नियन्त्रितायां शिक्षाव्यवस्थाया-मपि आनुषङ्गिका एव भवेयुः। तत्रापि शिक्षाक्रमेऽपि साम्प्रतिक - भौतिकसमुत्कर्षसाधकस्यैव ज्ञानस्य आधिक्यात् प्राचीन - संस्कृतिपरिपोषकस्य पारलौकिकाभ्युदयसाधकस्य संस्कृतवाङ्मयज्ञानस्य प्रायोऽपवादायितत्वात् साम्प्रतिकी 'सामान्यशिक्षा'-शब्दाभिधेया शिक्षा सर्वथा लौकिक - हानि - लाभ-कषायितैव संवृत्ता। तच्छिक्षासञ्चालिकास्तज्ज्ञान-परीक्षणकारिण्यः संस्थाश्चापि तस्मिन्नेव वर्गे समापतिता। सत्येवं यदि साम्प्रतिकी छात्रसमस्या पूतनायिता सर्वान् वित्रासयितुं प्रवर्तेत चेत्कोऽत्र विस्मयावसरः? यदि सर्वस्याः शिक्षाया लौकिकमेव उद्देश्यम्, तदा गतो दूरवर्तिलाभविचारः। साम्प्रतिकं कठोरमनुशासनं विविधञ्च असौविध्यं समुपभुज्य दूरवर्तिलाभः स्यान्न वेत्याशङ्क्यमानैः आपात-दर्शिभिः अपक्वमतिभिश्छात्रैः यदि नाम तात्कालिक-स्वार्थपरिपन्थिविषयाणां निरोधाय प्रयत्येत, तदर्थं सर्वविधं वैधमवैधं वा प्रयत्नजातं समनुष्ठीयेत चेत्तत्र को दोषस्तेषाम्? तैः पुनरिदमपि दृश्यते यदनया शिक्षया शिक्षिता जनाः जीवनयात्रापरि-चालने भूयसा विफला जायन्ते, तदा कथं ते धैर्य-मासाद्य तां शिक्षामासादयेयुः?

इत्थं यदा शिक्षादानस्य केन्द्रमेव दूषितं तदा तस्या परीक्षाः,परीक्षकाः परीक्ष्याश्चापि तथैव स्युश्चेत्तत्र किं नाम महदाश्चर्यम्? महदाश्चर्यमेत-देव यदद्यावधि भस्मासुरेणानेन सर्वेषां परीक्षा-परीक्षक - परीक्ष्याणां शिरस्सु स्वीयं वरदं (?) हस्तमारोप्य सर्वे भस्मतां न नीताः!

अस्या एव सर्वस्याः दूषितशिक्षाप्रणाल्याः प्रसरः शिक्षाक्षेत्रस्य एकस्मिन् क्षुद्रतरे कोणे कथं-कथमपि निःश्वसन्त्याः संस्कृतशिक्षाप्रणाल्या उपर्यपि संवृत्त इति पुनर्महत्तरं दौर्भाग्यम्। कोणे स्थिता-ऽपीयं निर्मलीव समग्रे शिक्षाक्षेत्रे व्याप्तामाविलतां स्वीयस्वाभाविक - नैर्मल्याधायक - गुणेन दूरीकर्तुं यथाशक्ति अद्यावधि प्रयतमानाऽऽसीत्। किन्तु स्वातन्त्र्यलाभान्यतमरूपेण अत्रापि पूर्वोक्तेय-मव्यवस्था क्रमशः पदमादधाना अद्य सुप्रतिष्ठां गता दृश्यते। तस्या दुष्प्रभावा अपि अहरहोऽनुभूयन्ते प्रेक्षावद्भिः।

अद्य संस्कृतशिक्षा आधुनिक - 'सामान्यशिक्षाया'-स्तथाकथित - प्रगतिशीलतातः स्पर्धितुं प्रवृत्तेव दृश्यते। प्राचीनगौरवस्य अस्मितां बिभ्राणा गुरुकुल-पद्धतिरूपेण मूलस्रोतसा विच्छिन्नेयं संस्कृतशिक्षा स्कूल - कालेज - युनिवर्सिटी - परपर्यायेषु विद्यालय-महाविद्यालय - विश्वविद्यालयेषु प्रचरन्ती आधुनिक-'सामान्यशिक्षाम'पि लज्जीकर्तुं प्रभवती दृश्यते। विशुद्धधर्मबुद्ध्या एतेषां विद्यालयादीनां सञ्चालका अद्य लुप्ताः। तेषां स्थाने प्रायो व्यावसायिकाः, सम्प्रदायविशेष - हितसाधकाः स्वार्थसाधकाश्च सञ्चालकाः पदं कृतवन्तः। प्रायस्तत्र अध्यापका अपि अनन्यजीवननिर्वाहसाधनमध्यापनं मन्यमानाः यथाकथञ्चन कार्यं कुर्वाणा जीवनमतिवाहयन्ति। तेषां केन्द्रं विश्वविद्यालयः पुना राजनैतिकमल्ल-शालायितः संवृत्तः। अध्येतारोऽपि अन्यतः सर्वेभ्यः क्षेत्रेभ्यः व्यवकलिताः अत्र पठनाय ततश्च क्षुद्रस्वार्थ-साधनाय मुधैव जीवनयापनाय च प्रविशन्ति। वर्ष-पर्यन्तं कथंकथमपि अस्मिन् कारागारे बद्धा एते परीक्षावसरं प्राप्य तं कारागारमोचनपर्व समा-कलय्य प्रवर्तन्ते। परीक्षकाणि तेषां स्तादृशानि राज-नैतिकस्पर्धास्थानानि संस्थानानि जायन्ते। तेषां सहायका अपि यदि तदनुसृतं पन्थानं नानुसरेयु-स्तदा स्वात्मनोऽस्तित्व मपि कथं धारयेयुः? अतस्तेऽपि तदनुयायिन एव जायन्ते। परीक्ष्याः छात्रा अपि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आधुनिकसामान्यशिक्षापरीक्ष्यश्छात्राणां नग्नताण्डव दर्शंदर्शं तमेव पन्थानमाश्रयितुं तत्रापि तेभ्यो वैशिष्ट्यं स्वात्मन्यासादयितुं च प्रयतन्ते ।

एते आवर्षं महता कष्टेन द्वित्रिवारं कक्षाया-मुपस्थिता भवन्ति । अध्यापका अपि नैकविध-व्यवसायलीनाः तदनुमन्यन्ते । परीक्षाकाले पुनरेते पुस्तकानि चिटिकाश्च समादाय परीक्षालये गच्छन्ति, सुखेन च तदेव उत्तरपत्रे विलिख्य समायान्ति । व्युत्पन्नः कश्चित्परीक्षार्थी सुलभश्चेत् तस्यैव लेखं स्वीये उत्तरपुस्तकेऽवतारयितुमपि ते निर्भीकं प्रवर्तन्ते । कोऽपि निरीक्षकोऽस्मिन् दुष्कृत्ये तेषां परिपन्थी भवति चेत्स घातकशस्त्रैर्यमातिथिर्विधीयते । परीक्षोत्तर-कालिकस्तत्पूर्वकालिकश्च तेषां तदध्यापकानाञ्च व्यवसायोऽपि महत्तरो भवति, यस्य विस्तरोऽत्र न क्रियेत चेत्तदेव शोभनम् ।

इत्थं तथाकथित - सम्मान्यपरीक्षया सम्मान्य-परीक्षकैः भयात् लोभात् जीवितहेतोश्च परीक्षिताः परीक्ष्याश्छात्राः परीक्षासागरमुत्तीर्य गुरुतरपदवी-भरैर्भूषिताः भारवाहिना इव व्यवहारक्षेत्रे तदेव अध्यापनकर्म सञ्चालयितुं समायान्ति । एतादृशैः परीक्षितैर्विद्वन्नामधारिभिः विद्यायाः शिक्षायाश्च कियती समुन्नतिर्भवेदिति नातिरोहितं विदुषाम् ।

अस्माकमस्य विकृतचित्रस्य लक्ष्यभूताः न सर्वे विद्वांसः, नापि सर्वे परीक्ष्याश्छात्रा इति सुनिश्चितमवधेयम् । सौभाग्याद्यापि तथा सर्वथा निर्दुष्टाः अध्ययनैकव्रतिनो विनीताः परीक्ष्याश्छात्राः सन्ति, परीक्षका अपि सर्वथा नीरक्षीरविवेकव्रतिनो राजहंसाः समुपलभ्यन्ते । विद्यालय - महाविद्यालयास्तेषां सञ्चालकाः अध्यापका आचार्याश्चापि आदर्शभूताः दृश्यन्ते सौभाग्यात् । वस्तुतस्तेषामेव पुण्यप्रभावेण संस्कृतशिक्षाऽद्यापि जीवति । तथापि एतादृशा

गङ्गा-गौरवम्

अनेकास्ताः कुल्यास्तव विरचिता जह्नुतनये
समृद्धिं तन्वन्ति स्वविपुलजलैरुत्तरभुवः ।
ततो भूमेरस्याः सुजल-सुफलाख्या खलु गता
यथार्थत्वं 'वन्दे जननि' खलु गीते विरचिता ॥ १ ॥
भुवं स्वर्लोकात्त्वं प्रखरतपसा वाहितवती
पुरावः सुप्रीता धरणिपतिना येन सदया ।
पितॄनुद्धर्तुं तं सपदि निजनाम्ना स्मरयसि
प्रयत्नं साकारं स वरदगुणो भागीरथि ते ॥ २ ॥
जलं ते निर्दोषं चिरमपि निबद्धं घट इति
प्रसिद्धं विज्ञानाद्वदनगतमन्ते सुगतिदम् ।
व्रती स्नातुं पातुं तदनयत देशान्तरमपि
ह्यसाध्यव्याधिघ्नं जननि महिमान्यत्र स कुतः ॥ ३ ॥
न ते मालिन्यघ्नं जननि सलिलं केवलमिदं
तटस्था त्वं भास्वन्मृदुल मृदुलं चाम्ब तु तथा ।
परामृष्टं पात्रं सकृदपि तयोद्भाति नववत्
सतां सङ्गान्नीचोऽप्यपगतमलो भाति सुः जनः ॥ ४ ॥

—श्री विश्वनाथ केशव छत्रे

अङ्गुलिगण्या एव । भूयसा सर्वत्र पूर्ववर्णितैव स्थितिः या हि शीघ्रातिशीघ्रं परिष्करणीये-त्येतदर्थमेवास्माकं लेखन्या अयं प्रयासः ।

संस्कृतं नाम दैवी वाक् । संस्कृतविद्या ऐहिका-मुष्मिक - श्रेयःप्रेयस्साधिका निर्विशेषं मानवानाम् । भारतदेशस्य प्राणपदेयम् । इमामविगणय्य कोऽपि श्रेयोऽर्थी श्रेयः समासादयितुं स्वप्नेऽपि न प्रभवेदित्यपि सुनिश्चितम् । भारतस्य समधिगतस्य स्वातन्त्र्यस्य जीवातुभूतमिदं तत्त्वम् । अतः स्वदेशीयशासनेन संस्कृतशिक्षापरिचालकैः संस्थानैः शिक्षाप्रदातृभिः आचार्यैस्तदधिगमेन आत्मनः सर्वविधं शाश्वतं कल्याणं कामयमानैश्च छात्रैः विषयेऽस्मिन् क्षणस्यापि प्रमादं परित्यज्य संभूय कोऽपि तादृश उपायोऽन्वेष्टव्यः, सपदि अनुष्ठेयश्च येन संस्कृतविद्यायाः प्राचीनतमो विश्वकल्याणकरो गुणः सुरक्षितः स्यात् । वयं दृढ-माशास्महे यत्सम्बद्धाः सर्वे विचक्षणाः विषयेऽस्मिन् मार्ग-दर्शनं विधास्यन्तीति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कूर्माचल (नैनीताल) जनपद-वर्णनम्

—डॉ० ब्रह्मानन्द त्रिपाठी एम. ए. साहित्याचार्यः—

ऐतिह्यानि प्रसिद्धानि दृष्टि-तुष्टिकराणि च । मन्दिराण्यथ तीर्थानि नयनीतालमण्डले ॥
नैसर्गिकाणि राजन्ते तेषां वर्णनमद्भुतम् । सङ्गृह्य क्रियते सम्यग् ब्रह्मानन्दत्रिपाठिना ॥

१. ग्रामदेव-ग्वल्ला-माहात्म्यम्

व्यासपुत्र महाभाग सूत ब्रह्मविदां वर ।
कथामृतरसास्वादात् तृप्ति नो याति मे मनः ॥ १ ॥
तस्मात्त्वं ब्रूहि चरितं ग्रामदेवस्य साम्प्रतम् ।
बूङ्ग्वल्लेति नाम्ना यः स्थितः पर्वतमूर्धनि ॥ २ ॥
भक्तानां कामदो नित्यं प्रणतार्तिनिवारकः ।
निर्णायकश्च वादानां पीडितानां समाश्रयः ॥ ३ ॥
न्यायालयगता वादा यान्ति चेद् विपरीतताम् ।
तेषां सम्यक् समाधानं ग्वल्लदेवः करोति हि ॥ ४ ॥
अतोऽत्र वादिनश्चैव प्रतिवादिजना अपि ।
वादपत्रं समादाय तस्मै ददति सादरम् ॥ ५ ॥
अचिराद् देवकृपया लभन्ते निर्णयं जनाः ।
धर्मराजसमश्चायं भूमिस्थोऽपि न संशयः ॥ ६ ॥
एतस्य दर्शनात् पुंसां सफलं वाञ्छितं भवेत् ।
सिद्धिकामा जनाः प्रेम्णा घण्टां छत्रं बलिं तथा ॥ ७ ॥
देवाय वितरन्त्यस्मै तस्माद् घण्टावलिः शुभा ।
दृश्यते परितस्तत्र भक्तैः सन्नादिता भृशम् ॥ ८ ॥
संक्षेपेण मयाख्यातं सिद्धपीठस्य वर्णनम् ।
एतस्य पाठमात्रेण ग्वल्लदेवः प्रसीदति ॥ ९ ॥

२. नल-दमयन्ती-माहात्म्यम्

राजतेऽभिनवः स्वल्पो भीमनाम्नः सरोवरात् ।
पश्चिमे नलपूर्वाख्यो दमयन्ती - सरोवरः ॥ १ ॥
विचित्रैतस्य गाथास्ति शृणु राजन् समाहितः ।
द्यूते पराजयं प्राप्य सपत्नीको नलो नृपः ॥ २ ॥
काननेषु चरन् खिन्नो विषण्णः क्षुधया तृषा ।
षष्टिखातप्रदेशेऽस्मिन् समायातो यदृच्छया ॥ ३ ॥
सोऽपश्यत् स्वच्छसलिलं सरः परमसुन्दरम् ।
तस्मिन् स्वल्पतरा मत्स्याः क्रीडन्तः परया मुदा ॥ ४ ॥
तस्मात्कतिपयान् मत्स्यान् गृहीत्वा नलराट् स्वयम् ।
कृत्वा तान् खण्डशः पश्चाद् हरिद्रातैलमिश्रितान् ॥ ५ ॥
ततः पाकाय चुल्यां स यावदारोपयन्नलः ।
मत्स्यखण्डानि तावद्धि समुत्प्लुत्य सरोवरम् ॥ ६ ॥
समाजग्मुस्ततो राजा विषण्णवदनोऽभवत् ।
न्यक्करोच्च विधातारमीदृग्भाग्यविधायकम् ॥ ७ ॥
तान्यहो मत्स्यखण्डानि जीवितानि दृशोः पुरः ।
दर्शकाणां समायान्ति तस्यां वाप्यां सदैव हि ॥ ८ ॥
अत्र स्नानस्य दानस्य मृतदाहस्य गौरवम् ।
व्यासेन वर्णितं भूयः पुराणेष्वखिलेषु च ॥ ९ ॥
इति संक्षेपतो राजन् तुभ्यमुक्तं मयानघ ।
अतः परं महाभाग का ते पृच्छा प्रवर्तते ॥ १० ॥

३. भीमसरोवर-माहात्म्यम्

एकदा द्वापरे राजन् पाण्डुपुत्रा महौजसः ।
द्यूते पराजिताश्चक्रुर्वनवासं सुदुःखदम् ॥ १ ॥
वनाद्वनं पर्यटन्त उत्तराखण्डमण्डलम् ।
गताः पिपासितास्तत्र न प्रापुः सलिलं क्वचित् ॥ २ ॥
युधिष्ठिरस्तदा भीमं प्रोवाच वदतां वरः ।
गच्छ तात तृषार्तोऽहं जलमानय शीतलम् ॥ ३ ॥
भीमोऽपि भ्रातृवचनं श्रुत्वा शीघ्रं ततो गतः ।
इतस्ततो विचिन्वानो जलमप्राप्य दुःखितः ॥ ४ ॥
ततः सभयदां भीमो गदामादाय सत्वरम् ।
यत्र प्रहारमकरोद् भूमौ तत्रैव वारिणः ॥ ५ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पातालोकादुद्भूतं स्रोतः परमपावनम् ।
भीमनाम्ना स एवायं सरोवरवरः क्षितौ ॥ ६ ॥
प्रसिद्धिं परमां प्रागात् तन्मध्ये द्वीपको लघुः ।
प्रकृत्या राजतेऽत्यन्तं वृक्षसम्पत्समन्वितः ॥ ७ ॥
तस्य पूर्वे विशालोऽस्ति नवकूर्चसरोवरः ।
पश्चिमे नलपूर्वाख्यो दमयन्ती - सरोवरः ॥ ८ ॥
राजन्ते दक्षिणे सप्त सरांसि विविधानि च ।
येषां सुषमया भान्ति समीपस्था नगादयः ॥ ९ ॥
इति ते भीमसरसः स्तुत्यं वृत्तं मयेरितम् ।
एतस्य सेवनात् पुंसां वाञ्छापूर्तिर्भवेदिह ॥ १० ॥

४. कर्कोटक-माहात्म्यम्

उत्तरे भीमसरसः स्थितिर्यस्य पुरातनी ।
स राजते नगश्रेष्ठः पादपैः समलङ्कृतः ॥ १ ॥
कर्कोटकेति नागस्य तत्र वासः सनातनः ।
स नित्यं स्वर्णमुद्रैकां पूजकायाददान्मुदा ॥ २ ॥
ज्ञात्वेति कश्चिद् दुष्टात्मा ताडयामास पूजकः ।
अमुक्तजीवतो नागः पूजकं तं शशाप सः ॥ ३ ॥
अद्यैव मृत्युर्भविता तव दुष्ट नराधम ।
अन्यच्च कोऽपि यश्चात्र मम पूजोपजीवकः ॥ ४ ॥
भविता सोऽपि निर्वंशो भूयात्सत्यं वचो मम ।
इत्थं शापं प्रयुज्यासौ न तत्र पुनरागतः ॥ ५ ॥
तद्दिनात् तस्य पूजायां वंशविच्छेदभीरवः ।
गृहस्था नानुरज्यन्ते केवलं ब्रह्मचारिणः ॥ ६ ॥
साधवश्चैव दृश्यन्ते पूजकास्तत्र मन्दिरे ।
प्रत्यब्दं नागपञ्चम्यां श्रद्धाभक्तिसमन्विताः ॥ ७ ॥
समीपस्थोऽतिरम्येऽस्मिन् दत्तात्रेयजलाशये ।
सहस्रशो नरा नार्यः स्नात्वा यान्ति कृतार्थताम् ॥ ८ ॥
कर्कोटकाख्यनागस्य माहात्म्यं श्रावितं मया ।
वद लोकहितार्थाय किमन्यच्छ्रोतुमिच्छसि ॥ ९ ॥

५. नवकोण-सरोवर-माहात्म्यम्

शृणु राजन् पाण्डुपुत्र युधिष्ठिर वचो मम ।
कूर्माचलप्रदेशेऽस्मिन् षष्टिखाताः पुरा स्मृताः ॥ १ ॥
कालयोगात् तेष्वनेके नालोक्यन्तेऽधुना जनैः ।
तथापि ये विद्यमानास्तेषां नामानि वच्म्यहम् ॥ २ ॥
नैनी, खुर्पा, ततः सप्त, सड़िया, मलुवेति च ।
नलादिदमयन्ती च भीमोऽथ नवकोणकः ॥ ३ ॥
अद्यापि खाता एतेऽष्टौ विलोक्यन्ते नृभिः सदा ।
किन्तु तांस्तालसंज्ञाभिर्जानाति जनता किल ॥ ४ ॥
एतेषु प्रथमो नैनी - सरोवर इति स्मृतः ।
द्वितीयो भीमनामायं तृतीयो नवकोणकः ॥ ५ ॥
क्रमेणानेन सरसामन्तिमः श्रेष्ठ उच्यते ।
आपातालगभीरोऽयं विस्तृतः सर्वतोऽधिकः ॥ ६ ॥
समन्ताद् विविधैर्वृक्षैर्मध्ये पद्मैश्च शोभितः ।
जलकाकैः सारसैश्च मत्स्यादिभिरलङ्कृतः ॥ ७ ॥
नैर्ऋत्ये वैष्णवीदेव्या नारायण्याश्च मन्दिरम् ।
नारिकेलोपहारेण तस्याः पूजा प्रकीर्तिता ॥ ८ ॥
इमं सरोवरं पुण्यं पुरा ब्रह्मात्मजः स्वयम् ।
स्वतपःसिद्धिकामाय चक्रे कूर्माचलाञ्चले ॥ ९ ॥
अमुष्य सरसोऽधस्ताद् रत्नमण्डलमण्डितम् ।
काञ्चनं मन्दिरं दिव्यं पार्षदैः परिवारितम् ॥ १० ॥
तत्र मध्ये महाबाहुः शङ्खचक्रगदाधरः ।
श्रिया लक्ष्म्या च संयुक्तः शेषशायी विराजते ॥ ११ ॥
सनत्कुमारनामायं नव - कोणसरोवरः ।
पुराणेषु प्रसिद्धोऽस्ति शृणु माहात्म्यमुत्तमम् ॥ १२ ॥
अयं सरोवरो रम्यो नवकोणविराजितः ।
एतस्य नवकोणानां विचित्रं चरितं शृणु ॥ १३ ॥
सहैव नवकोणानां दर्शनं यदि मानवः ।
कुर्याद् राजा भवेत्सद्यो मरणं वाथ निश्चितम् ॥ १४ ॥
पुष्करस्नानजं पुण्यमत्र प्राप्नोति मानवः ।
इति व्यासेन मुनिना पुराणेषु प्रकीर्तितम् ॥ १५ ॥

६ सिद्धगुफा-माहात्म्यम्

शृणु राजन् गुहामेकां प्राचीनां सिद्धसेविताम् ।
यां प्रविश्य नराः क्षिप्रं हरिद्वारं प्रयान्ति ते ॥ १ ॥
नवकोणतडागस्य दक्षिणे विद्यते च सा ।
यस्याः पन्थातिसङ्कीर्णः पाषाणचयवेष्टितः ॥ २ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सिद्धगुहाभिधाना सा तस्या बटुकभैरवः ।
स्वामी विराजते तत्र ग्राम्यैः सम्पूजितोऽन्वहम् ॥ ३ ॥
गुहां प्रविश्य मध्येऽस्ति तत्र दिव्यं सरोवरम् ।
उपरिष्ठाद् भूमिभागो वर्तते यत्र कर्षकाः ॥ ४ ॥
ग्रामदेवप्रसादेन सर्वत्र निरुपद्रवाम् ।
कृषिं कृत्वा जीविकां स्वां निर्वहन्ति मुदान्विताः ॥ ५ ॥
यदा कदा दृशोरग्रे वाहना भैरवस्य ते ।
सारमेयाः समायान्ति नराणां पुण्यकर्मणाम् ॥ ६ ॥
चतुर्दिक्षु प्रभूतानि स्रोतांसि निगदन्ति यत् ।
एतदूर्ध्वं तडागस्य स्थितिरास्ते सनातनी ॥ ७ ॥
नवसस्येष्टिपूजासु शुभकार्येषु धार्मिकाः ।
पूजोपहारबलिभिस्तं यजन्ति समादरात् ॥ ८ ॥
सिद्धदेवगुहायास्ते चरितं यन्मयोदितम् ।
आकर्ण्य नृपतिश्रेष्ठ का ते वाञ्छाऽवशिष्यते ॥ ९ ॥
धन्योऽस्म्यद्य कृतार्थोऽस्मि सफलं जीवितं मम ।
अद्भुतं चरितं यस्मात् त्वन्मुखाम्भोजनिःसृतम् ॥ १० ॥
श्रुत्वात्यन्तं प्रसीदामि प्रणमामि पुनः पुनः ।
त्वत्प्रसादान्महाभाग सर्वो मे संशयो गतः ॥ ११ ॥

७. कैलाश-माहात्म्यम्

अस्ति कूर्माचले दिव्यं कैलास इति विश्रुतम् ।
नवकोणतडागस्य पूर्वस्यां दिशि संस्थितम् ॥ १ ॥
पर्वतस्योच्चशिखरे सरोवरविभूषितम् ।
सिंहव्याघ्रादिभिर्व्याप्तं पादपैरुपशोभितम् ॥ २ ॥
[1]समूव - क्षत्रियैः पूर्वं श्रद्धाभक्तिसमन्वितैः ।
स्थापितं राजतेऽत्यन्तं शम्भोर्धाम सनातनम् ॥ ३ ॥
कैलासगमनात् पूर्वं 'जटाऽऽख्यः' सुजलाशयः ।
तत्र स्नात्वा नरा नार्यः श्रद्धया नतकन्धराः ॥ ४ ॥
गत्वा सद्यः सोपवासाः शिवभक्तिपरायणाः ।
पूजयन्ति महादेवं शङ्करं लोकशङ्करम् ॥ ५ ॥
प्रत्यब्दं फाल्गुने कृष्णे चतुर्दश्यां शिवालये ।
कैलासे भक्तसम्मर्दो महांस्तत्र विलोक्यते ॥ ६ ॥

एतस्य विषये प्रत्नां कथां शृणु नराधिप ।
देवैश्च दानवैश्चैव मथितं सागरं महत् ॥ ७ ॥
तस्मादुत्थितपीयूषकलशाद् ये च बिन्दवः ।
पेतुः पृथिव्यां तेष्वेको बिन्दुरत्र पपात ह ॥ ८ ॥
आविर्बभूव भूतेशस्तद्दिनादत्र शङ्करः ।
यस्य प्रसादाज्जायन्ते मानवा मुक्तिभागिनः ॥ ९ ॥
हिमालयसमीपस्थे शम्भोर्मानसरोवरे ।
माहात्म्यं वर्तते यद्धि तद्वदत्रापि कीर्तितम् ॥ १० ॥
शम्भोर्द्वादशलिङ्गानां दर्शने यत् फलं भवेत् ।
तत्फलं समवाप्नोति कैलाशदर्शनात् कलौ ॥ ११ ॥
इति ते गुह्यमाख्यातं नेदिष्ठं स्थानमुत्तमम् ।
धर्म्यं यशस्यमायुष्यं धनधान्यप्रवर्धनम् ॥ १२ ॥
शिववारे तिथौ वापि कैलाशसं प्राप्य मानवाः ।
ये भजन्ते शिवं प्रीत्या तेषां मुक्तिः करे स्थिता ॥ १३ ॥

८. चित्रशिला-माहात्म्यम्

शृणु राजन् प्रवक्षामि तीर्थमेकं पुरातनम् ।
गौलानदीतटे रम्ये चित्रेश्वर - सनाथितम् ॥ १ ॥
पूर्व - दक्षिणादिग्भागे स्थितमेतत्सनातनम् ।
हिंस्रैः पशुभिराक्रान्तं काननैरुपबृंहितम् ॥ २ ॥
इदं तीर्थं पुराकालान्मोक्षसाधनमुत्तमम् ।
व्यासेन मुनिना प्रोक्तं नारदाय महात्मने ॥ ३ ॥
येषां दाहादिसंस्कारा भवन्त्यत्र मृतात्मनाम् ।
चित्रेश्वरप्रसादात्ते लभन्ते मुक्तिमव्ययाम् ॥ ४ ॥
तीर्थे मकरसंक्रान्तौ दूरस्था अपि यात्रिणः ।
समागत्य ततः सर्वे स्नानं कुर्वन्ति सादरम् ॥ ५ ॥
ढक्कावाद्येन साकं ते जजिया जजियेति च ।
उच्चैर्गायन्ति नृत्यन्ति प्रसीदन्ति मुहुर्मुहुः ॥ ६ ॥
दृष्ट्वा चित्रेश्वरं देवं भक्त्या नत्वा पुनः पुनः ।
स्वं स्वं गेहं समायान्ति नरा विगतकल्मषाः ॥ ७ ॥
इति ते गुह्यमाख्यातं चरित्रं पावनं महत् ।
षष्ठिखातस्थ - देवानां तीर्थानाञ्च नराधिप ॥ ८ ॥
देवास्तीर्थाश्च ये पुण्याः पर्वताश्रयसंस्थिताः ।
अन्ये न तत्समानार्हा इति वेदविदां मतम् ॥ ९ ॥

---
१. जातिविशेषैः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुस्तकालय
गुरुकुल कांगड़ी विश्वविद्यालय
हरिद्वार

मुकुन्दमाला : वैष्णवस्तोत्रेषु वैजयन्तीमाला

--डॉ० कृष्णस्वामी अयङ्गारः--

[प्रवाचकः—केन्द्रीय-हिन्दीसंस्थानस्य, आगरा]

'कुलशेखर' इति प्रसिद्धो राजा कश्चिद् द्राविड-देशे बभूव। वैष्णवाग्रेसरं तं भक्तशिरोमणिं सन्तः 'आलवार' - नामकानां भक्तमुनीनां पङ्क्तौ निवेशयन्ति। ये हि परमैकान्तिनः श्रीमतो नारायणस्य चरणारविन्दमेव सर्वस्वमभिमन्यन्ते, तथैव स्वभक्ति-परीवाहं द्राविडभाषाप्रबन्धात्मना परिणमय्य लोका-ननुगृह्णन्ति च, तान् भगवच्चरणारविन्दभक्तिनिमग्नान् सतः 'आलवार' इति नाम्ना व्यपदिशन्ति। एवं-विधोऽयं कुलशेखरो नाम राजा 'पेरुमाल तिरुमोषि' इति प्रख्यातस्य प्रबन्धस्य निर्माता कविवरः संस्कृत-भाषायां 'मुकुन्दमाला'ख्यस्य कस्यचित् सरल-सुन्दरस्य स्तोत्रस्यापि लेखक इति प्रथते। एषा च मुकुन्दमाला वैष्णवस्तोत्रसाहित्ये नितरां प्रसिद्धा भक्तिप्रसूनैः पद्यैर्ग्रथिता वैजयन्तीमालेव मुकुन्दस्य आनन्दहेतुर्हृदयमधितिष्ठतीति प्रतीमः।

घुष्यते यस्य नगरे रङ्गयात्रा दिने दिने।
तमहं शिरसा वन्दे राजानं कुलशेखरम्॥

एष कविः श्रीरङ्गयात्राप्रणयी भक्ताग्रेसरो वर्ण्यते। भक्तिमेव चासौ परमं पुरुषार्थं मन्यते। परमात्मानं मुकुन्दं सविनयं प्रणम्य प्रसाद्य भक्त्या तस्यानुस्मरणमेव वरं वृणीते—

मुकुन्दमूर्ध्ना प्रणिपत्य याचे
भवन्तमेकान्तमियन्तमर्थम्।
अविस्मृतिस्त्वच्चरणारविन्दे
भवेभवे मेऽस्तु भवत्प्रसादात्॥

भवे-भवे इति जन्मान्तरं चेद् भवति तदप्यसौ अप्रतिषेधयन्ननुमन्यते ; किन्तु तत्रापि भगवतः स्मरण-मविच्छिन्नमनुवर्ततामित्येतावदेव साभिनिवेशमर्थ-यते। 'स्मरणमपि भक्तेरेकमङ्गम्' इति न परोक्षं प्रेक्षावताम्। स्मरणं चिन्तनं मननं ध्यानमिति भक्तेरेव कार्यमनेकरूपं विद्मः। तादृशीं भक्तिं काम्यान्तरनिषेधपूर्वकमसन्दिग्धैः शब्दैर्याचते—

नास्था धर्मे न वसुनिचये नैव कामोपभोगे
यद्यद् भव्यं भवतु भगवन् पूर्वकर्मानुरूपम्॥
एतत्प्रार्थ्यं मम बहुमतं जन्मजन्मान्तरेऽपि
त्वत्पादाम्भोरुहयुगगता निश्चला भक्तिरस्तु॥

'निश्चले'ति विशेषणात् कष्टकालेऽपि त्वां न विस्मरेयमिति प्रार्थयते। तदेव श्लोकान्तरेणाप्याह—

दिवि वा भुवि वा ममास्तु वासो
नरके वा नरकान्तक प्रकामम्।
अवधीरित - शारदारविन्दौ
चरणौ ते मरणेऽपि चिन्तयामि॥

केचिद् भक्ताः वणिज इव भक्तिं मूलधनं भावयन्तः पुत्र-कलत्र-धन-धान्यादिकं लाभमभीप्सन्ति। केचित्तु पूर्ववृत्तमनुस्मरन्तः सञ्जातानुशयाः नरकभीताः, दण्डवारणार्थं भक्तिमवलम्बन्ते ; 'कृतानि पापानि क्षमस्व, मां मा दण्डय, अपि तु दयया क्षमस्व, अभीष्टानि च परिपूरये'ति याचन्ते। अन्ये स्वर्गादि-लाभार्थं भगवन्तं भजन्ते। अहं पुनः स्वर्गं कामोप-भोगं पापनिवृत्तिं फलान्तरं वा किञ्चिदीदृशं नेच्छामि। केवलं तव चरणयोर्भक्तिमेव कामये इति स्पष्टयति—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नाहं वन्दे तवचरणयो-र्द्वन्द्वमद्वन्द्वहेतोः,
कुम्भीपाकं गुरुमपि हरे नारकं नापनेतुम् ।
रम्या रामा मृदुतनुलता नन्दनेनापि रन्तुं
भावे भावे हृदयभवने भावयेयं भवन्तम् ॥

स्वर्गमपवर्गं वा नायं बहुमन्यते, किन्तु भक्तिमेव परमं सुखं स्वीकरोति । 'भक्तिर्मोक्षस्य साधनमि'ति प्रायः सर्वे भक्ता मन्यन्ते । एष तु तामेव ब्रह्मानन्दस्वरूपां पुरुषार्थकोटौ स्थापयति । तदाह—

सरसिजनयने सशङ्खचक्रे
मुरभिदि मा विरम स्वचित्त रन्तुम् ।
सुखतरमपरं न जातु जाने
हरिचरणस्मरणामृतेन तुल्यम् ॥

एतच्च भक्तिजन्यं स्मरणं सदा भूयादित्याशास्ते । 'मरणेऽपि चिन्तयामी'ति हि सप्रतिज्ञमाह । किन्तु मरणदशायां करणविलयकाले कांदिशीकस्मृतीनामस्माकं स्मरणं भवति न वेति संशयमापन्नः, तदा न स्मरिष्यामि चेत्तथापि अद्य कृतेनैव स्मरणेन भगवांस्तुष्यतु, किं चिन्तयेति सविश्वासं समाधत्ते—

कृष्ण त्वदीयपदपङ्कजपञ्जरान्त-
मद्यैव मे विशतु मानसराजहंसः ।
प्राणप्रयाणसमये कफवातपित्तैः
कण्ठावरोधनविधौ स्मरणं कुतस्ते ॥

तदाह भगवान् आदिवराहोऽपि—

स्थिते मनसि सुस्वस्थे शरीरे सति यो नरः ।
धातुसाम्ये स्थिते स्मर्ता विश्वरूपं च मामजम् ॥
ततस्तं म्रियमाणं तु काष्ठपाषाणसंनिभम् ।
अहं स्मरामि मद्भक्तं नयामि परमां गतिम् ॥

'स्मरामी'त्यस्य स्मारयामीत्यर्थः । अन्तर्भावितण्यर्थोऽयं प्रयोगः । तथा चाहमेव अन्तिमस्मृतिं विधाय भक्तं मोक्षं प्रापयामीति भगवान् आश्वासयति । इममेवार्थं श्रीमान् वेदान्तदेशिकोऽपि अभीतिस्तवे एवमनुगृह्णाति—

स्थिते मनसि विग्रहे गुणिनि धातुसाम्ये सति,
स्मरेदखिलदेहिनं य इह जातुचित्त्वामजम् ।
तयैव खलु सन्धया तमथ दीर्घनिद्रावशं,
स्वयंविहितसंस्मृतिर्नयसि धाम नैःश्रेयसम् ॥

तादृशमन्तिमस्मरणं संपिपादयिषुरहमद्यैव त्वां स्मरामीति कविः कुलशेखरो भाषते ।

एषा भक्तिरेव सर्वेषां चेतनानां मुक्तिपर्यन्तानि सर्वाणि फलानि विधास्यतीत्याह—

भवजलधिगतानां द्वन्द्ववाताहतानां,
सुत - दुहितृ - कलत्र - त्राणभारार्दितानाम् ।
विषम - विषयतोये मज्जतामप्लवानां,
भवतु शरणमेको विष्णुपोतो नराणाम् ॥
भवजलधिमगाधं दुस्तरं निस्तरेयं,
कथमहमिति चेतो मा स्म गाः कातरत्वम् ।
सरसिजदृशि देवे तावकी भक्तिरेका
नरकभिदि निषण्णा तारयिष्यत्यवश्यम् ॥

संसारो नाम महानयमगाधः सागरः । तं तर्तुकामा वयमप्लवा निरुपायाः सन्तप्यामहे । भक्तिरेवास्माकमुत्तारिका निरुपद्रवा निरपाया च महती नौरिति साङ्गरूपकालङ्कारमुखेन निरूपयति—

तृष्णातोये मदनपवनोद्धूतमोहोर्मिमाले
दारावर्ते तनयसहजग्राहसङ्घाकुले च ।
संसाराख्ये महति जलधौ मज्जतां नस्त्रिधामन्
पादाम्भोजे वरद भवतो भक्तिनावं प्रयच्छ ॥

भगवतः सेवनमेव मनुष्याणां परमो धर्मः । अन्यत्सर्वं बन्धकारणमनर्थावहं च । तस्मात् सर्वप्रकारेण भगवानेव सेवनीय इत्युपदिशति—

जिह्वे कीर्तय केशवं मुररिपुं चेतो भज श्रीधरं
पाणिद्वन्द्व समर्चयाच्युतकथां श्रोत्रद्वय त्वं शृणु ।
कृष्णं लोकय लोचनद्वय हरेर्गच्छाङ्घ्रियुग्मालयं
जिघ्र घ्राण मुकुन्दपादतुलसीं मूर्धन्नमाधोक्षजम् ॥

एवं सर्वेन्द्रियसमाराध्यः सर्वकर्मसत्कारार्हश्च

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परमात्मा श्रीमन्नारायण इति सुनिश्चितमर्थमुद्घोषयति—

हे लोकाः शृणुत प्रसूतिमरणव्याधेश्चिकित्सामिमां
योगज्ञा समुदाहरन्ति मुनयो यां याज्ञवल्क्यादयः।
अन्तर्ज्योतिरमेयमेकममृतं कृष्णाख्यमापीयतां
तत्पीतं परमौषधं वितनुते निर्वाणमात्यन्तिकम्॥

संसारमहाव्याधिप्रशमनौषधं श्रीकृष्णाभिधानमनिशं सेवमानाः परमं सुखं जुषध्वमिति हितमुपदिशति। भगवत्सम्बन्धहीनानां पापीयसां सम्पर्कोऽपि पापमावहतीति भीतः तस्मान्निवारणमर्थयते—

मा द्राक्षं क्षीणपुण्यान् क्षणमपि भवतो भक्तिहीनान् पदाब्जे
मा श्रौषं श्राव्यबद्धं तव चरितमपास्यान्यदाख्यानजातम्।
मा स्मार्षं माधव त्वामपि भुवनपते चेतसापह्नुवानान्
मा भूवं त्वत्सपर्याव्यतिकररहितो जन्मजन्मान्तरेऽपि॥

श्रीमन्नारायण इति भगवान् असाधारणेन नाम्ना व्यपदिश्यते। वासुदेवः केशवः कृष्णो माधवो हरिरिति बहूनि नामानि तस्य सन्ति। नामसहस्रेण वेदव्यासो भगवन्तमभितुष्टाव। रूढानि यौगिकानि च विख्यातानि विश्वं विष्णुर्वषट्कार इत्यादीनि भगवतो नामान्यनन्तानि। सर्वान्तर्यामी सर्वाधारः सर्वेश्वरश्च स सर्वशब्दवाच्यो भवतीति प्रामाणिकाः संप्रतिपद्यन्ते। तथापि कानिचिन्नामानि व्याकरणादिशास्त्रबलात् देवतान्तरपरतयापि नेतुं शक्यन्ते।

स्थाणुः शवः शिवः शम्भुः परमेष्ठी पितामहः।

इत्यादीनि नामानि विष्णुसहस्रनामस्तोत्रे विष्णुवाचकतयोक्तान्यपि लोक-व्यवहारबलात् कोशप्रामाण्याच्च देवतान्तराभिधायीनि भवन्तीति निर्विवादम्। नारायणपदं तु पूर्वपदात् संज्ञायामगः (पा० ८.४.३) इति शास्त्रप्रामाण्यात् लक्ष्मीपतेरेव बोधकं नान्यस्येति तस्य असाधारणत्वं सुस्थम्।

एतदेव अष्टाक्षरमन्त्रे गृह्यते। तथा चोपनिषत्—**ओमित्येकाक्षरम्। नम इति द्वे अक्षरे। नारायणायेति पञ्चाक्षराणि। एतद्वै नारायणस्याष्टाक्षरं पदम्** इति तं मन्त्रं व्याचष्टे। **ओमित्यग्रे व्याहरेत्। नम इति पश्चात्। नारायणायेत्युपरिष्टात्** इति मन्त्रघटकानां पदानां क्रममपि दर्शयति। सोऽयमष्टाक्षरो मन्त्रः पुनःपुनरावर्त्यमानो जपतां सर्वाणि पापान्यपनुद्य मोक्षानन्दं विधास्यतीति कविर्हितैषी भूत्वा तत्त्वं हितं पुरुषार्थं च युगपदुपदिशति—

हे मर्त्याः परमं हितं शृणुत वो वक्ष्यामि संक्षेपतः
संसारार्णवमापदूर्मिबहुलं सम्यक् प्रविश्य स्थिताः।
नानाज्ञानमपास्य चेतसि नमो नारायणायेत्यमुं
मन्त्रं सप्रणवं प्रणाममसहितं प्रावर्तयध्वं मुहुः॥

नारायणनामोच्चारणमात्रेण सर्वाणि पापानि विध्वंसन्ते। संसारदुःखस्यापि मूलोच्छेदः संपाद्यते। वयं भाग्यहीनास्तमितः पूर्वं नैवास्मार्ष्म। तत एव हेतोरीदृशं दारुणं दुःखमनुभवामः। अद्य तस्य भगवतो दिव्यं नाम यदि स्मरामस्तर्हि इतः परमीदृशं दुःखं नानुभविष्यामः। तदद्य नारायणस्य नाम स्मरणीयमिति शिक्षयति—

श्रीमन्नाम प्रोच्य नारायणाख्यं,
के न प्रापुर्वाञ्छितं पापिनोऽपि।
हा नः पूर्वं वाक् प्रवृत्ता न तस्मिन्,
तेन प्राप्तं गर्भवासादिदुःखम्॥

एतदेव कविरन्यः प्रकारान्तरेणाह—

कृष्णः कृष्णः कृष्ण इत्यन्तकाले
जल्पन् जन्तुर्जीवितं यो जहाति।
आद्यः शब्दः कल्पते तस्य मुक्त्यै
व्रीडानम्रौ तिष्ठतोऽन्यावृणस्थौ॥

अजामिलो नाम पापीयान् मरणकाले स्वपुत्रस्य नाम नारायणशब्दं गृह्णन् अर्धोच्चारणदशायामेव मृतः, आकस्मिकेन भगवन्नामैकदेशग्रहणेनापि परमात्मनोऽनुग्रहस्य पात्रीभूतो मुक्तिमवापेति पौराणिका वदन्ति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हरिर्हरति पापानि दुष्टचित्तैरपि स्मृतः।
अनिच्छयापि संस्पृष्टो दहत्येव हि पावकः॥

इति च भगवन्नामोच्चारणस्य प्रभावं वर्णयन्ति। भक्तानां पापानि हरतीति, संसारमहाव्याधिं हरतीति च हरिशब्दं ते व्युत्पादयन्ति। अत एव नानाविधानि भक्तानुग्रहप्रदर्शनपराणि नामानि व्यपदिशन् भगवन्तं संबोधयति कविः—

हे गोपालक हे कृपालजलनिधे हे सिन्धुकन्यापते
हे कंसान्तक हे गजेन्द्रकरुणापारीण हे माधव।
हे रामानुज हे जगत्त्रयगुरो हे पुण्डरीकाक्ष मां
हे गोपीजननाथ पालय परं जानामि न त्वां विना॥

एतादृशानि नामानि सङ्कीर्तयेति जिह्वां बोधयति—

तत्त्वं ब्रुवाणानि परं परस्मात्
मधु क्षरन्तीव सतां फलानि।
प्रावर्तय प्राञ्जलिरस्मि जिह्वे
नामानि नारायण - गोचराणि॥

असौ कविः सर्वात्मना नारायणपरायण एवेति स्पष्टम्। तदेव देवतान्तरविमुखत्वं भगवदैकान्त्यं च दर्शयति—

नमामि नारायण - पादपङ्कजं
करोमि नारायणपूजनं सदा।
वदामि नारायणनाम निर्मलं
स्मरामि नारायणतत्त्वमव्ययम्॥

एषां नाम्नामुच्चारणं सुकरमानन्दावहं मोक्षप्रदं चेति जानन्तोऽपि जनाः विषयासक्तचित्तत्वाद् भगवन्तं न स्मरन्तीति विस्मयं विषादं च प्रदर्शयन् कविरेवमाह—

श्रीनाथ नारायण वासुदेव
श्रीकृष्ण भक्तप्रिय चक्रपाणे।
श्रीपद्मनाभाच्युत कैटभारे
श्रीराम पद्माक्ष हरे मुरारे॥

अनन्त वैकुण्ठ मुकुन्द कृष्ण
गोविन्द दामोदर माधवेति।
वक्तुं समर्थोऽपि न वक्ति कश्चिद्
अहो जनानां व्यसनाभिमुख्यम्॥ इति।

आलोच्य सर्वशास्त्राणि विचार्य च पुनः पुनः।
इदमेकं सुनिष्पन्नं ध्येयो नारायणः सदा॥

इति पूर्वाचार्यैः प्रदर्शितमर्थं दृढीकुर्वन्, भगवच्चरणारविन्दभक्तिं विना सर्वाणि कर्माणि निरर्थकानीति स्थापयति—

आम्नायाभ्यसनान्यरण्यरुदितं वेदव्रतान्यन्वहं
मेदच्छेदफलानि पूर्तविधयः सर्वे हुतं भस्मनि।
तीर्थानामवगाहनानि च गजस्नानं विना यत्पद-
द्वन्द्वाम्भोरुहसंस्मृतिं विजयते देवः स नारायणः॥

अन्ते च भगवत्कैङ्कर्यं भागवतशेषत्वपर्यन्तं प्रार्थयमानः, भागवतानां सेवया भगवान्नितरां प्रीयते, तस्माद् भक्तानां सत्कारः सादरं श्रद्धया कर्तव्य इति तात्पर्येण "मां तव भृत्यानां भृत्यं स्मरे"ति वदति—

मज्जन्मनः फलमिदं मधुकैटभारे
मत्प्रार्थनीयमदनुग्रह एष एव।
त्वद्भृत्यभृत्य - परिचारक - भृत्यभृत्य-
भृत्यस्य भृत्य इति मां स्मर लोकनाथ॥

इदमेव प्रकारान्तरेणापि निरूपयति—

तत्त्वं प्रसीद भगवन् कुरु मय्यनाथे
विष्णो कृपां परमकारुणिकः किल त्वम्।
संसार - सागर - निमग्न - मनन्त - दीन-
मुद्धर्तुमर्हसि हरे पुरुषोत्तमोऽसि॥

भगवतोऽनन्तेष्ववतारेसु कृष्णेऽस्य कवेर्महती भक्तिरासीत्। तं कृष्णमेवं स्तौति—

कृष्णो रक्षतु नो जगत्त्रयगुरुः कृष्णं नमस्याम्यहं
कृष्णेनामरशत्रवो विनिहताः कृष्णाय तस्मै नमः।
कृष्णादेव समुत्थितं जगदिदं कृष्णस्य दासोऽस्म्यहं
कृष्णे तिष्ठति सर्वमेतदखिलं हे कृष्ण रक्षस्व माम्॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अत्र कृष्णस्तुतौ सप्तविभक्तिप्रयोगो द्रष्टव्यः। तस्यानन्तं महिमानं प्रशंसति—

दारा वाराकरवरसुता ते तनूजो विरिञ्चः
स्तोता वेदस्तव सुरगणो भृत्यवर्गः प्रसादः।
मुक्तिर्माया जगदविकलं तावकी देवकी ते
माता मित्रं बलरिपुसुतस्त्वय्यतोऽन्यं न जाने॥

'इदं भस्मान्तं शरीरमि'ति भगवती श्रुतिर्देहस्यानित्यत्वं बोधयति। प्रत्यक्षसिद्धश्चायमर्थः प्रमाणान्तरं नापेक्षते। अस्य नियतविनाशस्य देहस्य रक्षणार्थमनेकविधान् प्रयत्नानातिष्ठन्ते जनाः। अविनाशिनमात्मानं गोपायितुं न कोऽपि यतते। देहस्यारोग्यं संपादयितुमौषधानि सेवन्ते। आत्मकल्याणार्थं कमप्युपायं नावलम्बन्ते। तानज्ञानान्धकारे पतितानेष कविः 'श्रीकृष्णचरणौ आश्रित्योज्जीवते'ति हितमुपदिशति—

इदं शरीरं परिणामपेशलं
पतत्यवश्यं श्लथसन्धिजर्जरम्।
किमौषधैः क्लिश्यसि मूढ दुर्मते
निरामयं कृष्णरसायनं पिब॥

लोके तावत् कश्चित्स्वामिनमाश्रित्य सेवका वेतनं लब्ध्वा जीवन्ति। धनलोभेन यं कञ्चित् नीचमपि क्रूरकर्माणमपि कामान्धमपि सेवन्ते। एष स्वामी केषाञ्चिदल्पीयसां ग्रामाणामधिपतिः; प्रसन्नो भूत्वापि सेवकेभ्यः प्रभूतं धनं न ददाति, किन्तु लुब्धत्वादत्यल्पमेव धनं क्लेशेन वितरति। धनमेकं वर्जयित्वा किञ्चिदन्यत्फलं दातुमयं न समर्थः। एतादृशमतिनीचं दुष्टं वराकमपि जनाः स्वल्पधनप्रेप्सया निषेवन्ते। भगवान् नारायणस्तु उत्तमः पुरुषः, यं सेवमानाः स्वामिगुणगौरवात् स्वयमप्युत्कर्षं भजेरन्। स च त्रयाणां लोकानामेकेश्वरः। लोकानामिति उपलक्षणमेतत्। अनन्तकोटिब्रह्माण्डनायकः खल्वेषः। न चायमन्यवत् कायिकीं सेवामपेक्षते। मनसा स्मरणमेव सेवां मन्यते। भक्त्या कृतं प्रणाममपि महान्तमुपकारं भावयति। कृतपूर्वान् सर्वानपकारान् सद्यो विस्मरति। तथा हि वाल्मीकिर्वर्णयति—

कथञ्चिदुपकारेण कृतेनैकेन तुष्यति।
न स्मरत्यपकाराणां शतमप्यात्मवत्तया॥

जन्मकोटिसहस्रेषु कृतान् अस्माकमनन्तापराधान् क्षमते दयते च। प्रसन्नश्च न केवलं धनधान्यादिकामैहिकीं सम्पदमेव, किन्तु स्वर्गमपवर्गं चापि दातुमीष्टे। भक्त्याराधितः स्वस्य पदमेव कृपया प्रयच्छति। प्रपत्तिवाक्योच्चारणमात्रेण परितुष्टः सर्वाणि भूतानि रक्षितुं सश्रद्धस्तिष्ठति। धनिनो जनाः स्वयं चिरं न तिष्ठन्ति। यदि कश्चिदुदारचेता धनिकः कस्यचित् सेवकस्य कर्मणा संतुष्टस्तुभ्यमहं प्रभूतं धनं दास्यामीति प्रतिशृणोति, तर्हि तस्य प्रतिश्रोतुरेव कालवश्यत्वात् एवं संभाव्यते यदयं धनं दातुमिच्छन्नपि प्रतिश्रुतार्थवितरणात्पूर्वं यमलोकं गच्छति। स च सेवकः स्वामिना प्रतिश्रुतमप्यर्थं दौर्भाग्यान्न लभते। एष नारायणस्तु सदा तिष्ठति। तस्मादयं प्रतिज्ञातमर्थमवश्यं दास्यतीति विश्वासो युज्यते। अक्लेशसेवनीयमनन्तशक्तिसंपन्नं सर्वाभीष्टप्रदायकमेनं पुरुषोत्तमं विहाय ये स्वतुल्यं कञ्चित् श्वतुल्यं स्वामिनमुपजीवन्ति, ते हन्त मूढा इति निश्चप्रचमित्याह—

नाथे नः पुरुषोत्तमे त्रिजगतामेकाधिपे चेतसा
सेव्ये स्वस्य पदस्य दातरि सदा नारायणे तिष्ठति।
यं कञ्चित्पुरुषाधमं कतिपयग्रामेशमल्पार्थदं
सेवायै मृगयामहे नरमहो मूढा वराका वयम्॥

एवमसौ कविः सकलेतरविरक्तो भगवच्चरणारविन्दैकप्रणयी सर्वजनहिताय श्रीमन्नारायणशरणागतिपरमिदं स्तोत्रं रचयामास। एषा मुकुन्दमाला वैष्णवभक्तिसाहित्ये प्रधानं स्थानं वहतीति सर्वमनवद्यं पश्यामः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मानस-भारती : देवगिरा गुम्फितं मानसम्

—श्री जनार्दन गङ्गाधर रटाटे, एम० ए० साहित्याचार्यः—

रामचन्द्रस्य चरितं चिन्तामणिरनुत्तमः ।
तथा सतां सुधीनार्याः शृङ्गारः परमोज्ज्वलः ॥
श्रीरामस्य गुणग्रामा जगते कुशला मताः ।
मुक्तेर्धनस्य धर्मस्य प्रदाः परपदस्य च ॥
ज्ञानवैराग्ययोगानां युक्ताः सद्गुरवो मताः ।
अश्विनौ भवरूपस्य तीव्ररोगस्य शान्तये ॥
जननीजनकौ सीतारामयोः प्रेम्ण उद्गमे ।
सर्वेषां व्रतधर्माणां नियमानाञ्च कारणम् ॥
पापसन्तापशोकानां निश्चिताः शामका मताः ।
प्रियाः पालनकर्तारो लोकस्यास्य परस्य च ॥
विचारभूपतेरेते सचिवाः सुभटाः स्थिताः ।
लोभोदधेरपारस्य शोषणे कुम्भजा मताः ॥
काम - क्रोध - कलि - क्रूर - मलद्विपगणाय च ।
भक्तचित्तवनस्थाय मत : केसरिशावकाः ॥
शम्भवेऽभ्यागताः पूज्याः सदा प्रियतमास्तथा ।
भक्तानां कामदा मेघा दारिद्र्यदववह्नये ॥
मन्त्रा विषयसर्पाय महान्तो मणयस्तथा ।
लिम्पन्त्येते ललाटस्थां कुलिपिं कठिनामपि ॥
मोहान्धकारहरणे दिवाकरकरा इव ।
तुल्या जलधरैर्दासरूपशालिसुपालने ।
अभीष्टकामनापूर्तौ कल्पद्रुमवरा इव ।
सेवने सुलभाः सौख्यप्रदा हरिहराविव ॥
सुकवेः शरदश्चित्तनभसे भगणा इव ।
रामभक्तजनेभ्यश्च जीवनद्रविणं यथा ॥
सर्वपुण्यफलात्मानो भूरिभोगा इव स्थिताः ।
हिताय जगतः साधुपुरुषा इव सम्मताः ॥
हंसा इव मता दासमानसोत्तंसमानसे ।
गङ्गातरङ्गमालेव सर्वेषामेव पावने ॥

कुमार्गकृत तर्ककुवृत्तलिप्य-
पाखण्डदम्भच्छलपुञ्जदाहे ।
पुञ्जा गुणानां रघुनायकस्य
दाहे प्रचण्डोऽग्निरिवेन्धनस्य ॥३२॥ (क)

प्रभोश्चरित्रं विधुरश्मितुल्यं
सौख्यप्रदं सर्वजनस्य एव ।
सतां निशापद्मचकोरकाणां
हृदे सुभव्यं बहुलाभदञ्च ॥३२॥(ख)

चकार विविधान् प्रश्नात् विधिना येन पार्वती ।
विधिना येन शम्भुश्च वर्णयामास विस्तरात् ॥
प्रगाय हेतुं तं सर्वं वर्णयिष्यामि साम्प्रतम् ।
कथाप्रवन्धं निर्माय विचित्रं विविधं तथा ॥
इयं कथा येन पूर्वं श्रुता नैवास्ति कुत्रचित् ।
स श्रुत्वेमां समाश्चर्ययुक्तो न भवतु क्वचित् ॥
अलौकिकामिमां ये च शृण्वन्ति ज्ञानिनः कथाम् ।
आश्चर्यं नैव मन्यन्ते तं ज्ञात्वेदं स्वचेतसि ॥
यन्नास्ति सीमा रामस्य कथायाः क्वापि भूतले ।
विश्वासोऽयं भवत्येव तेषां चित्ते निरन्तरम् ॥
अवतारास्तु रामस्य प्रकारैर्बहुभिः स्थिताः ।
शतकोटिन्यपाराणि सन्ति रामायणान्यपि ॥
चरितानि सुरम्याणि कल्पभेदैर्हरेः पुरा ।
नानाप्रकारैर्गीतानि सन्त्यनेकानि विष्टपे ॥
सन्तश्चित्ते विचार्येदं मा शङ्कां कुरुत क्वचित् ।
शृणुतैव रतिं मत्वा सादरं सत्कथामिमाम् ॥

रामोऽस्त्यनन्तोऽस्य गुणा अनन्ता
अनन्तमेषाञ्च कथाविलानम् ।
श्रुत्वा न संस्यन्ति विचित्रतां ते
येषां विचारा विमलाः सदैव ॥ ३३ ॥

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पूर्णाहुतिः—महाभारतीयं दृश्यकाव्यम्

——कविवरः श्री कृष्णप्रसाद घिमिरे——

यौधिष्ठिरं राजसूययज्ञमधिकृत्य उपक्रमितं शिशुपालशिरःपूर्णाहुत्या चोपसंहृतं कथावस्तु अष्टस्वङ्केषु संग्रथ्य मित्रवरेण घिमिरे कृष्णप्रसादशर्मणा नयपालाभिजनेन कविवरेण सारस्वतेभ्यः सहृदयेभ्य उपायनीकृतमिदं प्राच्यरूपकीयमर्यादोपबृंहितं दर्शननिदर्शनीभूतं भगवद्भक्तिरसाप्लावितं दृश्यकाव्यं 'सूर्योदये' प्रकाशयितुं प्रारभ्यतेऽस्माभिः। आशास्महे यदयमस्माकमुपक्रमः सहृदयपाठकानां तोषाय कविवर्यस्य प्रोत्साहनाय च नूनं प्रभवेत्! कविना प्राचीनसंस्कृतनाटकीयनियमानुगृहीता पात्रविशेषव्याहरणमाध्यमा सहृदयशिरश्शूलायिता प्राकृता भाषाऽत्र न व्यवहृतेति नाटकस्यास्य वैशिष्ट्येष्वन्यतमं वैशिष्ट्यं विजृम्भते।

—सम्पादकः

प्रथमोऽङ्कः

येनेदं विरचय्य मूर्तमखिलं ब्रह्माण्डमस्मिन् पुन-
र्वृक्षे बीजमिव स्वशक्तिनिवहैरात्मानमावेशितम्।
यत्सच्चिच्च शिवं विभाति जगतां चैत्यात्मनाऽऽनन्ददं
ध्येयं तद्भगवन्महो विजयते श्रीकृष्णनाम्ना स्फुरत्॥

(नान्द्यन्ते)

सूत्रधारः (नटेनाऽनुगेन सहैव प्रविश्य ऊर्ध्वमवलोक्य)—धन्यो विभुः श्रीकृष्णो भगवान् अतर्क्यमहिमाशाली नवकुसुमितसुरभितवनमाली। यस्य विभोरियत्तामवबोद्धुमद्यावधि कृतात्मानो ज्ञानिनः क्रान्तदर्शिनो योगिनोऽपि न पारयामासुरित्येवंभूते विषये तच्चरणशरणग्रहणमन्तरा क्षुद्रजीवोऽयं प्रयतते विज्ञातुमिति भृशं हास्यास्पदमेतत्सर्वेषां किञ्चिच्छ्रवणदर्शनोत्सुकानां महात्मनां भावुकानां भक्तवराणां महानुभावानाञ्च सभ्यानां समक्षम्। धिक् कष्टम्! दयालो! (इत्युच्चार्य भावावेशवशाद् भगवतो दयालुतां संस्मरन्नात्मानं धारयितुमेवाऽसमर्थो भूत्वा सशब्दं भूमौ निपतति)।

नटी (तावदेव प्रविश्य इतस्ततो विलोक्य)—हा धिक्! धिक्!! किमेतत्सञ्जातमस्थान एव? कथमापतितोऽयं दुर्भाग्योदयः? (दीनमुखं तत्समीप एवोत्तिष्ठन्तं नटमवलोक्य) किमेतत्? (नटः किञ्चिदप्यनुक्त्वा पूर्वावस्थायामेव अधोमुखो वितिष्ठते) मारिष! कथं शीघ्रमेव तत्रभवतो भावस्य पतनकारणम्? पुनर्व्यामूढ इव दृश्यते नटराजोऽयम्। कश्चिद्रोगविशेषेण आक्रान्तः किम्? किमिति नाभिभाषसे? (नटोऽश्रूणि पातयंस्तूष्णीं तादृश एव भूत्वा वितिष्ठते। तस्य तदवस्थाविलोकनमेव तदुत्तरं भवति। निरीक्ष्यैतत्सकलं सञ्जातकम्पाऽश्रूणि पातयन्ती तं स्वदक्षिणबाहुना किञ्चिदुद्धूय स्खलिताक्षरैः) कथय! कथय!! सद्रुतं हेतुमद्वाक्यम्? (नटस्तथापि तदुक्तिमशृण्वन्निव पूर्वावस्थायामेव तिष्ठति) कीदृशस्त्वं भोः! (स्वगतम्) किमयं मे प्राणनाथः सुधर्मा - सभाया अधिपतिं जगत्पतिं भगवन्तं वासुदेवं प्राप्तुकामस्तद्दर्शनार्थं तुच्छदासीं मामिहैवाऽतिसृत्य एकाकी सूक्ष्मतमं स्वं दिव्यशरीरं विगृह्य तत्रैव

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विगतो वा ? हा हताऽस्मि धिरक् ! (इत्युभौ हस्तौ स्वशिरसि निक्षिप्य विलपति ।)

सूत्रधारः (क्षणात् सचैतन्यो भूत्वा आर्तक्रन्दनं कुर्वन् गद्गदाक्षरैः)—जगन्नियामक ! नाथ !! (पुनः पूर्ववद्भवति)

नटी (किञ्चिच्छान्ता समाश्वस्य)—नश्यतां ममैतद-मङ्गलस्मरणम् । (नटं निरीक्ष्य ईषत्क्रुद्धा) धिङ् मूढ ! कथं किमेतत् ? कथं सञ्जातेयं दशेदृशी स्थितिश्च तत्रभवतो भावस्य ?

नटः (अञ्जलिं बद्ध्वाऊर्ध्वं पश्यन्)—द्वारकाधिपते ! विभो ! द्वारकापुर्यां सत्यपि भगवती तत्रभवति जगत्पतौ ये नाम वयं भगवन्तमाश्रिता भवत्प्रजाः स्मो यदेतेषां जगद्गतवस्तुविशेषाणां सम्प्राप्तावपि विशेषेण आधिदैविका-ऽऽधिभौतिकदुःखमात्राणां भोगाभावेऽपि नितरां प्रव्यथिता एभिर्विनश्वरै-र्विषोपमैर्विषयैः सम्पृक्तास्त्वच्चरणारविन्दै-क्याभाव-जन्मोऽयमाध्यात्मिको विरहः कथमनुभवति ? कथं न विजानाति तत्र भवान् सर्वज्ञो विश्वनाथो विभुरपि ? तदपि कियत्कालपर्यन्तं भोक्तव्यमित्यपि न विजानीमो वयं मोहमदान्धकारविभ्रष्टाः । अनन्त ! नाथ ! किमयपिम अनन्त एव वरीवर्ति वा ? (इत्युक्तमात्रे तदात्माऽपि ममोवचनातिगे ध्येये तदस्मिन् सच्चिदानन्दे वासुदेवे विलीनो भूत्वा सूत्रधारःशरीरवद् भूमौ सशब्दं निपतति । इतो नटी नटमुखबिलान्निःसृतं द्वाक्यकदम्बं विश्रुत्य भगवतो गुणरूपलीलादिभिराकृष्टचित्तौ उभावेव ईदृशीमवस्थां प्रापितावास्तामिति स्वात्मन्यनुभूय आनन्द-विह्वला सहर्षं सनूपुरौ स्वपादौ इतस्ततो विक्षिपन्ती सुमधुरं गायति । नेपथ्ये तदनुकूलं तौर्यत्रिकञ्च विश्रूयते ।

भगवन् जगन्नियन्ता त्वम् !

पूर्वमिदं सचराचरविश्वं स्वात्मन एव प्रकटितवांस्त्वम् ।
सुचिरं क्रीडन्नात्मविनोदैर्हरसि च तच्छक्तिधरस्त्वम् ॥
आत्मस्वरूपाञ्जीवनिकायांस्तद्भवरङ्गे नाटयसि त्वम् ।
कर्मण एवाऽत्रापि विबुद्धैर्ध्येयं प्राप्यं चादिशसि त्वम् ॥

भगवन् जगन्नियन्ता त्वम् !

सूत्रधारः (स्ववामप्रकोष्ठेन पृथ्वीं समालम्ब्य शरीरपूर्वभागं किञ्चित् समुत्थाप्य)—द्वारकाधिपते ! भगवन् ! समानीतोऽहं भूयोऽपि दुःखबहुलमिदमेव मर्त्यरङ्गमञ्चं महाविभूतिपतेर्भगवतो भवतस्तद्गुण-गायमयेन अनेनैव शब्दब्रह्मणा समाकृष्य । युक्त-मेवैतन्नाथ ! मर्त्यशरीरधारिणामस्मद्विधानां कृते त्विदमेव महासौभाग्यजनकं यद्वयमत्र अवशिष्टाना-मस्मदीयायुःखण्डानामनेनैव सुपथेन यत्सदुपयोगं कुर्मस्तत्रभवतो गुणरूपलीलादीनां श्रवणकीर्तनमनन-निदिध्यासनादिभिः धन्यतराः खलु वयं यदस्मादृशैः सम्पन्नतरैरपि श्वो वाऽद्यैव वाऽवश्यमेव मर्तव्यमिति स्मरामः कर्मणश्चाऽसतो विरमामः । (एतस्मिन्नन्तरे नटः समुत्थाय उभयोर्जानुनोः स्वासनं विनिर्माय तेनैवाऽऽधारेण उपविश्य अञ्जलिं बद्ध्वा तद्वार्तां शृण्वन्नास्ते) प्रकारेणाऽनेन स्वजीवनलीलां समापयितुमिच्छन् मनुष्य एव भवसागरं तरतीति तदेतस्मिन् विषये भवद्वाक्यमपि तु चैतदेव वरीवर्ति किं न वा ? भगवन् ! 'मद्वार्ता-यातयामानां न बन्धाय गृहा मताः' इत्यादि ।

नटी (आनन्दविह्वला सनूपुरतालं पुनस्तदेव उद्गायति पूर्वपादमात्रम्)—भगवन् जगन्नियन्ता त्वम् ?

सूत्रधारः—प्रिये ! सम्प्रापितोऽहं भवत्याऽपि पुनर्महानन्दसागारम् । विरमतु तावद्भवती । एह्यत्र आगच्छ ! (उत्थाय नटचा दक्षिणबाहुं स्ववामबाहुना समाकृष्य किञ्चिदग्रे गत्वा) अवगतं त्वयेतद् देवि ?

नटी (सोत्सुकम्)—किं भाव ! समुच्यताम्, आज्ञाप्यताञ्च, इयं दासी श्रोतुं समुत्सुका ।

सूत्रधारः (सहर्षम्)—प्रिये ! शृणु, अद्याऽहं समाज्ञप्तोऽस्मि सादरं साभिनन्दनमस्माकमावासस्थल-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मागत्य तत्रभवद्भिः सनातनधर्मोन्नायकैः प्रतीक्ष्य-चरणैर्विद्वद्वृन्दैः समवेतरूपेणैकमुखेन देशिकैरदेशिकैश्च महात्मभिर्भक्तवरिष्ठैश्च सुधीभिर्यत्तत्रभवता नटाचार्येण नेपाल-भारतदेशावधिश्रिता विशेषतोऽन्ये च भक्तप्रवरा वैदेशिका भावुका गुणगृध्नवो विद्वांसो महात्मानो देशिकसौन्दर्यादिकं सन्निरीक्षितुं नानादिग्देशान्तरात् समागताः पर्यटका विशिष्टाः प्राच्याः पाश्चात्याश्च विद्वदपश्चिमा विमत्सरा महानुभावा राष्ट्रियरङ्ग-शालायामेकं तादृशमेव तत्तज्जनसुमनोहरं भगवद्भक्ति-प्रधानं दृश्यकाव्यं सुचारुतयाऽभिनीय सुप्रसन्नाः समुच्छलद्भगवद्गत-रससन्दोहतुन्दिलाः संविधेयाः। यन्निरीक्ष्य तेषां हृदयाऽभ्यन्तरे 'असारः संसारोऽद्य वा श्वो वा वयमपि ध्रुवं मरिष्यामः, अतस्तदेव नित्यं वस्तु ब्रह्म प्राप्तव्यमेतदर्थमेव सततं यतितव्यमस्माभिरपि' इति भगवत्तत्त्वविचारमनननिदिध्यासनशीला भवेयुः सर्वेऽपि सभ्या दर्शकवर्गाश्चेति। तदत्राऽहं प्रिये ! सज्जोऽस्मि मद्भाग्योदयकालोऽयमुपस्थित इति मत्वा तदाज्ञापरि-पालनार्थम्। किमहमेव, अपितु सर्वोऽपि लोकः प्रयतते स्वं सफलीकर्तुं विशेषतः सत्कर्मणि तदपि ईदृशेऽभि-मततमे स्वेष्टवस्तुनि। स्वकृतव्यवसायेन जगत्पतेर्महा-विभूतिपतेस्तस्य तद्भक्तानां भावुकवराणां सभ्यानामेषां महात्मनाञ्च परितोषः सम्पत्स्यते। विषयश्चायमुभय-लोकश्रेयस्करः किलाऽस्माकं कृते। यत्तत्र जग-त्पतेर्भगवतः श्रीकृष्णस्याऽमुत्र चाऽस्यैव एषां महात्मनां भक्तवराणां सम्प्रसादनम्। तद्धन्योऽहं सञ्जातोऽस्मि। यतः—

सर्वं विनश्वरमिदं परिदृश्यमानं
स्वात्मैव सर्वजगतां किल नित्यवस्तु।
तद्ब्रह्म चैकसमृतं सदसत्परं यच्-
छ्रीकृष्ण एष विलसत्यधुना जगत्सु॥

तत्तस्यैव लीलाऽभिनयार्थं प्रयतिष्यामहे नान्येषां धनमानमदान्वितानां कुपुरुषाणां तद्गतविषयाशया-नाञ्च। को विचारस्तत्रभवत्या विषयेऽस्मिन् समुच्यतां तावत्? गृहस्थैर्गृहिणीनां सद्विचारानुसरणं कर्तव्यमेव। (सभ्यान् पश्यन् किञ्चिद्धसति)

नटी (सलज्जाऽधोमुखी भूत्वा)—योऽस्ति तत्र-भवतो नटवरस्य।

सूत्रधारः (साकूतम्)—नैतद्वाच्यम्। नाहं नटवरः, नटवरस्त्वेक एवास्ते जगत्यस्मिन् मयूरपिच्छाश्रितचूर्ण-कुन्तलो भगवान् श्रीकृष्णो व्यपगतभवप्रपञ्चतृष्णः। यो नटाकारानिमान् (सभ्यान् दक्षिणहस्तेन निर्दर्शयन्) जीववर्गान् अहर्निशं नाटयति इत्थंरूपेण जगद्रङ्ग-शालायाम्। सैष नटवरः श्रीकृष्णाभिधो जगदीश्वरः। तदस्तु (नटं निरीक्ष्य) मारिष ! विषयेऽस्मिन् कस्तवाऽभिप्रेतो भाव?

नटः (दर्शकान् सभ्यान् निर्दर्शयन्)—भाव ! महानु-भावैरेभिः सभ्यैःसमतामुपेतोऽहमपि अहंममाभिनिवेशा-द्युत्थितैः रागद्वेषादिभिर्नितरां नरीनृत्यमानहृदयो जन्म-मृत्युचक्रमारोपित एवाऽस्मि विशेषतस्तैरेव। परं तत्रभवतो नटाचार्यस्य ईदृश्यनुकम्पा सम्पत्स्यते चेच्छिलातले विस्फोटयमानावयवा तत्पूर्वकाल एव भोजकुलकलङ्कभूताद् दुष्टप्रकृतेः कंसस्य करयुगलाद् विभ्रंशितशरीरा भगवती जगज्जननी महामायेव तस्मा-दात्मानं ससुखं विनिष्काष्य अपरिच्छिन्नो वायुरिव स्वात्मनो नामरूप एव विहाय तदनन्ताकाशरूपे सच्चि-दानन्दात्मनि श्रीकृष्णतत्त्व एव विलीनो भविष्यामीति मे मतिः स्फुरति भाव ! (हस्तौ बध्नाति)

सूत्रधारः (सुप्रसन्नो भूत्वा)—तद्धन्योऽसि। मारिष ! कथय तावदस्मद्विचारानुकूलं प्राचीनमिदा-नीन्तनं वा किञ्चित्सारगर्भितं सुयोग्यं दृश्यकाव्यं दृष्टमस्ति त्वया, यदभिनीय स्वार्थे सफला भविष्यामो वयं सभ्यांश्चेमान् प्रहर्षयिष्यामः ?

नटः (क्षणं विचार्य स्मृतिमभिनीय) भाव ! पूर्वकविप्रणीतनाटके ......।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूत्रधारः (मध्य एव तद्वाक्यमाक्षिप्य)—नटप्रवीण ! पश्यास्माभिरभिनीयमानं दृश्यकाव्यं तादृशं स्याद्यस्मिन् भगवद्गतभावप्रचुरं तद्भक्तिभावितं गुणग्रामाभिरामं विविधलीलाललामं लोकोपकारकञ्च सम्भवेत् तदेवाभिनेयं स्यात् । स्मृतं त्वया ? यच्च पुनः—

दृष्ट्वा विभोर्गुणमयं परिपूर्णरूपं
तद्दृश्यकाव्य - मभिनीत - मनेकभावम् ।
सभ्या भवेयुरिह विस्मृतपूर्वरागाः
सच्चिन्मयाः स्वहितकर्मपराः कृतज्ञाः ॥

तद्वद ! सनामग्राहं नाटकमिदमभिनीयमस्माभिरिति ।

नटः—महान् खलु श्रीमतां सद्विचारः । परं त्वद्य दृढं विचार्यमाणेऽपि स्मृतिपथं नावगाहते भवन्मनोनुकूलं भावग्राहीदृशं नाटकरत्नमधुना । तत्कथं विना वंशेन वंशी निर्मातुं शक्यतेऽस्माभिरिति चिन्ताकुलोऽस्म्यहं भाव !

सूत्रधारः—अहो धन्यस्त्वम् । येन त्वयाऽकस्मादेकपद एव स्मारिता भगवत्प्रिया वंशी । (गद्गदाक्षरैर्गायति)

वृन्दावने मुदितधेनुधने तदानीं
गोपालराजतनयेन सुवादितैषा ।
हंहो ! क्षणात् कृतवती जडवस्तुवर्गं
चैतन्यहीनमसमं जडवत्तदन्यत् ॥

(नटं समीक्ष्य) मारिष ! किं कथितं रे त्वया नास्तीति ?

नटः (सत्रासम्)—स्मृतिपथं नावरूढमिति ।

नटी (सक्रोधम्)—किं रे ! न लज्जसे त्वमीदृशं वच उच्चारयितुम् ? नारीजनैरस्मादृशैरपि निरन्तरं विश्रुतं नेपाल - भारतस्थिताऽऽबाल-वृद्धवनितामनोहरं सुपठितं ममाऽप्यस्ति चैकं दृश्यकाव्यम् । तदपि विस्मृतं किं विमत्सरिणा त्वयाऽद्य ? धिङ् मूर्ख ! स्मर तन्मनोवंशनिर्वाहकेन गुणगृध्नुनैव भाव्यमिति यत् कथ्यते । (नटोऽधोमुखस्तिष्ठति । सूत्रधारं पश्यन्ती) भाव ! पूर्णाहुत्यभिधेयं भगवद्भक्तिपरिपूर्णं भावुकभक्तवृन्दानां विद्वदपश्चिमानामेषां सभ्यानाञ्च सुमनोग्राहि भगवतो वासुदेवस्य श्रीचरणारविन्दोपासकानामनुपासकानाञ्च ऐहिकामुष्मिक-सुगतिदुर्गतिनिर्दर्शनात्मकं दुष्टसंहारपरकं नाटकरत्नमेकं वरीवर्त्येव भक्तिप्रधानमीदृशे सदसदिति विशेषणप्रदानाऽसमर्थे सुतरां सुरासुन्दरीप्रिये समयेऽप्यस्मिंस्तदप्रियाणां मनुष्यमात्राणां सुमनोहारि चित्ताह्लादि च, विशेषतो मरणधर्मिणो वयमवश्यं श्वो वाऽद्य वा मरिष्याम इति मन्यमानानामपि मनोविमुग्धकारि ।

सूत्रधारः (सुप्रसन्नम्)—धन्या भवती । कथयतु तावत् केनेदं कल्पितं विनिर्मितं वा ? जानाति किं तत्रभवती ?

नटी—(सप्रौढम्)—जल्पितम्, न तु कल्पितम् । जानाम्यहं नाथ ! नयपालदेशाभिजनेन तद्राजधानीमेवाऽधिवसता "धिमिरे" इत्युपाह्वेन काश्यपवंशावतंसेन श्रीकृष्णप्रसाद - संप्राप्तगीर्वाणवाणीविलासेन कृष्णप्रसादशर्मणा ।

सूत्रधारः (स्मृतिमभिनीय)—आम् ! स्मृतं मयाऽपि । कार्यातिपातादीदृशं बहुशो दृष्टपूर्वं नाटकरत्नमपि विस्मृतमासीन्मयेति स्वयमेव सुतरां लज्जामनुभवामि । हन्त अथवेदृशं सम्भवति यदाकदा । यतः—

व्यग्रे कार्यक्रमे नित्यं मनुष्याणां मनोऽप्यहो ।
तदैक्यत्वात् तदन्यत्तु न संस्मरति जातुचित् ॥

आस्तां तावत् ! युक्तमुक्तं भवत्या । तदेतदेव अभिनेयमस्माभिः संदृष्टसकललोकस्थितिभिर्वीतरागैर्लोकयात्रार्थमात्रार्थपरकैः "अधिकं योऽभिलिप्सेत स स्तेनो दण्डमर्हती"ति विचारयद्भिश्च । तदत्र सज्जा भवतु भवती पात्राणामुपयुक्तसज्जासम्भारसम्पादनार्थम् । अनेनैव दृश्यकाव्येन संस्कृतनाटकसंसारेऽद्दृष्ट-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूर्यनमस्कारो व्यायामः

– डॉ० नरेश झा शास्त्री –

(३)

सूर्यनमस्कारस्य उपयोगिता

व्यायामविशारदाः कथयन्ति यत् साधारणो व्यायामः शरीरस्य सर्वाङ्गानि प्रभावयति। अत एव बाह्यानां शरीरावयवानां दार्ढ्याय विभिन्ना व्यायामा निर्दिष्टास्तैः। किन्तु एतादृशा अपि व्यायामा अपेक्ष्यन्ते यैः आबालवृद्धानां स्त्री-पुरुषाणां निर्धनानां धनवताञ्च सर्वेषामान्तराणि इन्द्रियाणि, स्नायवः बाह्याश्च अवयवा अपि सुदृढा निरामयाश्च भूत्वा शरीरे ओजो जीवनशक्तिर्बलञ्च संचिनियुः। शरीरस्य कतिपयानि अङ्गानि एतादृशानि सूक्ष्माणि महत्त्वपूर्णानि च येषु कस्यापि व्यायामस्य प्रभावो न भवति। अत एव तानि सुप्तानि आलस्ययुक्तान्येव च तिष्ठन्ति। तेषां जागरणाय आलस्यापनोदनाय च प्राणायामो बीज-मन्त्रोच्चारणञ्च आवश्यकम्। सूर्यनमस्कारे द्वाविमौ गुणौ विशेषतस्तिष्ठतः याभ्यां शरीरस्य सर्वाणि सुप्तान्यङ्गानि जागरितानि भवन्ति, तत्र च महती शक्तिः संक्रामति। अत एव स्वास्थ्य-सामर्थ्य-दीर्घायु-पाञ्च सर्वोत्तमं साधनं सूर्यनमस्कारो नाम व्यायामः।

सूर्यनमस्कारेण व्यायामेन औदर्या आन्त्रिकाश्च विकाराः, मस्तिष्कविकृतयः, हृद्दौर्बल्यं फुफ्फुस-मेरुदण्डविकाराश्च विनश्यन्ति। मेरुदण्ड-मस्तिष्कौ स्वास्थ्यशक्तेः आगारौ किल। अनेन व्यायामेन तयो-विकाराः नश्यन्ति, विकाशश्च जायते। अपि च, शरीर-दार्ढ्योदरान्त्रविकारसंभूताः मलावरोधाऽऽमवाता-

---

पूर्वेण गद्यबहुलेन सुदीर्घवाक्येन च सत्यक्तप्राकृतभाष विरचितेन एषां सभ्यानां विदुषां महात्मनाञ्च काषाय-वस्त्रावगुण्ठितात्मनां विमत्सरं सुमनो रञ्जयिष्यामः। तद्गच्छामस्तावत्। (इति जिगमिन्ति सर्वे)

(तावदेव नेपथ्ये महान् कोलाहलः श्रूयते। पुनर्निवृत्य इतस्ततो भ्रान्त्वा)

मारिष! ह्यपूर्वोऽयं कोलाहलः श्रूयते। तद्गच्छ गच्छ! समागच्छ च शीघ्रमेव यथावत् विबुद्ध्य! स्मर्तव्यश्चात्र त्वया कर्मण्यस्मिन् कालातिपातो न भवेदिति।

नटः (बहिर्निःसृत्य पुनः प्रविश्य च सूत्रधारं साञ्जलिबन्धं प्रणमन्)—भाव! भगवन्तौ श्रीराम-कृष्णौ सुधर्माख्यं स्वसभं सुशोभयितुं स्वप्रासादाद् विनिष्क्रान्तौ राजमार्गतस्तत्रैव गन्तुकामौ स्तः। तदनयोः सन्दर्शनार्थं ससङ्गं समागतानां द्वारकानिवासिनाम्, अन्येषाञ्च आगन्तुकानां त्वद्दर्शनोत्सुकानां सम्मर्देन सञ्जातोऽयं 'भगवान् श्रीकृष्णो विजयताम्' इत्यादि-रूपकस्तन्मुखनिस्सृतरवकोलाहलो दिग्दिगन्तानभि-व्याप्य विजृम्भते।

सूत्रधारः (सहर्षम्)—एतदपि सौभाग्यकरं धन्य-तममेव यन्मङ्गलात्मकेऽस्माकं प्रस्थानसमये सुमङ्गल-रूपस्य तत्रभगवतो मङ्गलात्मकेन सुगृहीतेनानेन 'श्रीकृष्णो विजयतामि'त्यादिमङ्गलाशंसनेन जगदीश्व-रस्य विश्रुततादृशजगदुद्धारककर्मणा चास्माकं मङ्गल-मेव सम्भवति। एतदेव हिततममपि। यतः—

एतस्य गोपैः सह वर्धितस्य
सद्ब्रह्मणस्तद्गुणरूपगानम्।
भवे भवेन्नो हृदये विभाव्यं
ध्येयञ्च मर्तव्यमिति प्ररूढम्॥

तदागच्छ त्वम्। समागच्छतु भवती च। गच्छामस्तावत्।

(निष्क्रान्ताः सर्वे)

॥ इति प्रस्तावना ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ऽर्श-बहुमूत्रादयो रोगा न भवन्ति । हृत्-फुफ्फुस-दार्ढ्यात् कास-श्वास-क्षयादिका भीषणतरा रोगा अपि निर्मूलतां यान्ति । मेरुदण्डविकारशान्त्या पक्षाघाताऽन्त्रवृद्धिरोगावपि प्रशमतः ।

सूर्यनमस्कारव्यायामे प्रयुक्ताः 'ॐ ह्रां' इत्यादयः शब्दाः दीर्घोच्चारणेन शरीरपुष्टिकरा भवन्ति । तत्र 'ॐ' इत्युच्चारणेन मस्तिष्कहृदन्नाशयाश्च चालिता बलिनश्च भवन्ति । 'ह्रां' इत्युच्चारणेन मस्तिष्कम्, हृत् पचनेन्द्रिय-श्वासनलिका-कण्ठ-फुफ्फुसा उपरिवाहिन्यो नाड्याश्च सशक्ता भवन्ति ।

एवमेव नमस्कारव्यायाम-दशासनेषु आदिमयोर्द्वयोः आसनयोः अवस्थानजानुस्पर्शक्रमेण उपयोगितावर्णनप्रसङ्गे लिखितं यत् अवस्थानासनेन आकर्षणविकर्षणाभ्यां ग्रीवोरो - हस्ताङ्गुलि - बाहूदर - कटिपादानां शक्तिर्वर्धते । जानुस्पर्शेन च हस्ततलम्, हस्ताङ्गुल्यः, पिण्डोर्वोः पृष्ठभागस्य स्नायवः, उदर - नितम्ब - पीठानां स्नायवः, नाभिपार्श्ववर्तिनस्तन्तुजालाः (Solar Plexus) उत्तेजिताः भवन्ति, तेषां शक्तिश्च वर्धते ।

अतो व्यायामोऽयं सर्वैः स्वशक्त्यनुसारं करणीयः, पर्यन्ते किञ्चित्कालं विश्रामोऽपि विधेयः ।

सूर्यनमस्कारस्य विकासक्रमः

सूर्यनमस्कारव्यायामस्य विकासक्रमोऽपि नूनं मननीयः । साम्प्रतिकस्य सूर्यनमस्कारव्यायामस्य मूलस्रोतांसितु वेदा एव । **उद्यन्नद्य मित्रमहः** इत्यारम्भ तिस्रो ऋचः ऋग्वेदस्य तथा **हंसः शुचिषद्** इत्येका ऋक् यजुर्वेदस्य मुख्यतः सूर्यनमस्कारप्रधानभूतः । तृचाकल्प-हंसकल्पनमस्कारयोर्द्वादशनमस्कारैरावर्तनं भवति । **उद्यन्नद्य मित्रमहः** इत्येतास्तिस्र ऋचः द्वादशभिर्भागैः विभज्य एकैकभागमादाय नमस्कारः क्रियते । एवमेव **हंसः शुचिषद्** इति यजुर्वेदर्चं विभज्य हंसकल्प - नमस्कारः । ऋग्वेदीयानामासाम् ऋचां व्याख्या अथर्ववेदे समुपलभ्यते । यथा—

उद्यते नमः उदायते नमः उदिताय नमः ।
विराजे नमः स्वराजे नमः सम्राजे नमः ॥
अस्तंयते नमः नमोऽस्तमेष्यते नमोऽस्तमिताय नमः ।
विराजे नमः स्वराजे नमः सम्राजे नमः ।[1]

अत्र त्रयोदश नमस्कारा वर्णिता इति विशेषः । एवमेव वाल्मीकीये रामायणे आदित्यहृदयस्तोत्रेऽपि त्रयोदश नमस्कारा उपलभ्यते । ते चेत्थम्—

नमः पूर्वाय गिरये पश्चिमायाद्रये नमः ।
ज्योतिर्गणानां पतये दिनाधिपतये नमः ॥
जयाय जयभद्राय हर्यश्वाय नमोनमः ।
नमोनम सहस्रांशो आदित्याय नमोनमः ॥
नम उग्राय वीराय सारङ्गाय नमोनमः ।
नमः पद्मप्रबोधाय प्रचण्डाय नमोऽस्तु ते ॥
ब्रह्मेशानाच्युतेशाय सूरायादित्यवर्चसे ।
भास्वते सर्वभक्षाय रौद्राय वपुषे नमः ॥
तमोघ्नाय हिमघ्नाय शत्रुघ्नायामितात्मने ।
कृतघ्नघ्नाय देवाय ज्योतिषां पतये नमः ॥
तप्तचामीकराभाय हरये विश्वकर्मणे ।
नमस्तमोऽभिनिघ्नाय रुचये लोकसाक्षिणे ॥[2]

अत्र 'उद्यते नमः' इति पदं पूर्वाय गिरये' इति पदेन सूचितम् । तथैव 'अस्तमिताय नमः' इति पदं 'पश्चिमाद्रये नमः' इति पदेन संसूचितम् । अन्यत्रापि एवमेव तुलनात्मकं विवेचनं कर्तुं शक्यम् । ऋग्वेदस्य एकस्मिन् मन्त्रे प्रणिपातपूर्वकं नमनं निर्दिष्टम् ।[3] श्रीमद्भागवते(८.१६.४२)—

कृत्वा प्रदक्षिणां भूमौ प्रणमेद् दण्डवन्मुदा ।

(शेषांशः आवरणपृष्ठे ३)

१. अथर्व० १.१. २२-२३ ।

२. वाल्मी० रामा० युद्ध०, सर्ग १०५ ।

३. ताम् आनमोभिरुरुचक्षसो० ६. ५. ५१.९ ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रूप-दीपिका

— श्री रामानन्द द्विवेदी —

३.

(तिङन्तम्)

एकः पठति विद्वान् हि स्वल्पज्ञौ पठतश्च द्वौ ।
पठन्ति बहवः छात्राः प्रसृतं वचनान्तरम् ॥

परस्मैपदे (—पद्)

(—प्रथमः पुरुषः)

रामः पपाठ त्रेतायां वेदं गुरुगृह गतः ।
अपठद् ह्यः कथां भक्तः प्रागपठीद् विचक्षणः ॥
देवदत्तः पठत्यद्य ताश्च रामायणीं कथाम् ।
बालः पठिष्यति ह्याशु पठिताग्रे नृसन्ततिः ॥
वृद्धः पठेद् विधिं दृष्ट्वा बालः पठतु चाज्ञया ।
शुभाशिषा युवा पठ्यात् पठतात् कामयेऽखिलः ॥
अविघ्नमभविष्यच्चेदपठिष्यत् स निश्चलः ।
भाग्येन लभ्यते जन्म वरेण पठ्यते कथा ॥

(—मध्यमः पुरुष)

मन्ये जन्मान्तरे त्वञ्च पेठिथ श्रीहरेः कथाम् ।
अवश्यमेव त्वं चेह रामायणं पुराऽपठीः ॥
पूर्वे दिने तु बालेषु सुस्वरमपठस्तथा ।
पठस्यद्य कथां रम्यां त्वमेकाग्रतया त्विह ॥
शीघ्रमेव समारोहे पठिष्यसि कथां हरेः ।
ईषद् दिनान्तरे चैव विद्वत्सु पठितासि त्वम् ॥
एवमेव त्वनिर्विण्णः शान्त्या हरेः कथां पठ ।
युक्तमात्मप्रबोधाय त्वं पठेः वरदां कथाम् ॥
प्रेरयत्वीश्वरो यत्त्वं पठ्याः सर्वहिताय वै ।
अविघ्नमभविष्यच्चेदपठिष्यस्त्वमव्ययः ॥

(—उत्तमः पुरुष.)

बाढं हि पपठाहञ्च जन्मान्तरे हरेः कथाम् ।
निस्सन्देहो हि प्रागेव रामायणमपाठिषम् ॥
अद्यतनाद्धि प्रागेव चापठं बालक्रीडनम् ।
साम्प्रतं तु पठाम्यद्य रामविवाहवर्णनम् ॥
शीघ्रमेव पठिष्यामि रामसुग्रीवमित्रताम् ।
पठितास्मि ततश्चाहं राज्याभिषेकमङ्गलम् ॥
आदिष्टवाहं तां पठानि च निरन्तरम् ।
रामस्य चरितं दिव्यं पठेयं युक्तमेव तत् ॥
विदधातु कृपामीशः पाठ्यासं भक्तितः सदा ।
अविघ्नमभविष्यच्चेदपठिष्यं स्थिरं त्वहम् ॥

आत्मनेपदे (–वृत्)

(प्रथमः पुरुषः)

आत्मा हि ववृते चाग्रे निःसन्देहं युगात्पुरा ।
अवर्तत दिनात्पूर्वं चावर्तिष्टोदये रवेः ॥
स वर्तते समन्ताद्धि वर्तिष्यते त्वतः परम् ।
युगस्यास्यावशेषेऽपि वर्तिता स न संशयः ॥
देहदृष्ट्योचितं केह नरो वर्तेत धर्मतः ।
ईश्वरस्याशिषा सोऽपि वर्तिषीष्ट सुकर्मणि ॥
अनुरुद्धो मया चैवमनासक्तः स वर्तताम् ।
अविघ्नमभविष्यच्चेत् सोऽवर्तिष्यत निश्चलः ॥

(—मध्यमः पुरुषः)

त्वं हि ववृतिषे चाग्रे निस्सन्देहं युगात्पुरा ।
अवर्तथा दिनात्पूर्व चावर्तिष्ठाः दिनोदये ॥
वर्तसे त्वं समन्ताद्धि वर्तिष्यसे त्वतः सरम् ।
युगस्यास्यावशेषेऽपि वर्तितासे न संशयः ॥
देहदृष्ट्योचितं यत्त्वं वर्तेथाः धर्महेतवे ।
शुभाशिषा सतां चैव वर्तिषीष्ठास्तु सत्पथे ॥
परामर्शोऽपि संघर्षे वर्तस्व निगतज्वरः ।
अविघ्नमभविष्यच्चेत्त्वमवर्तिष्यथाः स्थिरम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(—उत्तमः पुरुषः)

अहं हि ववृते चाग्रे निःसन्देहं युगात्पुरा।
प्रागुदयादवर्तेऽहं चार्वतिष्युदये रवेः॥
वर्तेऽधुना समन्ताद्धि पतिष्येऽहमतः परम्।
युगस्यास्यावशेषेऽपि वर्तिताहे न संशयः॥
देहदृष्ट्योचितं चाहं दर्तेय धर्महेतवे।
विधेयादीश्वरो यच्च धर्मेऽहं वर्तिषीय हि॥
आदिष्टवानहं वर्ते त्वनासक्तः सुकर्मणि।
अविघ्नमभविष्यच्चेदवर्तिष्ये स्थिरं त्वहम्॥

सोपसर्गसंज्ञा

जीवनस्यामुखे ह्येव प्राज्ञः स्यादीशसम्मुखः।
कर्तव्यविमुखो न स्यान्नसंघर्षपराङ्मुखः॥
स विकासोन्मुखो जीवो यो धर्माभिमुखो भवेत्।
देवेशः सुमुखो यस्य वराणां प्रमुखश्च चः॥

सोपसर्गधातुः

यदा-यदा हि धर्मस्य ग्लानिर्भवति वै तदा।
आविर्भवति देवश्च पराभवति दुर्जनम्॥
अभिभवति विघ्नौघं परिभवति पातकम्।
अनुभवन्ति जनाः सौख्यान् प्रभवति सुखं सताम्॥
संभवति हरिश्चैवं विभवन्ति मनीषिणः।
प्रादुर्भवति सद्धर्मस्तिरोभवत्यसत्तथा॥

गणविकरणाः

(परस्मैपदे)

भवति भूयते भूतः भूत्वा भवितुमीदृशम्।
शब् विकरणकाः गुण्याः भ्वादयः स्युः अ-धारकाः॥
अत्ति चैवद्यते जग्धः जग्ध्वा चात्तुं तथैव च।
लुग् - विकरणकाः ज्ञेयाः शून्यधृताः अदादयः॥
जुहोति हूयते हुत्वा हुतः होतुं यथाक्रमम्।
श्लुविकरणको द्वित्वी जुहोत्यादिश्च शून्यधृत्॥
दीव्यति दीव्यते द्यूतः देवित्वा देवितु तथा।
श्यन्-विकरणसंयुक्ताः दिवादयो य-धारकाः॥
सुनोति सूयते सुत्वा सुतः सोतुं यथाक्रमम्।
श्नु-विकरण काश्चैवं स्वादयः स्यु र्नु-धारकाः॥

तुदति तुद्यते तुन्नस्तुत्त्वा तोत्तुमिति क्रमात्।
श-विकरणकाः ज्ञेयास्तुदादय अ - धारकाः॥
रुणद्धि रुध्यते रुद्धः रुद्ध्वा रोद्धुमिति क्रमात्।
श्नम्-विकरणसंयुक्ताः रुधादयो न-धारकाः॥
तनोति च तनित्वा च तनितुं तत तन्यते।
उ-विकरणकाश्चैवं तनादय उ-धारकाः॥
क्रीणाति क्रीयते क्रीतः क्रीत्वा क्रेतुं यथाङ्किताः।
श्ना-विकरणसंयुक्ताः ना-धृतः क्र्यादयः स्मृताः॥
चोर्यते चोरयत्येव चोरयित्वा च चोरितः।
चोरयितुमिव स्वार्थणिजन्ताश्च चुरादयः॥

गणविकरणाः

(आत्मनेपदे)

वर्तते वृत्यते वृत्त वृत्त्वा वर्तितुमीदृशम्।
शब् - विकरणकाः गुण्याः भ्वादय आत्मनेपदे॥
शयित शय्यते शेते शयित्वा शयितुं तत्क्रमम्।
लुकविकरणकश्चैव - मदादिरात्मनेपदे॥
मीमीते मीयते मित्वा मितो मातुं तथेदृशम्।
श्लु-विकरणको द्वित्वी जुहोत्याद्यात्मनेपदे॥
बुद्ध्यते बुद्ध्यते बुद्ध बुद्ध्वा बोद्धुं तथाक्रमम्।
श्यन्-विकरणसंयुक्तो दिवादिश्चात्मनेपदे॥
सुनुते सूयते सुत्वा सुतः सोतुं यथाक्रमम्।
श्नु-विकरणके स्वादौ स्यू रूपाण्यात्मनेपदे॥
तुदते तुद्यते तुन्नस्तुत्त्वा तोत्तुमिति क्रमात्।
श-विकरणसंयुक्ते तुदादौ चात्मने पदे॥
रुन्धे च रुद्ध्यते रुद्ध रुद्ध्वा रोद्धुमिति क्रमात्।
श्नम्-विकरणसंयुक्तो रुधादिश्चात्मने पदे॥
तनुते च तनित्वा च तनितुं तत तन्यते।
उ-विकरणश्चैवं तनादिश्चात्मने पदे॥
क्रीणीते क्रीयते क्रीतः क्रीत्वा क्रेतुं यथाङ्कितम्।
श्ना-विकरणसंयुक्ताः क्र्यादयश्चात्मने पदे॥
चोरयते णिजन्तश्च चुरादिश्चात्मने पदे।
चोरितश्चोरयित्वा च चोरयितुं च चोर्यते॥

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रेडियो-दूतम्—खण्डकाव्यम्

—— श्री पद्मानन्द चतुर्वेदी, एम० ए० साहित्याचार्यः ——

संस्कृतविद्वत्समाजे लब्धप्रतिष्ठानां श्री सरस्वतीप्रसाद चतुर्वेदी महाभागानामनुजैः श्री पद्मानन्द चतुर्वेदी महोदयैः भारतीयस्वातन्त्र्यसङ्ग्रामावसरे प्रयागनगरेण यत् गुरुतरं क्रान्तिकार्यं कृतम्, तस्य परिचयात्मकं तीर्थराज-माहात्म्योपबृंहितमिदं 'रेडियो-दूतम्' नाम खण्डकाव्यं द्विशतश्लोकैर्निबद्धं यद्विषये स्वयं कविरेव वक्ति—

कृतं रेडियो - दूतमेवं विनीतं परिष्कारपूर्णं नवं खण्डकाव्यम् ।
मिलद्वर्गभाषं तथा संस्कृतञ्च विभात्यत्र वैचित्र्यजातं मनोज्ञम् ॥
हिन्दी - तथा - संस्कृत - देशजाया भाषा निबद्धाऽस्ति स्थले विशेषे ।
समुद्ररूपं रचितं नवीनं मे रेडियोदूतमथाऽस्तु शान्त्यै ॥
न व्याकरणपूरकं न कठिनसूत्रबन्दीकृतं नवा प्रथितछन्दसां सरणिरत्र संदृश्यते ।
नवं नपदयोजना गतिसुगेयतासंवृता भविष्यति कुतर्किणां पुरातनमनस्विनाम् ॥

मनोमोदकस्यास्य काव्यस्य विषये एतावन्तमेव व्याहारमलं मन्यमाना वयं कविवरं सादरं सभाजयामः ।—सम्पादकः

काचिद्धीरा निपुणगृहिणी त्रस्तकौटुम्बवार्ता विज्ञं पुत्रं कलहनिरतं त्यक्तवान् यः प्रयागम् ।
यावद्वर्षं कुशलसहितं तस्य पत्रं न लब्धं रेडियो-दूतं प्रहितनयना वाक्यमेवं जगाद ॥ १ ॥
सृष्टेराद्यस्त्वमसि सरसः सर्वसम्पन्नशक्तिस्तेजोयोगाद्विविधरचना - सूक्ष्मयन्त्रं दधासि ।
विद्युच्छक्तिप्रसृतभुवनाकाशपातालोको नानारूपं जनहितकृतं वर्धयस्यादरेण ॥ २ ॥
विज्ञानेषु त्वमसि सरलो यन्त्रसंवर्धितश्रीः सर्वा वार्ता जनमुखसरत्सूचिकां संवृणोपि ।
इत्थं नानानगरनगरी-चित्रवैचित्र्यगीतं वाद्यं नाट्यं श्रवणसुखदं श्रावयस्यात्मबन्धून् ॥ ३ ॥
ते नैपुण्यं जगति विदितं दूतरूपं स्मरामि मे सन्देशं नय परिचितं मार्गमेवं वदामि ।
दृष्ट्वा देशान् प्रकृतिनियमैर्वेषभाषाविशेषानन्वेष्टव्यं मम शुभमनस्कामनासिद्धिहेतुः ॥ ४ ॥

प्रकीर्य पुष्पाञ्जलिमत्र पावने प्रयागराजे परितो विलोक्य ।
क्व मे गतः प्राणप्रियस्तनूजो ब्रवीमि तत्त्वं स्वमनोव्यथायाः ॥ ५ ॥
दिनानि नीतानि कियन्ति नागतं त्वदीयपत्रं व्यथतेऽन्तरात्मा ।
जानाति मातैव सुतस्य मूल्यं या गर्भमारभ्य पुपोष बालम् ॥ ६ ॥
देशान्तरं द्रष्टुमथाभिलाषः स्विन्मायया व्याकुलितोऽसि सत्यम् ।
गेहं धनं मन्दिरमात्मनारीं प्ररूढबाष्पां जननीं विमूढाम् ॥ ७ ॥
मन्ये पिता तेन करोति नेहं यतो विवादी तव चित्तवृत्तिः ।
तथापि सामाजिकबन्धने सदा व्रजन्ति सामाजिकबन्धनज्ञाः ॥ ८ ॥
सनातनी पद्धतिरत्र पूज्यते सनातनो भारतधर्मदेशः ।
सनातना मे ऋषयः कवीश्वराः सनातनी सृष्टिरिहैव कथ्यते ॥ ९ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ऋचां प्रभावः स्मृतिशास्त्रशालिनामारण्यकानाञ्च तपोधनानाम् ।
गीतोपनैषद्यविचारसारा विस्तारिता धर्मसनातनाख्याः ॥ १० ॥
यथा नदीनां सरणिर्विभिन्ना समुद्रमासाद्य भवन्त्यरूपा ।
तथा पृथग्वादिसमानधर्मः सर्वेश्वरे गच्छति शून्यरूपताम् ॥ ११ ॥
विभिन्ना पद्धतिर्वादे विदेशीयाः स्वदेशीयाः । वरा ते भारतीया यत्र वेदाः शास्त्रधर्माश्च ॥ १२ ॥
कथं स्यान्न्यूनता धर्मे ऋषीणां यत्र संवादः । जनानां दुःखनाशाय समानो धर्मसञ्चारः ॥ १३ ॥
सदा सर्वे सुखं धनधान्यसम्पत्ति बलारोग्ये । समानं वर्षशतमायुः लभित्वा यान्तु मोक्षत्वम् ॥ १४ ॥
यदि स्वधर्मेऽस्ति नैव निष्ठा कथं विधर्मे व्रजेत्प्रतिष्ठा ।
यदि स्वमातुर्न पादसेवा कथं परार्थेऽस्ति देशसेवा ॥ १५ ॥
स्नात्वा पूर्वं त्रिवेण्यां जनरवभरितां देववन्द्यां प्रयागे,
ख्यातां प्राचीनरूपां सगरसुतऋषिक्रोधसंस्कारपूर्णाम् ।
द्रष्टव्या मध्यभागे गमननिपुणिका बाष्पयन्त्री प्रसिद्धा,
या गच्छन्ती नयति त्यजति मानवानां समूहम् ॥ १६ ॥
गङ्गा यत्र चिनोति यामुनजलं दुर्गस्थकोणे वसन्,
सीतारामपदारविन्दजतया भक्त्या शयानः कपिः ।
चिन्ताध्यानपरः सदा जयकरः सेवापरो निर्मलः
कल्याणं विदधाति कीर्तिविमले स्थित्वा द्वयोः सङ्गमे ॥ १७ ॥
गङ्गा यत्र तरङ्गभङ्गचपला कालिन्दिसंश्लेषिता,
अन्तर्गर्भसरस्वती रसवती विद्योतते शान्तिदा ।
यत्रैतत्त्रितयं विभाति नगरे सौन्दर्यसारान्विते,
सोऽयं सर्वस्वतन्त्रधर्मगरिमा श्रीतीर्थराजः स्मृतः ॥ १८ ॥
दुर्गस्यान्तर्लसति विविध - श्रेणि - शाखा - प्ररोहः,
स्निग्धच्छाया - फलसमुदयाद् देवरूपेण तुल्यः ।
बालः कृष्णः परमकुतुकी यस्य पत्रे शयित्वा
मोक्षार्थीनां परमसुखदो बर्गदः सर्वपूज्यः ॥ १९ ॥
बौद्धाख्यानं जगति विदितं यस्य कृत्येन विश्वे,
स्थाने - स्थाने सरलनियमालेखनं प्रस्तरेषु ।
धम्मादेशो मिलति निहितो मे प्रयागस्य दुर्गे,
तत्रैवाऽस्ते विमलजलदः कीर्तनीयः शकन्धुः ॥ २० ॥
यस्य गुणावलिचर्चा नयति पटुत्वं नृपालसङ्घस्य ।
सत्य - दया - करुणाया मूर्तिरशोकः कथं न स्मर्तव्यः ॥ २१ ॥

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(९२ पृष्ठस्य शेषांशः)

इत्यत्र दण्डवन्नमनपूर्वकः प्रणामः समुल्लिखितः ।

कूर्मपुराणे (१८.४५) आदित्यहृदयवर्णनप्रसङ्गे सूर्यनमस्कारकालविषये लिखितं यत्—

प्रातःकालेऽथ मध्याह्ने नमस्कुर्याद्दिवाकरम् ।

अत्र किञ्चिद्विचार्यते—श्रीमता औन्धमहाराजेन श्री भगवान्राव श्रीनिवासराव पन्तप्रतिनिधि महादयेन स्वरचिते 'सूर्य-नमस्कार'-नाम्नि ग्रन्थे (पृ० ११) नमस्कारविषये लिखितं यत् "ब्राह्ममुहूर्ते एव नमस्कारो विधेयः ।" एतत्तु उपर्युक्त पौराणिकवाक्यस्य समन्वयात्मकमेव, तथापि मध्याह्ने कथं स न क्रियते? मध्याह्नः शारीरिकव्यायामस्य न हितावहः समयः । उपर्युक्तपौराणिकवचनस्य पुनरयमाशयो यदेष व्यायामः प्राचीनतामूलकः ।

भगवता श्रीकृष्णेनापि सूर्योपस्थानं विहितमिति श्रीमद्भागवते (१०.७०.७) स्पष्टम्—

उपस्थायार्कमुद्यन्तं तर्पयित्वाऽऽत्मनः कलाः ।

भविष्यपुराणे धार्मिकदृष्ट्या सूर्यनमस्कारविषये विशदं वर्णनमुपलभ्यते । तत्र धार्मिक-दृष्टिर्भवतु नाम, किन्तु शारीरिकव्यायामदृष्ट्यापि स ग्राह्य एव । अत्र पुनः सूर्यनमस्कारो विकासदृष्ट्या एव आलोच्यते ।

दुर्गसंसारकान्तारमपारमभिधावताम् ।
एको भानुर्नमस्कार्यः संसारार्णवतारकः ॥
रत्नानामाकरो मेरुः सर्वाश्चर्यमयं नभः ।
तीर्थानामाश्रयो गङ्गा देवानामाश्रयो रविः ॥
एवमादिगुणो भोगो भानोरमिततेजसः ।
श्रुतो मे बहुशः सिद्धैर्गीयमानैस्तथामरैः ॥[1]

पूर्वेतिहासमालोचयन् शतानीकः प्रतिपादयति यद् अपारं दुर्गसंसारकान्तारमभिधावतां जनानां संसारार्णवतारक एको भानुनमस्कारः प्रथितः । रत्नानामाकरो यथा सुमेरुः, यथा सर्वाश्चर्यमयं नभः, यथा च तीर्थानामाश्रया गङ्गा भुवि विख्याता तथैव देवानामाश्रयो रविर्निगदितः । पुनर्दार्ढ्यमापादयन् शतानीकः कथयति यत् एवंगुणगरिम्णोऽमिततेजसः भानोः वैशिष्ट्यं नाहं केवलं वच्मि, किन्तु सिद्धैरमरैश्चापि बहुशो वर्णितम् । अनेन बहुचर्चितसूर्यनमस्कारस्य तत्कालीनलोकप्रियता सिद्ध्यति ।

पुनस्तत्रैव तन्मतं ब्रह्मणापि परिपुष्टीकृतम्—

त्रिभिः प्रदक्षिणां कृत्वा यो नमस्कुरुते रविम् ।
भूमौ गतेन शिरसा स याति परमां गतिम् ॥[1]

अत्र 'भूमौ गतेन शिरसा' इति कथयित्वा सूर्यनमस्कारप्रतिपादितस्य 'अष्टाङ्गप्रणामस्य' 'उरसा शिरसे' इत्यादिवाक्यस्य मूलं समुपन्यस्तम् ।

गौतमधर्मसूत्रेऽपि (३.५) एतन्माहात्म्यमेवमुक्तम्—

सूर्यस्य त्रीन्नमस्कारान् स्वप्ने सिक्त्वा गृही चरेत् ।

पुरा काले मानवाः धर्मपालने दक्षाः । अतः शारीरिकशिक्षा अपि धार्मिकशिक्षायामन्तर्निगूह्य दीयते स्म । फलतो धार्मिकशिक्षायां शारीरिकशिक्षा अन्तर्भुक्ताऽऽसीत् । यथा तत्रैव भविष्यपुराणे—

कृत्वा प्रदक्षिणं यस्तु नमस्कारं प्रयोजयेत् ।
राजसूयाश्वमेधाभ्यां सकलं विन्दते फलम् ॥
नमस्कारः स्मृतो यज्ञः सर्वयज्ञोत्तमोत्तमः ।
नमस्कृत्वा सहस्रांशुमश्वमेधफलं लभेत् ॥
प्रणम्य दण्डवद् भूमौ नमस्कारेण योऽर्चयेत् ।
स यां गतिमवाप्नोति न तां क्रतुशतैरपि ॥[2]

पद्यानामर्थः सुस्पष्ट एव । भवतु नामात्र धार्मिकी दृष्टिः, किन्तु शारीरिकी दृष्टिरपि अन्तर्निगूढा ।

किंबहुना, स्कन्दपुराणे तु सूर्यनमस्कारः सर्वातिशायिनमस्काररूपेण प्रतिपादितः—

आदौ तस्य नमस्कारोऽन्येषां च तदनन्तरम् ।
क्रियते देवैः सर्वैस्तेन सर्वैर्महर्षिभिः ॥
नमस्कृतेन सूर्येण सर्वे देवा नमस्कृताः ।
उत्पत्तिः प्रलयस्थानं निधानं बीजमव्ययम् ।
हेतुरेको जगन्नाथो नाऽन्यो विद्येत भास्करात् ॥[3]

एतेन भास्करे सृष्टि - स्थिति - प्रलयशक्तिरपि अस्तीति सिद्ध्यति ।

(क्रमशः)

---

१. भविष्यपु० ब्रह्मपर्वं, सप्तमीकल्प, ६०.१८–२० ।

१. तत्रैव ९५.१ ।

२. भविष्यपु० ब्राह्मपर्वं, सप्तमीकल्प, सूर्यषष्ठीव्रत-वर्णनम्, १६४.४७–४९ ।

३. स्कन्दपु० ... १२५.११–१६ ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुरुकुल कांगड़ी विश्वविद्यालय
हरिद्वार

पञ्जीकृत-संख्या—एल० १८९७

सूर्योदयस्य नियमाः

पत्र-संहिता

१. 'सूर्योदय'-मासिकपत्रस्य वार्षिकं शुल्कं रूप्यकपञ्चकं वर्तते। धनादेश (मनीआर्डर) द्वारा तत्प्रेषणीयम्। वी० पी० द्वारा प्रेषणे ५० पणाः पृथक् प्रदेयाः स्युः।

२. आवर्षं गम्भीरसाहित्यसमन्विताः १२ अङ्काः प्रकाश्यन्ते। नवीनग्राहकत्वं प्रथमाङ्कतः (जनवरी-अङ्कतः) एव स्वीक्रियते। माध्यमिकेन केनापि अङ्केन ग्राहकत्वं न स्वीक्रियेत।

३. आंग्लमासस्य २६ दिनाङ्के 'सूर्योदयः' प्रकाशितो भवति। वारद्वयं संशोध्य ग्राहकेभ्यः सः प्रेष्यते। अतस्तदलाभे पूर्वं स्वकीय-पत्रालयतस्तदनागमनस्य निर्णयं कृत्वैव १० दिनाङ्कानन्तरं वयं सूचनीयाः।

४. लेख-कवितादीनां भाषा संयता, सरला, शुद्धा च भाव्या। प्रकाशनीय-लेखादीनां स्पष्टाक्षरैः कर्गजस्यैकपृष्ठे एव लेखनमावश्यकम्। अस्वीकृता लेखादयः पोस्टविभागीय-चिटिका (टिकट) प्राप्त्यनन्तरं परावर्तयितुं शक्यन्ते।

५. सम्पादकीय-विषयसम्बद्धे पत्र-व्यवहारे 'सम्पादकः' इति, व्यवस्थाविभागीय-पत्रव्यवहारे न 'व्यवस्थापकः' इति च स्पष्टं लेखनीयम्। तेन उत्तरलाभे मुधा विलम्बो न भवेत्।

विज्ञापन-शुल्कम्

सूर्योदये सुरुचिपूर्णं विज्ञापनं प्रकाश्यते। एकवारं तस्य प्रकाशनस्य शुल्कक्रमश्च अधोलिखितोऽस्ति। सार्वकालिकस्य दीर्घकालिकस्य च विज्ञापनस्य कृते विशेष-सौविध्याय पत्र-व्यवहारः कार्यः।

साधारणस्य प्रतिपृष्ठस्य	१००) रु०	साधारणस्य प्रत्यर्धपृष्ठस्य	६०) रु०
साधारणस्य चतुर्थांशपृष्ठस्य	३५) रु०	आवरण-चतुर्थपृष्ठस्य	२००) रु०
आवरण-द्वितीय-तृतीयपृष्ठयोः	१५०) रु०	प्रथमावरणपृष्ठे विज्ञापनं न स्वीक्रियेत।	

—सङ्केतः—

'सूर्योदय'-कार्यालयः, भारतधर्म-महामण्डलम्, जगतगंज, वाराणसी।

सम्पादकः, प्रकाशकः, मुद्रकश्च—गोविन्द नरहरि वैजापुरकरः,
श्रीभारतधर्ममहामण्डलम्, जगतगंज, वाराणसी कैण्ट।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

मुद्रण स्थानम् — आनन्दकानन प्रेस सी० के० ३६/२०, वाराणसी।

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूर्योदयः

भारतधर्ममहामण्डलस्य
मासिकं मुखपत्रम्

वर्षम् ५०

अङ्कः ५

सम्पादकः
गो० न० वैजापुरकरः

मई
१९७४

वार्षिक-मूल्यम्
५) रूप्यकाणि

प्रत्यङ्क-मूल्यम्
अर्धरूप्यकम्

वृन्दावनकुञ्जम्

चेतश्चल वृन्दावनकुञ्जम् ।
नन्दकुमार - चरणकमलाभ्यां परिपूतं छविपुञ्जम् ॥ १ ॥
विविधविहगकुल - कलरवयुत - मृदुतरुवर - राजितपुञ्जम् ।
निर्मलकालिन्दी - श्यामलजल - विलसित - लोलतरङ्गम् ॥ २ ॥
भाति यत्र गोकुलसंयुक्तं, गोवर्धन - गिरिशृङ्गम् ।
शरदुत्फुल्लमल्लिकामोदः कर्षति सहृदयभृङ्गम् ॥ ३ ॥
परमानन्दो निवसति भक्तिर्नृत्यति यत्र सलीलम् ।
कर्मयोग-केलिस्थलमेतत् कृन्तति कश्मलकीलम् ॥ ४ ॥

—डॉ० गिरिशरण शर्मा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ग्राहका विज्ञापनदातारश्च विनिवेद्यन्ते

यत् 'सूर्योदय'स्य पञ्चाशत्तमवर्षस्य वार्षिकं शुल्कमद्यावधि नैकैः प्रत्नग्राहकैर्नं प्रेषितम्। अतस्तैः एतदङ्कप्राप्तेः समकालमेव पञ्चमुद्रात्मकं वार्षिकं शुल्कं धनादेश (मनिआर्डर) द्वारा प्रेषणीयम्। नव्योऽपि एकैको ग्राहको विधेयः।

एवं नैके धनिनोऽपि ग्राहकाः व्यवसाय-संस्थानानि शासनानि च सर्वेभ्यो मुक्तहस्तं स्वव्यापार-विज्ञापनानि प्रददति। परं 'सूर्योदयः' तै कदापि न स्मर्यते। सूर्योदये सुरुचिपूर्णं विज्ञापनं प्रकाशयितुमस्माभिरूप क्रान्तमस्ति। अतस्तेऽमुमपि कृपयाऽनया अनुगृह्णन्त्विति।—व्यवस्थापकेन

अनुक्रमः

प्रपानकः	पत्रपुटम्	परिवेषकः
मां पातुगाङ्ग मनिशं···	९७	श्री शिवप्रसाद द्विवेदाः
श्रीज्ञानानन्द-चरितम्	९८	स्वर्गीयाः श्री विन्ध्येश्वरीप्रसादशास्त्रिणः
धूमशकटीनां कार्यमुद्रणं किमस्मान् शिक्षयति ?	९९	सम्पादकीयम् (अग्रलेखः)
परमाणु-परीक्षणं विजयतेतराम्	१०२	सम्पादकीया टिप्पणी
अद्वैतं सुखः-दुःखयोः	१०२	श्री बटुकनाथ शास्त्री खिस्ते
मानस-भारती	१०३	श्री जनार्दन गङ्गाधर रटाटे
चत्वारो वेदाः, तेषां पद्धतित्रयञ्च	१०४	श्री विष्णुदेव पण्डितः
निपातोपसर्गविषयेकिञ्चित्	१०६	श्री-चन्द्रभानु शर्मा मान्द्ध जः
चम्पूकाव्य-स्वरूपसमीक्षा	११०	श्रीमती मिथिलेश शर्मा
(२) पूर्णाहुतिः	११७	श्री कृष्णप्रसाद घिमिरे
(४) सूर्यनमस्कारो व्यायाम.	१२०	श्री डॉ० नरेश झा

स्थानाभावाद् अङ्केऽस्मिन् नैकैः पूर्वानुवृत्ताः लेखा विवशतो न प्रकाशिताः।—सम्पादकः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूर्योदयः

रागद्वेषनिशाटनं विधुरयन् मोहं तमो नाशयन्,
तामिस्रं जडवादकैरवकुलं ज्ञानत्विषा ग्लापयन्।
विद्वत्कोकसशोकयन् नवसुधीरोलम्बमुन्मीलयन्,
सञ्जातः सुमनोमनो मधुरयन् सर्वत्र सूर्योदयः॥

५० वर्षे] वाराणसी, ज्येष्ठ, २०३० वै० : मई, १९७४ ई० [५ अङ्कः

मां पातु गाङ्गमनिशं सुखकारि वारि !

•

विष्णुः समुद्रमथनेन सुधां निपाय्य कृत्वामरान् भुवि भवान् स्वजनात् विचार्य।
मात स्वकीयकरुणावरुणालयात्त्वां तापत्रयोपशमनीं प्रणिनाय गङ्गाम्॥१॥

तोये पतन्ति कुसुमानि फलानि यावत् क्षेत्राधिपालवृषकर्षकवंशपूर्वे।
विद्युत्प्रभैर्मणिमयैः सुरसङ्घसेव्यैः स्वर्गं प्रयान्ति सरिते विकसद्विमानैः॥२॥

भ्रातुः प्रियं विदधता भरतेन गङ्गे ब्रह्मर्षिमातृपरिवारगणेन साकम्।
त्वत्सेवयैव रघुनाथपदारविन्दं लब्धं महाधिमतिमुच्चमहच्चरित्रम्॥३॥

अम्ब त्वदाश्रयमवाप्य निषादराजो जातिक्रियागुणगणैः स महानपूतः।
रामं रमापतिमनर्घ्यगुणं सखायं लेभे लिलिङ्गयमथो भगवान् वसिष्ठः॥४॥

तापप्रहारि गुरुपातकदारुहारि हेमाद्रिगह्वरगभीरतलप्रसारि।
मज्जज्जनालिमनसां सदृशोपहारि मां पातु गाङ्गमनिशं सुखकारि वारि॥५॥

— कविवराः श्री शिवप्रसाद द्विवेदाः —

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीमहर्षि-ज्ञानानन्दचरितं महाकाव्यम्

— श्री विन्ध्येश्वरीप्रसाद शास्त्रिणः —

(अथ एकविंशः सर्गः)

१. अभ्रान्तसर्वविधसंविदपौरुषेयो वेदो मतोऽस्ति समयत्रितयेऽप्यबाधः ।
ज्ञानात्मना च परमात्मनि नित्यरूपे सन्तिष्ठते प्रलयकालमुपेत्य नित्यः ॥

२. शश्वत्तपः - परमपूतमहर्षिवृन्द - बाह्यावबोधविनिवृत्तिसमाधिभृत्सु ।
चेतस्सु सर्गसमये ह्यनुपूर्वमेव संश्रूयते श्रुतिसमाह्वयवानतोऽसौ ॥

३. आध्यात्मिकं तदधिदैवमथाधिभूत - मर्थत्रयं भुवि विकासयते तदीयः ।
प्रत्येकमन्त्र इति चान्तरदृष्टिशून्यः साधारणो बुधजनो न विबोद्धुमर्हः ॥

४. प्रज्ञा समाधिसुलभा च ऋतम्भरा यैरासादिता भुवनवन्द्यमहर्षिवर्यैः ।
तच्छेमुषीषु भगवत्प्रवणासु वेद आविष्करोति नितरां त्रिविधं स्वमर्थम् ॥

५. सत्त्वं रजस्तम इति त्रिगुणान् प्रकृत्या आश्रित्य तत्र विलसन्त्यधिकारभेदाः ।
अन्योन्यबाधजनकास्तु विरोधभावास्तैरेव जाग्रति न सन्ति हि वस्तुतस्ते ॥

६. कर्म ह्युपास्तिरथ संविदिति त्रिकाण्डो वेदो मतो यदपि किन्तु वरेण्यभागः ।
कर्मैव तस्य मुनिभिर्निखिलैः श्रुतिज्ञै-र्ब्रह्माण्डचालकतया परिगीत आस्ते ॥

७. अम्ब्वाशयेषु च यथा पवमानवेगादुज्जृम्भते सततमेव तरङ्गराशिः ।
तत्प्राकृत - त्रिगुणजन्य - तरङ्गसङ्गात् कर्माविरस्त्यखिलविश्वनिदानहेतुः ॥

८. आघाततोऽपि च यथा प्रतिघाततश्च बिभ्रत्यसङ्ख्यकवपूंषि जलोर्मिमालाः ।
वैषम्यभाजनतया च गुणत्रयस्य कर्मापि धारयति नैजमनन्तरूपम् ॥

९. सम्पातितं जलनिधौ प्रवहत्तृणं हि प्राप्नोति कूलमनुकूलतरङ्गसङ्गम् ।
तद्वद्ध्रुवं मनुतनूजननोऽपि लोकः संगृह्य कर्म शुभदं विजहाति बन्धम् ॥

१०. विज्ञाय तद् भुवि हिताहितकर्मरूपं चेन्मानवः स्वपुरुषार्थविधौ प्रवृत्तः ।
निःश्रेयसं स्वपरमाभ्युदयेन साकं प्राप्नोत्यवश्यमिह नास्ति वितर्कलेशः ॥

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकीयम्

धूमशकटीनां कार्यमुद्रणं किमस्मान् शिक्षयति ?

मई-मासस्य अष्टमदिनाङ्कतोऽस्माकं राष्ट्रे धूमशकटीनां राष्ट्रव्यापि कार्यमुद्रणं (रेलवेकी हड़ताल) तत्कर्मकर्तृसमाचरितं प्रारब्धं यदिदानीं लेखानावसरेऽपि सिद्धान्ततस्तथैव प्रचलद् वर्तते। तथापि व्यवहारतोऽद्य बहुषु भागेषु तन्मुद्रणं वैफल्यमेवाऽऽसादयत् पुनरपि धूमशकटीनां पूर्ववद् गमनागमनव्यापारं कथमपि निरोद्धुं न प्राभवत्। तटस्थैर्विवेकशीलैः प्रसङ्गेऽस्मिन् 'किमिदमस्मान् शिक्षयती'-त्यत्र अवहितैर्भूयेत चेन्नूनं तदवधानं व्यक्तेः समाजस्य राष्ट्रस्य च श्रेयसे कल्पेत। अतो वयमप्यत्र स्वां लेखनीं प्रवाहयामः।

पुराकाले अस्माकं भारतीयानां सर्वोऽपि व्यवहारो विकेन्द्रितोऽध्यात्मनिष्ठश्च जायते स्म। सामान्यतः प्रत्येकः स्वीयं कार्यं तत्तत्-सीमितक्षेत्रे सीमितवर्गैः सम्पाद्यते स्म। व्यापकानि कार्याणि पुनरध्यात्मशक्त्यधिष्ठितैः भौतिकसाधनैः प्रपूर्यन्ते स्म। सापि शक्तिः प्रायः प्रत्येकस्य सविधे नियता आसीत्। स च तस्याः दुरुपयोगाय स्वप्नेऽपि न प्रवर्तते स्म। अतो वयं कथमपि उपालम्भमेतं स्वीकर्तुं न शक्नुमो यत् 'प्राचीना प्रतिगामिनः, सङ्कुचिते क्षेत्रे एव व्यवहरन्तो विश्वजनीनव्यवहारतः सर्वथाऽपरिचिताश्चासन्नि'ति। वस्तुतस्ते निरर्थकं भोगसम्भारं न स्पृहयन्ति स्म। जीवनयात्रायै यावदपेक्षितं तस्यैव सयोजने तेषां निखिलः समुद्यमो जायते स्म। सन्तोषः पुनस्तेषां जीवनसर्वस्वमासीत्। तेषां सुदृढा धारणेयं यत्—

न जातु कामः कामानामुपभोगेन शाम्यति।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते॥ इति, **त्यागेनैवे अमृतत्वमानशुः** इति च। तदा सर्वे अन्ने, वस्त्रे, आवासे, औषधे, यातायातसाधनेषु अन्येषु च दैनिक-जीवनीयविषयेषु सर्वथा स्वावलम्बिन एवासन्। अतस्तेषां पदार्थानामादानाय समुपलब्धये वा कीदृश्यपि समस्या तेषां पुरतो न समुपतिष्ठते स्म।

किन्तु 'ते हि नो दिवसा गताः!' प्रथमचरणे एव सर्वाङ्गपरिपूर्णः सम्पन्नः कलिः। चिराद् वैदेशिकदास्येन भारतीयानामस्माकं सा चिरन्तनी अध्यात्मशक्त्यधिष्ठिता स्वावलम्बन - विकेन्द्रीकरणभावना मुमूर्षन्तीव संवृत्ता। अत्रान्तरेऽस्माभिः देशभक्तिधुरीणानां सुदीर्घप्रयासैः राजनैतिकं स्वातन्त्र्यमासादितम्। किन्तु ततः परमावश्यकर्तव्यभूतं मुमूर्षन्त्या अस्या भावनायाः जीवनदानरूपं सुकृतं नास्माकं नेतृवरैः समाचरितम्। भौतिकताचाकचिक्यदीप्तचक्षुष्कैः पाश्चात्यसंस्कृतिग्रहगृहीतमानसैस्तैः पुनस्तेषामेव पाश्चात्त्यानां साधनान्यादाय सर्वविधभौतिकसमुन्नतये एव प्रयतितम्। अध्यात्मशक्तिं सर्वथा न्यक्कुर्वन्तस्ते सर्वत्र दैनिकजीवनयात्राप्रकारेष्वपि भौतिकान्येव सर्वाणि उपकरणानि प्रयुक्तवन्तः। तान्यपि न विकेन्द्रितानि स्थापितानि तैः, क्रमशस्तानि कथितराष्ट्रीकरणपथि एव प्रवर्तमानानि विलोक्यन्ते। विशालतमानाम् इस्पात - लौह - पेट्रोलतैल - धूमशकटी-बैंकादीनां कथा तु दूरे एवास्ताम्, प्राणपदानां गोधूमानामपि राष्ट्रीकरणं संवृत्तम्। इतः परं शिक्षाया अपि राष्ट्रीकरणाय अस्मदीया एव पाश्चात्त्यसंस्कृतिसंस्कृताः शासकान् नैकशो विवशीकर्तुं प्रयतमाना दरीदृश्यन्ते। अहोऽस्माकं सर्वाङ्गीणं चैतत् मौढ्यम्!

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यतो हि राष्ट्रीकरणं नाम पर्यायतः व्यक्तेः स्वातन्त्र्यस्य सुस्पष्टमपनोदनम्। राष्ट्रं नाम न किमपि स्वतन्त्रं वस्तु, व्यक्तीनां समष्टिरेव तत्। सा च समष्टिर्न चेतना। चेतनविशेषमधिष्ठायैव सा प्रवर्तते। स च यदि सर्वतः साधीयान् भवेत्तदा राष्ट्रमपि साधीयः स्यात्, राष्ट्रीकरणमपि। अथ तस्मिन् कोऽपि दोषः प्रसरेत्, तदा समग्रं राष्ट्रमपि दुष्टतां यायात्। यदि एकस्मिन् राष्ट्रनायके सर्वासां व्यक्तीनां स्वातन्त्र्यस्य विलयः स्यात् तदा सा पर्यायतोऽधिनायकतैव भवेत्। कामं लोकबहुमतेन स नियतः स्यात्। सर्वाधिकारसम्पत्त्या अध्यात्मभावनाशून्यतया च अकार्यकरणं स्वीयसङ्घटनप्रभाववर्धनञ्च तस्मिन् सर्वदैवाशङ्कितं स्यात्। अन्यच्च, साम्प्रतं यादृशं लोकबहुमतं समासाद्यते, तदपि न विपश्चितां तिरोहितम्। अपि च, बहूनां मेषपात्राणां बहुमतमेकस्य विवेकिनो दूरदर्शिनो मतेनाञ्जसा कथमपि स्पर्धितुं नालमित्यपि विवेचका अवगच्छन्त्येव। सत्येवं तथाविधेन राष्ट्रीकरणेन समग्रं राष्ट्रमेव सुगतं भवितुं शक्नोति दुर्गतं वा। तत्रैव सर्वसत्ताविलये कस्याश्चन क्षमतासम्पन्नाया अपि व्यक्तेः कृते स्वात्मोद्धाराय अवसर एव न भवेत्। किमिदं कस्यचन प्रगतिपथं गच्छतो राष्ट्रस्य कृते श्रेयस्करम्? एतद्विपरीतं विकेन्द्रितव्यवस्थायां क्षमतासम्पन्नाः स्वातन्त्र्येण स्वात्मनो विकासं विधाय राष्ट्रसेवायै सन्नद्धा भवितुमर्हन्तीति निश्चप्रचम्।

अत्रेदमवधेयम्—इत्थं केन्द्रीकरणतो विकेन्द्रीकरणस्य ज्यायस्त्वेऽपि कुत्र कुत्रचन केन्द्रीकरणमपि राष्ट्रहिताय परमावश्यकमिति तस्य सर्वथा खण्डनं नास्माभिर्विधीयते। तत्तु भाव्यमेव। तेन विना राष्ट्रशकट एव सुचालितो न भवेत्। तथापि सर्वस्यास्य विवेचनस्य इदमेवोद्दिष्टं यद् यावद् राष्ट्रस्य हिते क्वाऽपि बाधा न भवेत्, तावद् भूयसा सर्वैः नैकेषु विषयेषु विकेन्द्रीकरणमेव समादरणीयं समनुष्ठेयञ्च। तेनैव राष्ट्रशकटः सुचालितः सन् समुद्दिष्टं पदमासादयितुं प्रभविष्यतीत्यस्माकं दृढं मतम्।

प्रकाशेऽस्मिन् विचार्यमाणे यातायातसाधनविषयेऽपि पदसञ्चारं, पदगन्त्री-सञ्चारं, वृषभाश्वादियानसञ्चारं च न्यक्कृत्यास्माभिः गमनागमनाय सर्वथा धूमशकट्या एवाश्रयो गृहीत इत्यपि स्वावलम्बन-विकेन्द्रीकरण - परिपन्थी एव। शासनेनापि तदुपकरणस्य राष्ट्रीकरणं कृतम्। अत एव धूमशकटीकर्मकरैर्निर्ध्यातं यत् 'सर्वे भारतीया अस्माकं वशंवदा एवास्मिन् विषये। शासनमपि अस्मदायत्तमेव सन् व्यवसायममुं कर्तुं प्रभवति।' अन्यच्च, तैरिदमपि विचार्यते यत् 'साम्यवादिदेश - विचारधाराभिभूतमस्माकं शासनम् अन्यानि व्यावसायिकसंस्थानानि स्वकर्मकरेभ्यो लाभांशदानाय विवशानि करोति, सत्येवं स्वीयेऽस्मिन् व्यवसायेऽपि कथङ्कारं तत् नास्मभ्यं लाभांशं (बोनस) दातुं प्रवर्तते? अतो यथाकथञ्चन स समादेय एवे'ति। अत्रान्तरे तेषां सर्वेषां सङ्घोऽपि सङ्घटित आसीत्। तद्बलेन ते स्वीयमभीष्टं साधयितुं धूमशकटीनां राष्ट्रव्यापि कार्यमुद्रणात्मकं महाभियानं (राष्ट्रव्यापी रेल-हड़ताल) मासस्यास्य अष्टमदिनाङ्कतः प्रारब्धवन्तः। एतेन समग्रराष्ट्राभिजनानां तत्तद्व्यक्तीनां च कियता महत्तरा हानिः समभवदिति तु अन्ते शासकीय-घोषणया स्फुटीभवेदेव। तदभिशापः स्वतन्त्रः करभारः सर्वस्यापि राष्ट्रस्य शिरसि निपतेदित्यपि सुनिश्चितमेव। तटस्थैः पुनः सर्वमेतत् परावलम्बनस्य केन्द्रीकरणस्य चाभिशापभूतमेवेति विभाव्य भारतीयाः प्रबोध्यन्ते यदद्यापि भवद्भिर्जीवने स्वावलम्बनस्य विकेन्द्रीकरणस्य च भूयसा समावेशः कार्यं इति।

प्रसङ्गेऽस्मिन् धूमशकटी-कर्मकरैः, अन्यैश्चापि विभिन्नव्यवसाय-कर्मकरैर्दृढमवधेयं यत्कामं युगानुरूपं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सङ्घबलं भवतां भवेत्, तथापि यदि तत् जनमतानुगृहीतं न स्यात्, तदा तस्य साफल्यं शशशृङ्गायितमेव। तेषामनेन व्यापारेण जनसाधारणस्य या महत्तरा हानिरभूत्, तां किल जनता कथं सहेत ? अन्यच्च, प्रायशः सकलैव जनता साम्प्रत महान्तमर्थकष्टमनुभवति। शतशः सहस्रशश्च जनाः सुखेन एकवारमपि उदरदरीं पूरयितुमक्षमाः स्वप्ने एव उदरपूर्तिं ध्यात्वा सन्तुष्यन्तो दरीदृश्यन्ते। अस्यां विषमायां स्थितौ शासनकृतां भूयसीं सुविधामासादयन्तोऽप्येते धूमशकटीकर्मकराः, बैंककर्मकराः, अन्ये च तादृशाः कर्मकराः बुभुक्षितानेतान् अवमत्य शासनतोऽधिकाधिकमर्थजातं समाक्रष्टुं प्रयतेरंस्तदा जनसाधारणः कथमप तान् न क्षमेत। तेषां तादृशस्य क्रमस्य सैव परिणतिर्भवेत् या हि धूमशकटीकार्यमुद्रणाभियानस्य दृश्यते। अपि च, एतेषां धूमशकटीविभागे सार्वत्रिको जनसाधारणस्य लुण्ठनप्रकारो वस्तूनां क्रयणावसरे प्रचलति। द्विगुणं चतुर्गुणं वा मूल्यं प्रदायापि समुचितमूल्यसुलभं वस्तु जनसाधारणेन कथमपि नासाद्यते यावच्च तत्र उत्कोचसत्रं न परिचाल्यते, तद्विरोधे च निर्मम पीड्यते जनसाधारण.। सर्वैरेतैः दुष्कृत्यैस्तेषां नैतिकं मूल्यं जनसाधारणस्य पुरतः न्यूनायितमिव संवृत्तम्। तेषां महाभियानस्य विफलतायामस्यां जनसाधारणस्यायमाक्रोशोऽपि नूनम् महान् अभिशापायितोऽभवत्। अतस्तैर्यदि स्वात्मनो वास्तविकं हितं काम्येत चेत् सर्वप्रथमं जनानुरागसम्पादनायैव सुदृढं प्रयतनीयमिति तेषां कृते तटस्थानां विवेकिनां हितोपदेशः।

पर्यन्ते शासनायापि किमपि उपदेष्टव्यमवशिष्यते। विषयेऽस्मिन् तेन यादृशः सुदृढः क्रमोऽनुसृतस्तस्य समर्थनं कुर्वद्भिरपि तटस्थैः शासनं प्रबोध्यते यत्तेन व्यावसायिकसंस्थानेषु कर्मकरेभ्यो लाभांशदानस्य यो दुराग्रहः कृतः स सर्वथा अकाण्डे एवासीदिति। ये केचन कमपि व्यवसायं समाचरन्ति, तेषां तत्र बुद्धिः, धनम्, समयः, सर्वस्वञ्च व्ययीभवति। अपरिपक्ववस्तुनाम् उपकरणानां च सङ्कलनाय प्रभूतं धनं स्वकीयं व्ययीभवति। तैः कर्मकरेभ्यश्च वेतनं प्रदीयते। शासनं पुनः सर्वोच्चस्वामित्वेन महान्तम् आयकरमपि गृह्णाति। सत्येवं व्यावसायिकानां हस्ते कियान् लाभः पतेदिति विवेचका एव निर्धारयन्तु। तत्रापि कर्मकरेभ्यो लाभांशो दीयेत तदा मुधैवायं तेषां व्यवसायप्रयासः स्यात्। तेन च अग्रिमव्यवसायकरणाय तेषां सविधे कियान् निधिर्भवेत् ? किमेकवारं व्यवसायं कृत्वा सर्वथा ते ततो विरता एव भवेयुः ? इत्थं तु राष्ट्रस्य व्यावसायिकः समुत्कर्षः क्रमशो विलयं गच्छेदिति। किं वा विचारितं शासनेन ?

वस्तुतः सर्वमेतत् पाश्चात्यसंस्कृतेस्तेषामेव रीतिनीतीनामनुकरणस्यैव अभिशापः। भारतीयसंस्कृतौ भारतीयराजनीतौ च पुना राज्ञां व्यावसायिकानाञ्च लाभस्य ये पञ्चशो विभागाः कृताः, तेषां यथार्थतोऽनुकरणेन राज्ञो व्यावसायिकस्य वा पार्श्वे एक एवांशो व्यक्तिगतसम्पत्तिरूपेण परिशिष्यते। तत्रापि तस्य दानधर्मांशो भवति यद्धि जनतास्वेव प्रसरति। अतो भारतीयशासनस्य अनुपेक्ष्यमिदं कर्तव्यं यत् तत् तथाकथित - प्रगतिशीलानां भौतिकसमुत्कर्षमात्रसाधने प्रवृत्तानां राष्ट्राणां बौद्धिकपारतन्त्रसूचिकां शासनपद्धतिं राजनीतिं वा परित्यज्य विशुद्धभारतीयां वैदिकीं कौटिल्य-कामन्दकाद्यनुगृहीतां सर्वथाऽध्यात्मपरिनिष्ठितां स्वदेशीयां स्वतन्त्राञ्च शासनपद्धतिं समाश्रित्य भारतं शासितुं पुरः समुपतिष्ठेत। सप्तविंशतिवर्षदेशीयः स्वतन्त्रदेश-युवाऽयमद्यापि स्वीयां श्रेयःप्रेयसाधिकां धर्मनिष्ठां शासननीतिमपहाय परतन्त्रां वैदेशिकीं चपलां शासननीतिमेव संश्लेषितुं समुत्सुकः स्यात्तदा भगवानेव शरणमित्येव वक्तव्यं भवेत्। अतः शासनेनापि सद्योऽस्य सर्वस्य गभीरं मननं विधाय ←

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अद्वैतं सुख-दुःखयोः !

विश्वस्मिन् विभवेऽपि यस्य विगलद्वस्त्रा तनुः श्रेयसी
स्तोत्रं यस्य च पाणिपीडित-मुखोद्गारैक-साराक्षरम् ।
गङ्गा-वह्नि-भुजङ्ग-चन्द्रशकलान्येकत्र देहे वहन्
अद्वैतं सुख-दुःखयोरनुभवत्येकः स योगीश्वरः ॥ १ ॥

विद्वन्मण्डन-मूढयोः कुलवधू-वारस्त्रियोः केसरी-
धावद्वारणयो - र्दिनेश-तमसोः - कादम्ब-काकोलयोः ।
ऐक्यं चेन्नवजन्मनाऽपि विधिना संपाद्यते कौशलाद्
अद्वैतं सुख-दुःखयोरिति तदा धत्तां समस्यापदम् ॥ २ ॥

—कविवराः श्री खिस्ते बटुकनाथशास्त्रिणः

←स्वतन्त्रः स्वदेशीयश्च क्रमोऽनुसर्तव्यः। अन्यथा अन्न-वस्त्र-निवास-रक्षाकल्पेषु सर्वसामान्य-दैनिक-जीवनीय-पदेषु जनसाधारणस्य कृते सौविध्यमनसादयत् किमपि शासनं कियत्कालं स्थिरं स्थावरं स्थातुं प्रभवेदिति भगवानेव जानातु। अतोऽस्मिन् महति सङ्कटायिते काले भारतशासनेनापि विचार्यदं सर्वं सुनियोजितः एकान्ततो राष्ट्रहितकारी पन्था अवलम्ब-नीय इत्येव तस्यापि कृते तटस्थानां विवेचकानां कान्तासम्मितोपदेशः। अन्ते कर्तुमकर्तुमन्यथाकर्तुं क्षमं भगवन्तमेव प्रार्थयामो यत्सोऽस्मान् सर्वान् भारतीयान् सद्बुद्ध्या योजयत्विति।

[लेखस्य समाप्तिकाले वृत्तं प्राप्तं यत् मईमासस्य २८ दिनाङ्के प्रातः ६ वादतः महाभियानमिदं परावर्तितं कार्य-करैः। पञ्चाशत्कोटिरूप्यकाणां हानिश्चात्र समभवत्' इति। महाभियानसमाप्तिर्नूनं शुभावहेति अस्माकं मतम्।]

परमाणु-परीक्षणं विजयतेतराम्

भारतराष्ट्रेण अन्ततः 'परमाणुबम' - महास्त्र-निर्माणं विधाय तस्य परीक्षणमपि भूमेरधो मरुस्थले तादृशे प्रदेशे कृतं येन केषामपि मानवानामहितं न भवेत्। एतदर्थं वयं सर्वान् एतन्निर्मातृ - वैज्ञानिकान् भारतशासनं च सादरमभिनन्दयामः। एतेन भारत-राष्ट्रमप्यस्माकम् अद्यतनीय-सर्वोच्चभौतिकशक्तिमतां राष्ट्राणां पङ्क्तौ ससम्मानं समुपवेशितुमधिकृतं तु जातमेव। परमाणुशक्तेर्विध्वंसाय प्रयोगं वाञ्छता-मभिक्रमं निरुद्धुमपि राष्ट्रेणानेन महत्तरं बलमासा-दितं यस्य च स चिराद् बहुशः समुद्घोषक आसीत्। शक्तेरस्याः विध्वंसकप्रयोगं कामयमानै राष्ट्रैः प्रसङ्गेऽस्मिन् भारतराष्ट्रस्य निन्दा क्रियेत चेत्तत्र नातितरां चित्रम्। स्वाभाविकं तत्। अस्माभिः पुनस्तत्रावधानमेव न देयम्। यानि पुनर्हीनबलानि विरोधकानि राष्ट्राणि उपक्रममम् निन्देयुः, भीताश्च भवेयुश्चेत्तत्सर्वं व्यर्थमेव। यतो हि भारतस्य प्रतिज्ञैव यत् 'परमाणुशक्तेर्निर्माणकार्ये एव विनियोगो भाव्यो न जातु विध्वंसकार्ये।' सौभाग्याद् अस्मत्प्रधानमन्त्रिभि-रपि प्रतिज्ञेयं घण्टाघोषं पुनरुद्घुष्य भ्रान्ताः भीताश्च समाश्वासिताः। इतः परमपि केचन न तुष्येयुः, समाश्वस्ताश्च न भवेयुश्चेत् भविष्यत्काल एव तेषां समाधानं विधास्यति। तदर्थमस्माभिः स्वीये-ऽस्मिन्नभिक्रमे कथमपि शैथिल्यं न प्रदर्शनीयमित्येवा-स्माकं सप्रश्रयं निवेदनम्।

●

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मानस-भारती : देवगिरा गुम्फितं मानसम्

—श्री जनार्दन गङ्गाधर रटाटे, एम० ए० साहित्याचार्यः—

इत्थं दूरीकृत्य सर्वान् बहुरूपांश्च संशयान् ।
मूर्ध्नि धृत्वा गुरोः पादपद्मयोर्धूलिमादरात् ॥
सर्वेभ्यो विनयं कुर्वे पुनः साञ्जलिरानतः ।
यथा कथामारचने कोऽपि दोषो न संस्पृशेत् ॥
इदानीं सादरं शीर्ष्णा प्रणम्य श्रीसदाशिवम् ।
विशदां वर्णयामीह श्रीरामगुणसत्कथाम् ॥
एकत्रिषड्ब्रह्मसङ्ख्ये वैक्रमे शुभवत्सरे ।
कथां करोमि संस्थाप्य हरेः पादाब्जयोः शिरः ॥
नवम्यां भौमदिवसे मधुमासे मनोरमे ।
अयोध्यायामिदं रम्यं चरितं सम्प्रकाशते ॥
श्रुतिर्गायति यद्यस्मिन् रामजन्म-सुवासरे ।
तस्मिंस्तत्र समायान्ति तीर्थानि सकलान्यपि ॥
असुरा नाग-विहगा मनुष्या मुनि-देवताः ।
अयोध्यां प्राप्य कुर्वन्ति रघुनाथस्य सेवनम् ॥
सम्पादयन्ति सुधियो रामजन्ममहोत्सवम् ।
गायन्ति ललितां कीर्तिं रघुनाथस्य सन्ततम् ॥

मज्जन्त्यनेकाश्च सतां समूहाः
सुपावने नीरवरे सरय्वाः ।
जपन्ति रामस्य च नाम चित्ते
ध्यात्वा तमाश्याममनोज्ञमूर्तिम् ॥३४॥

सरय्वा दर्शनं स्पर्शो मज्जनं पानमेव च ।
हरन्ति पापमित्याह पुराणसहिता श्रुतिः ॥
पुनीतातिनदी चास्या महिमाऽप्यमितो मतः ।
शारदाऽपि न शक्ताऽस्ति शुद्धधीर्यस्य वर्णने ॥
शोभना पूर्ययोध्या च रामधामप्रदा सदा ।
प्रसिद्धा सर्वलोकेषु तथैवातीव पावनी ॥
चतुर्विधाः सन्ति जीवा असङ्ख्या जगतीतले ।
तेषु तेषां न संसारो येऽयोध्यायां तनुत्यजः ॥
सर्वथा सर्वविधिभिर्ज्ञात्वा रम्यां पुरीमिमाम् ।
सर्वसिद्धिप्रदां सर्वमङ्गलानां खनिं तथा ॥
विमलायाः कथायाश्च समारम्भः कृतो मया ।
नश्यन्ति यस्य श्रवणाद् दम्भकाममदादयः ॥
इदं श्रीरामचरितमानसं नाम निर्मलम् ।
श्रुतिभ्यां श्रवणादेव यस्य विश्रान्तिराप्यते ॥
दन्दह्यते मनोहस्ती विषयाख्यदवानले ।
यद्यस्मिन्नापतेदेष तर्हि नूनं सुखी भवेत् ॥
इदं श्रीरामचरितमानसं मुनिभावनम् ।
श्रीशम्भू रचयामास शोभनञ्च सुपावनम् ॥
दावानलस्त्रिदोषाणां दुःखदारिद्र्ययोस्तथा ।
कलेः कुवृत्तेः सर्वस्य कलुषस्य च नाशनम् ॥
विरच्य मानसे नैजे न्यधाद् गुप्तमिदं शिवः ।
पश्चात् प्राप्य शुभं कालमुवाच गिरिजां प्रति ॥
तस्माच्छ्रीरामचरितमानसं वरमीदृशम् ।
चकार नाम हृष्ट्वेदं मानसे मुदितः शिवः ॥
सुखदां शोभनां चैव वच्मि तामेव सत्कथाम् ।
शृण्वन्तु सुजनास्तस्मान्मनः संयोज्य सादरम् ॥

सुमानसं यादृशमस्ति जातं
यथा च लोकप्रथितेश्च हेतुः ।
सर्वं प्रसङ्गं कथयामि सम्प्र-
त्युमामहेशौ स्मरणे निधाय ॥३५॥

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चत्वारो वेदाः, तेषां पद्धतित्रयञ्च

— आचार्यः श्रीविष्णुदेव पण्डितः —

[एम० ए० वेदान्ताचार्यः]

[वैदिकवाङ्मयस्य चिरन्तनमनन-परिशीलन-समालोचन-गवेषणे लब्धप्रतिष्ठैः गुर्जरप्रदेशाभिजनैः प्राच्यप्रतीच्य-विद्याकोविदैः शास्त्रिवर्यैरेभिः लेखेऽस्मिन् 'ऋचो यजूंषि सामानि' इतिवचनं वेदचतुष्टयस्य पद्धतित्रयप्रदर्शनपरं समुचितं संसाध्य एकत्र वेदचतुष्टयस्य स्थापनं कृतम्, अपरत्र वेदे विस्तृता कर्मभावना निर्दशिता वर्तते ।—सम्पादकः]

यावद् ब्रह्म विष्ठितं, तावती वाक् ।

(ऋग्वेद १०.११४.८)

वेदानां मूलभित्तिरूपा मन्त्राः। वेदेषु 'ब्रह्म'पदं ब्रह्मन्, ब्रह्मणि, ब्रह्मणा आदि नपुंसकलिङ्गे बहुधा प्रयुक्तं दृश्यते। यथा वेदान्तदर्शने 'प्रस्थानत्रयी'-पदेन उपनिषद्-गीता-ब्रह्मसूत्राणि गृह्यन्ते, तथैव 'वेदत्रयी' पदेनापि ब्रह्म - ब्राह्मण - कल्पसूत्राणि वेदसाहित्य-संनिवेशे ग्रहीतुं सुशकानि। अत एव मन्त्रा-परपर्यायेण ब्रह्मणा सह ब्राह्मणग्रन्थानां कल्पसूत्राणां च सम्बन्धो नूनं विवेचनीयो भवेत्। तदेवात्र प्रतन्यते। 'ऋचो यजूंषि सामानी'ति वेदत्रयी न केवलं त्रयाणां वेदानामेव ग्राहिका, अपितु चतुर्षु वेदेषु समाहतस्य पद्धतित्रयस्य निर्देशकं वचः। तद्धि पद्धतित्रयं 'छन्दोबद्धा हि ऋक्, गीतिषु साम, शेषे यजुः' इति मीमांसा-सूत्रनिर्दिष्टम्। एतच्च चतुर्ष्वपि वेदेषु परिदृश्यते इति वेदत्रयस्यैव साधका आपातदर्शिनः प्रत्युक्ताः।

मन्त्रब्राह्मणयोर्वेदनामधेयम् इति सूत्रव्याख्या-मनुसृत्य संहिता-ब्राह्मणारण्यकोपनिषदां 'वेद'शब्द-व्यवहारोऽतिप्राचीनः।

कृतं नो यज्ञं विदथेषु चारुं कृतं ब्रह्माणि सूरिषु प्रशस्ता।
उपो रयिर्देवजूतो न एतु प्रणः स्पार्हाभिरूतिभिस्तरेतम्॥

(ऋग्वेद ७.८५ ६)

अत्र इन्द्र-वरुणयोर्देवयोः स्तुतिरूपेण गुणानामुप-बृहणं दृश्यते। ऋषिमुनयो हि वनारण्यप्रदेशेषु वर्त-मानाः विदथ-संवाद-व्याख्यान-प्रवचन - स्वाध्यायादि प्रसङ्गसंयोजनेन यज्ञसहकृत-ब्रह्मयज्ञानुष्ठानरूपे तपः-स्वाध्याये निरताः आसन्। इन्द्रादिदेवाश्च हवन-यजनसंप्रयुक्तस्तुति-स्तोत्र-शंसनसमाकृष्टाः हविर्द्रव्य-लाभार्थं यज्ञयागादिसु समागच्छन्तः समाहूतविदथ-सभास्वपि ब्रह्मचर्चारसभाजिनो जायन्ते स्म। तदपि तेषाममृतं सोमात्मकमन्नम्।

मन्त्रे 'रयि'-पदम् अभ्युदयस्य, 'उति'पदं च निःश्रेयसस्य वाचकमिति धर्मसम्पादने मन्त्ररूपं ब्रह्म मुख्यं साधनम्। ते च ऋषिमुनयो मन्त्रविदः सन्तो ब्रह्मविदो ब्रह्मनिष्ठा ब्राह्मणाः सर्ववेदस्वाध्यायप्रवचन-कुशला आसन्।

गायत्रेण प्रतिमिमीते अर्कमर्केण साम त्रैष्टुभेन वाकम्।
वाकेन वाकं द्विपदा चतुष्पदा अक्षरेण मिमते सप्तवाणी॥

(ऋग्वेद १.१६४.२४)

अत्र मन्त्रा हि मननात्मकाः। ते च छन्दोबद्धाः सन्तः ऋचः। ऋचां तृचां सङ्कलनं सूक्तम्। सूक्तानां वाकानुवाकेषु संयोजनम्। यजनानुष्ठानद्वारेण विनि-योगकरणे वर्गनिर्धारणा। तथा सति तद् ब्रह्म-मन्त्रै-र्देवानामर्चनं क्रियत इति अर्कपदम् ऋक्समूहवाचकम्। तत्र स्वरसञ्चारे गीतिषु साम, यज्ञप्रयुक्तेषु मन्त्रेषु यजुःपदं सञ्चरणपरम्पराप्रसिद्धं मन्त्रेऽस्मिन् निर्दिष्टम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विविधयज्ञसमारम्भेषु प्रथमं तावत् सर्वसाक्षित्वेन 'ब्रह्म' इतिनामकस्य ऋत्विजो वरणं जायते। अध्वर-यज्ञमार्गस्य संयोजने 'अध्वर्यु'नामकस्म ऋत्विजो वरणं तदनुसङ्गतम्। देवानामाह्वाने स्तुतिशंसन-करणे 'होतृ'नामकस्य ऋत्विजो वरणम्, तदनु च स्तोत्रसामगानरचनायाम् 'उद्गातृ'नामकस्य ऋत्विजो वरणं सुशकं भवति। इत्थं च मार्गद्वयानुसारिणी यज्ञप्रतिष्ठा प्रमाणपदवीं भजते। तद् यथा—

अयं वै यज्ञो योऽयं पवते, तस्य वाक् च मनश्च वर्तन्यौ। वाचा हि मनसा च यज्ञो वर्तते। अथ केन ब्रह्मत्वं क्रियत इति? त्रय्या विद्ययेति ब्रूयात्।

(ऐतरेय ब्राह्मण ५.३२.२)

कतिचन पाश्चात्त्या अर्वाचीना वा विद्वांसो वेदत्रयीरूपेण ऋग्यजुःसाम्नामेव संहितानां समावेशे संतुष्टा भवन्ति। इयं हि शैली वेदचतुष्टयेऽपि गृह्यत इति मन्त्रद्वारेण बोधनीयम्—

ऋचां त्वः पोषमास्ते पुपुष्वान्
गायत्रं त्वो गायति शक्वरीषु।
ब्रह्मा त्वो वदति जातविद्यां
यज्ञस्य मात्रां विमिमीत उ त्वः॥

(ऋग्वेद १०.७२.११)

अत्र हि ऋचां पोषण-शंसनद्वारेण ऋग्वेदपाठिनां होतॄणां बोधः। शक्वरीछन्दःसमाविष्टमहानाम्नीनां गायत्रगानेन सामवेदपाठिनामुद्गातॄणां बोधः। यज्ञ-मात्राकरणसंयोजनविनियोगप्रक्रियाकर्मद्वारेण यजुर्वेद-पाठिनामध्वर्यूणां बोधः। जातकप्रायश्चित्तादिकर्म-निष्ठयज्ञसाक्षित्वनियोजनेन अथर्ववेदपाठिनां ब्रह्मादीनां बोधोऽपि जायते। ऋषिमुनिपरम्परागतं तात्त्विक-दर्शनमित्थं प्रमाणीक्रियते—

ऋचो अक्षरे परमे व्योमन्
यस्मिन् देवा अधि विश्वे निषेदुः।
यस्तन्न वेद किमृचा करिष्यति
य इत् तद् विदुस्त इमे समासते॥

(ऋग्वेद १.१६४.३९)

एतद्धि ॐकार-ओमनृचां परमे श्रेष्ठे अक्षरे प्रतिष्ठितम्, तदेव परब्रह्मप्रतिपादकम्। सर्ववेदसार-रूप एष हि दिव्यो मन्त्रः प्रणवपदवाच्यः। ये ये देवा वेदानां मन्त्रेषु व्यवस्थितास्ते सर्वेऽस्मिन् व्योम्नि निवसन्ति। अतो यः कश्चिन्मानवस्तं दिव्यं मूल-मन्त्रं न जानाति, स वेदमन्त्राणां पाठकोऽपि न स्वारस्यं लभते।

एषा हि दिव्या वाक् या वेदवाणी, एष च परमः श्रेष्ठमन्त्रः प्रणवरूप इति वेदारम्भे तस्य ग्रहणं जायते। मन्त्रे मन् - धातुर्मननात्मकः, त्रप्रत्ययश्च साधनार्थे प्रयुक्तः। यो हि शब्दो मनन-विचारसाधन-वाचकः सन् मनसि अन्तर्गतमेकं चित्रम्, एकां प्रति-माम् एकमाकारम् ओङ्कारं वा प्रकटयति, तद् दिव्याक्षरं कवयः क्रान्तदर्शिन ऋषयो मात्रिकशब्दे, सङ्गीतकारगायकाः स्वरकलामाधुर्यां, योगिनश्च नादब्रह्मणि च संयोजयन्ति। तद् यथा—

देवीं वाचमजनयन्त देवा-
स्तां विश्वरूपाः पशवो वदन्ति।
सा नो मन्द्रेषमूर्जं दुहाना
धेनुर्वागस्मानुप सुष्टुतैतु॥

(ऋग्वेद ८.१००.११)

दिव्या एषा वाक् यथातथं युगानुसारेण पूर्वं कविभिर्देवकल्पैः ऋषिभिः शब्दरूपेण प्रग्रथिता। तामेव वाणीं व्यक्तरूपेण दर्शनशील-पश्यक-कश्यपसमाख्यात-पशुपदवाच्यानां मानवानां वाचि व्यक्तरूपतां गता। यथा हि कामधेनुर्मनोनुकूलकामानां दोहनं करोति, तथैवैषा वाग् देवानां दिव्यपदार्थानां स्तुति-प्रशंसन-पूर्वकमन्नरसादि-पदार्थानुदानं करोति। एषा हि मन्द्रा

(शेषांशः १०९ पृष्ठे)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निपातोपसर्गविषये किञ्चित्

– श्री चन्द्रभानुशर्मा भारद्वाजः –

[शोधच्छात्रः—वाराणसेय-संस्कृत-विश्वविद्यालयस्य]

व्याकरणशास्त्रानुसारं सृष्टे उद्गमः शब्दत एव उच्यते, **भूरिति व्याहरत्** इति श्रुतिप्रामाण्यात्। एवञ्च शब्दात्मिकायाः सृष्टेरपि निबन्धस्तत्सत्तायै सुतरामपेक्ष्यतेतराम्। अस्याः शब्दसृष्टेरेकोंऽश उपसर्गाख्यः, तमवलम्ब्य निबन्धोऽयं विलिख्यते। यद्यपि उपसर्गघटकीभूतः 'सर्ग'शब्दः सृष्ट्यर्थक एव; तथापि व्याकरणशास्त्रे 'उप'संश्लिष्टः 'सर्ग'शब्दः 'उपसर्ग'-संज्ञायां प्रयुज्यते।

'उपकुम्भम्', प्रतिदिनम्' इत्यादिसमास-कोशादि-प्रामाण्यात् प्रादयो[1] निपाताश्च वाचकाः। क्रियायोगे सत्येव अद्रव्यार्थकानां प्रादीनां उपसर्गसंज्ञा।[2] तादृशानामेव चादीनाञ्च[3] निपातसंज्ञा। 'या या संज्ञा सा सा प्रयोजनवती' इति शिष्टप्रामाण्यात् उपसर्गसंज्ञायाः[4] निपातसंज्ञायाश्च[5] प्रयोजनमपि नैकेषां सूत्राणामुदाहरणे प्रत्युदाहरणे च समुपलभ्यते। क्रियायुक्ता द्रव्यार्थकाः प्रादय उपसर्गसंज्ञां लभन्ते। अत एव पूर्वाचार्यैः क्रियायुक्तप्रादिषु उपसर्गत्वं प्रकल्प्य 'प, परा, अप' इत्यादीनां प्रादीनां, पकारोत्तराकारोत्तररेफोत्तराऽऽत्ववत्तया 'परा' - उपसर्गस्य, एवमेव अन्येषामपि प्रादीनां तत्तदानुपूर्वीकाणां द्योत्य - द्योतकार्थकत्वमुपसर्गाणामिति विविच्य सम्मन्यते। एवमेव अद्रव्यार्थकाश्चादयः क्रियाऽयुक्ताः प्रादयश्च निपातसंज्ञका सन्तोऽपि द्योतका एव।

अत्र निपातोपसर्गा वाचका इति मीमांसकाः। उपसर्गा द्योतकाः, निपाताश्च वाचका इति नैयायिकाः। अर्धजरतीयस्य अन्याय्यत्वादुभावपि द्योतकौ इति च वैयाकरणाः। साहित्यिकैरपि द्योत्य-द्योतकत्वरूपैव शक्तिरुपसर्ग-निपातेषु मनसा स्वीकृत्यानुमोद्यते। तत्र कतमः समयः श्रेयान्?

अत्रोच्यते—यथा लोके नेत्रम्, उपनेत्रमित्यत्र उपनेत्रं यथा कृत्रिमम्, तथैव उपसर्गोऽपि कृत्रिमः, संज्ञात्वात्। यथा च उपनेत्रं दर्शकं न भवति तथैव उपसर्गोऽपि न वाचकः। अत एव उपसर्गसंज्ञकाः प्रादयो न वाचकाः, यतो हि लिङ्गसंख्यादिना[1] अनन्वितस्य पदस्य पदार्थस्य वा स्वतन्त्रप्रयोगानर्हत्वात्।

एवमेव अद्रव्यार्थकाश्चादयाः[2] क्रियायुक्ताः[3] प्रादयः क्रियाऽयुक्ताः[4] प्रादयश्च निपातसंज्ञकाः

---

१. प्रेत्युपसर्गः पञ्चदशस्वर्थेषु प्रयुज्यते—

नियोगे वियोगे भृशार्थे च तृप्तौ यथा शुद्धिशक्त्यग्रपूजासुशान्तौ।
वदन्त्यादिकर्मण्युदीर्णे···तथा संभवैश्वर्यंदृष्टाभिलाषे॥

—लघूपसर्गदीपिका।

२. 'उपसर्गाः क्रियायोगे' (पा० सू० १.४.२२)।

३. चादयोऽसत्त्वे (१.४.२०)।

४. उपसर्गे घोः किः (३.३.९२), उपसर्गस्यायतौ (८.२.१९) इत्यादयः।

५. निपात एकाजनाङ् (१.१.१४), निपातस्य च (६.३.१३६) इत्यादयः।

---

१. लिङ्गसंख्यान्वितं द्रव्यम्।

२. चादयोऽसत्त्वे (१.४.२०)।

३. उपसर्गाः क्रियायोगे (१.४.२२)

४. प्रादयः (१.४.२१)।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सन्तोऽपि स्वतन्त्रप्रयोगानर्हाः।[1] यथा स्वतन्त्रप्रयुक्तो घटः कम्बुग्रीवादिमदर्थं बोधयति, न तथा केवलं 'चे'ति पदम्। अतश्चादयः[2] परतन्त्राः। नामाख्यातयुक्ता अपि चादयस्तदभिन्नार्थमेव[3] बोधयन्ति। यथा—'अवदत्तम्,[4] विदत्तमि'त्यादि प्रयोगेषु। उपसर्गे सति "अवदत्तम्" इत्याद्येव स्यात्। उपसर्गविभक्तिस्वर-प्रतिरूपकाश्चापि[5] निपाता न स्वतन्त्रप्रयोगार्हाः। उपसर्गप्रतिरूपकाः अवदत्तमित्यादयः। विभक्ति-प्रतिरूपकाः 'अहंयुरि'त्यादयः[6]। स्वरप्रतिरूपकाः 'अ अपेहि' इत्यादयः। तेषां फलं तु प्रकृतिभावः।[7] अतः प्रादयो द्योतकाः येन निपाताश्चादयस्तथेत्येवा-वगन्तव्यम्।

अत्र नैयायिकाः—प्रादयस्तूपसर्गा न सार्थकाः, सार्थकाश्च[8] चादयो निपाता वाचकत्वात्। उपसर्गा-स्तु न तथा, किन्तु द्योतका[1] एव, लाघवात्।[2] अन्यथा स्वादिविभक्तीनां प्रकर्षवाचकत्वमिव प्राद्युप-सर्गाणामपि प्रकर्षादिवाचकत्वस्य[3] निराबाधत्वात्।

नैयायिकैरन्वय[4]व्यतिरेकाभ्यां, समानाधिकरण-प्रातिपदिकार्थयोरभेदान्वय इति व्युत्पत्तौ निपातेतर-सङ्कोचेन[5] चोपसर्ग-निपातानां वाचकता उररीक्रियते; तन्न युक्तियुक्तम्।[6] अतो हेतोः नव्यनैयायिकैः स्वीकृता द्योतकता, किन्तु उपसर्गविषय एव इत्येव

---

१. चादयो न प्रयुज्यन्ते पदत्वेऽपि च केवलाः। —वाक्यपदीयम्।

२. परतन्त्रास्तु चादयः। —वाक्यपदीयम्।

३. नामाख्यातप्रयोगेषु अर्थादभिन्नाः निपतन्ति इति निपाताः। —दुर्गसिंहः, कातन्त्रप्रकाशे।

४. अवदत्तं विदत्तं च प्रदत्तं चादिकर्मणि।
सुदत्तमनुदत्तञ्च निदत्तमिति चेष्यते॥
—पाणिनीय (७.४,४७) सूत्रस्य भाष्यम्।

५. उपसर्गविभक्तिस्वरप्रतिरूपकाश्च निपाताः। —गणसू० १६ (चादिषु)।

६. 'अहंयुः' इत्यादिषु अस्मच्छब्दस्य प्रथमैकवचनान्त-वदस्य प्रतिरूपकं भवति। अन्यथा प्रकृतेरस्मदित्येव श्रवणं प्रसज्येत। —महाभाष्यम्।

७. निपात एकाजनाङ् (१.१.१४)

८. एवं समुच्चयादिवाचिनां चादिनिपातानां 'वृक्षं प्रति विद्योतते विद्युत्' इति कर्मप्रवचनीयानाञ्चार्थो प्रयोगप्रतिपत्तिभ्यामवधारणीयः।

उपसर्ग-निपातानां नाम्नामप्यविभागतः।
प्रयोगप्रतिपत्तिभ्यामनेकार्थोऽवगम्यते॥
—न्यायमञ्जरी, पृ० ३२७-२८।

१. 'प्रणमति' इत्यादौ प्रकर्षविशिष्टनतिर्धातूनामेवार्थः, प्रादयो द्योतका एव, न तु प्रकर्षादिवाचकाः। —सादर्शो व्युत्पत्तिवादः, पृ० १३६।

२. प्रादीनां प्रकर्षादिवाचकत्वे शाब्दबोधसामग्र्यां प्रादिजन्यप्रकर्षाद्युपस्थितेः प्रवेशात् तस्याश्च विभिन्नविषयक-प्रत्यक्षं प्रति समानविषयकानुमितिं प्रति च प्रतिबन्धकत्वे योग्यताज्ञानेन सह विशेष्यविशेषणभावविनिगमनाविरहाच्च प्रतिबध्यप्रतिबन्धकभावसंख्याधिक्यापत्त्या गौरवम्। —सादर्शो व्युत्पत्तिवादः, पृ० १३६।

३. अनन्तधातुजन्यप्रकर्षादिविशिष्टतत्तत्स्वार्थोपस्थितीनां शब्दधीजनकतामपेक्ष्य कतिपयोपसर्गाधीनप्रकर्षाद्युपस्थितीनां तज्जनकताकल्पने लाघवात्। —सादर्शो व्युत्पत्तिवादः, पृ० १३६।

४. उपसर्गाः किमर्थस्य वाचका द्योतका वा इति प्रश्ने स्वयमुत्तरति—अन्वय-व्यतिरेकाभ्यां तदर्थो ह्यवधार्यते। अन्वय-व्यतिरेकाभ्यां तिङादीनां वाचकत्वात् निपातानामपि वाचकत्वम्। —न्यायमञ्जरी, पृ० ३२८।

५. निपातातिरिक्तनामार्थस्यैव अभेदान्वयः इति व्युत्पत्तेः।

६. 'प्रतिष्ठते' इत्यादिषु उपसर्गस्याभावे शक्तिस्वीकारे तु 'नामार्थ-धात्वर्थयोः' इति व्युत्पत्तिसङ्कोचेऽपि गमनवृत्त्य-भावरूपेणैव बोधः स्यान्न तु गमनत्वेनेति। तस्मात् गमनत्वेन अनुभवसिद्धबोधनिर्वाहार्थं धातोर्लक्षणा आवश्यकी। लक्षणा-स्वीकारे च उपसर्गसमभिव्याहार-वैयर्थ्यापत्तिभिया धातोः कस्मिन्नर्थे लक्षणा कर्तव्येत्यत्र तात्पर्यग्राहकत्वमेव उपसर्गाणां द्योतकत्वम्।—निपातार्थनिर्णयः, दर्पणटीकायाम्, वैयाकरण-भूषणसारस्य, पृ० २९३।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तेषां भ्रमः। उभयत्रापि द्योतकता एव। स्पष्टञ्चैतत् 'उपास्येते हरिहरौ, चैत्रमिव पश्यति, शरैरुस्रैरिवोदीच्यान्, वागर्थाविव सम्पृक्तौ, पार्वतीपरमेश्वरौ वन्दे' इत्यादिषु स्थलेषु। 'निपातस्यानर्थकस्य' इत्यादिविधिबलाच्च।

तत्र क्रमशः उपास्येते हरि[1]हराविति। अत्र हृयुपासना किमुपसर्गार्थो विशिष्टस्य धातुमात्रस्य वा? नाद्यः; तथा सति कर्मणि[2] लकारो न स्यात्। न द्वितीयः; गौरवात्।[3] तृतीये खलु द्योतकत्वमेव, तच्चादिष्वपि[4] तुल्यम्। 'चैत्रमिव पश्यति' इत्यादौ सादृश्यविशिष्टं चैत्रपदं लक्ष्यम्। इवशब्दस्तु तात्पर्यग्राहक इत्यस्य सुवचत्वात्।

शरैरुस्रैरिवोदीच्यन्निति निपातानां वाचकत्वेऽन्वयो न स्यात्, अत्र उस्रसदृशैः सरैः रससदृशानुदीच्यानुद्धरिष्यन्नित्यर्थः। अयञ्च उस्रादिशब्दानां तत्सदृशपरत्वे इवशब्दस्य द्योतकत्वे च सङ्गच्छते, अन्यथा प्रत्ययानां प्रकृत्यर्थान्वित-स्वार्थबोधकत्वमिति व्युत्पत्तिविरोधः स्यात्। 'वागर्थाविव सम्पृक्तौ' 'पार्वतीपरमेश्वरौ वन्दे' इत्यत्र वागर्थयोः वन्दिकर्मत्वाभावात् तदुत्तरद्वितीयाया अनन्वयः। यदि च विशेषणविभक्तिः अभेदार्था साधुत्वमात्रार्था वा, तदापि इवशब्दस्य अनन्वय एव। अतो निपाता अपि द्योतका एव।

निपातस्यानर्थकस्येति द्योत्यार्थमादाय अर्थवत्त्वात् प्रातिपदिकत्वम्। वस्तुतस्तु "अव्ययादाप्सुपः (पा० सू० २.४.८२) इति ज्ञापकात् सुबुत्पत्तिः। 'निपातस्यानर्थकस्ये'ति वार्तिकाद्वा प्रातिपदिकत्वम्। 'कृत्तद्धितसमासाश्च' (पा० सू० १.२.४६) इत्यनुक्तसमुच्चयार्थचकारेण निपातानां सङ्ग्रहः। तस्माद् युक्तं निपातानां द्योतकत्वम्।

केचिच्च—व्यञ्जनावृत्ति[1]स्तत्रेति स्वीकुर्वन्ति, तदेव द्योतकत्वम्। द्योतकत्वञ्च किञ्चिदर्थविशिष्टलक्षकत्वम्, तच्च धातोर्विशिष्टार्थे तात्पर्यग्राहकत्वम्। तात्पर्यग्राहकत्वमेव औपसन्दानिकी शक्ति[2]रित्युच्यते।

अथ च पदान्तरसाहाय्यं विना निपातानां, क्रियायोगं विना उपसर्गाणाञ्च अस्तित्वमेव नास्तीति

---

१. द्योतकाः प्रादयो येन निपाताश्चादयस्तथा।
उपास्येते हरिहरौ लकारो दृश्यते यथा॥
—वैया० भूषण०, पृ० ४२।

२. स्वार्थफलव्यधिकरण-व्यापारवाचकत्वरूप-सकर्मकत्वस्य अस्-धातोरुपासनारूप-फलवाचकत्वाभावादनापत्तेस्ततः कर्मणि लकारो न स्यात्। —वैया० भू० सदर्पणम्, पृ० २९४।

अडादीनां व्यवस्थार्थं पृथक्त्वेन प्रकल्पनम्।
धातूपसर्गयोः शास्त्रे धातुरेव तु तादृशः॥
—वाक्यपदीये।

३. विशिष्टस्य गणे पाठाभावाद्धातुत्वानापत्तिः, पाठकल्पने द्विर्वचनाडादिव्यवस्थानुपपत्तेः।
—वैयाकरणभूषणस्य टिप्पण्याम्।

४. तथाऽन्यत्र निपातेऽपि लकारः कर्मवाचकः।
विशेषणाद्ययोगोऽपि प्रादिवच्चादिके समः॥
—वैया० भू०, पृ० ४३।

१. नहि प्रादेः प्रकर्षादौ शक्तिः द्योतकत्वात्। न च लक्षणा; अशक्तत्वात्। प्रशब्दस्तु तात्पर्यग्राहकः, तत्त्वमेव च द्योतकत्वम्। —न्यायसिद्धान्तमञ्जरी।
['तथा च शक्तिलक्षणयोरभावात् प्रजयतीत्यादौ प्रकर्षबोधार्थं प्रादेः व्यञ्जनारूपं वृत्त्यन्तरमवश्यं वाच्यमिति भावः।']
—तत्रैव यादवाचार्यकृतसाराख्यटीकायाम्।

२. प्राद्युपसर्गाणां द्योतकत्वेन वाचकत्वम्। द्योतकत्वञ्च धातोरेव अर्थविशेषे तात्पर्यग्राहकत्वम्, धातूनामनेकार्थत्वात्। उपसर्गोपसन्दानेन शक्तिर्वा द्योतकत्वम्। इयमेव औपसन्दानिकी शक्तिरिच्युच्यते।
—वादिविनोदे, पृ० ७०, इण्डि० प्रेस, प्रयाग।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कृत्वा वाच्यवाचकभावाख्यपक्षस्य च गौरवग्रस्ततया वैयाकरणानां द्योत्यद्योतकत्वमेव निपातोपसर्गाणामित्येष सिद्धान्त एव ज्यायानिति विदाङ्कुर्वन्तु तत्र धीमन्तः।

क्वचिच्च उपसर्गं विनापि एकस्या एव क्रियायाः प्रकरणादिना बहुविधा अर्था प्रतीयन्ते। अतश्च उपसर्गा अवाचका एव।

अथ च उत्तरोत्तरसौन्दर्याभिवृद्धये यथायौवनसम्पन्नेव जनेन चक्षुषोः उपनेत्रं उपादीयते, तथैव पादपूत्यर्थं पदलालित्यार्थं वा निपातोपसर्गाणां प्रयोगोऽभिलक्ष्यते, इत्यपि शक्यते कल्पयितुमिति केचन विवदन्ते।

तत्सर्वं तत्त्वान्वेषिणः नीरक्षीरविवेकिनो विविच्य प्रसाधयन्तु।

(१०५ पृष्ठस्य शेषांशः)

मधुरा ग्रामसप्तकसंयोजिता सती भावनापूरितामुपासनाभक्तिं पूरयतीति महद् भाग्यम्।

एतद्धि मन्द्रपदं सङ्गीतकारैः धीरगम्भीरप्रथमस्वरसञ्चालने संयोज्यते, यत्र प्रथममन्द्रसप्तकस्वरैर्गीयते। प्राचीनग्रीकभाषाविशेषज्ञैरपि न्द्व् ndw-न्त्र ntr इति पदव्यत्ययेन 'मन्द्र'शब्दस्य मूलगीतिस्वरविषये प्रयोगः कृतः। तथा च मन्द्र-मध्यम-तारेति त्रिसप्तकस्वराणां व्यवहारः सोमयागे प्रातःसवनादिषु क्रियते। अत्र हि यज्ञप्रयुक्ता दिव्या वाक् कामधेनुरूपेति प्रमाणयन्ति—

वाचं धेनुमुपासीत। तस्याश्चत्वारः स्तनाः स्वाहाकारो वषट्कारो हन्तकारः स्वधाकारः। तस्यै द्वौ स्तनौ। देवा उपजीवन्ति, स्वाहाकारं च वषट्कारं च। हन्तकारं मनुष्याः, स्वधाकारं पितरः। तस्याः प्राण ऋषभः, मनो वत्सः॥

(बृहदा० ५ ९.१)

अत्र हि यज्ञप्रयोगे स्वाहा-वषट्शब्दाभ्यां सह संयोजितवेदमन्त्रोच्चारणेन देवाः प्रसन्नतां भजन्ते। 'हन्त हन्त' इति यज्ञशेषप्रसादं भुञ्जाना मनुष्या दिव्यामृतस्वादमावहन्ति। पितरश्च 'स्वधा'शब्देन सह संयोजितश्रद्धाञ्जलितर्पणप्रदानेन परमां तृप्तिं सेवन्त इति सर्वा हि वेदप्रयुक्ता दिव्या वाक् कामधेनुरूपेण सेव्येति तात्पर्यम्।

एषा हि यज्ञभावना वेदप्रतिपाद्यदेवस्तुति-शंसन-चरणसंयोजिता सती ब्रह्मनिष्ठां समावहन्तीति तदनुसारं स्वजीवने अभ्युदय-निःश्रेयस-सिद्धिसाधकं धर्ममाचरन्तो मनुष्या दिव्यमननद्वारेण मन्त्राणां वाचि विनियोगं कुर्वन्ति। तदनुकल्पं च स्वव्यवहारमपि शुद्धाचरणपूर्वकमनुतिष्ठन्तीति प्रमाणीक्रियते —

यद् वै मनसा ध्यायति, तद् वाचा वदति, तत्कर्मणा करोति।

(तैत्तिरीयसंहिता ६.१०)

एवञ्च मनोवाक्कर्मभिः यज्ञनारायणस्य नित्य-नैमित्तिक-काम्ययज्ञानुष्ठानेन प्रसाद लभन्तो मानवाः जीवनसाफल्यमालभन्ते। अत एवोच्यते—

मनस्येकं वचस्येकं कर्मण्येकं महात्मनाम् इति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चम्पूकाव्य-स्वरूपसमीक्षा

—श्रीमती मिथिलेश शर्मा—

[अनुसन्धात्री—वाराणसेय-संस्कृत-विश्वविद्यालयस्य]

संस्कृतवाङ्मयेतिहासे मिश्रकाव्यस्य एका विधा चम्पूकाव्यं चिरादुपेक्षितप्रायमेव। लक्षणकारा अपि तत्परिभाषां न परिभाषितवन्तः। अत एवात्र काव्यस्य विविधवैशिष्ट्ययुता विधेयं समासतो विविच्यते।

चुरादिगणीयेन गत्यर्थकेन 'चपि'-धातुना 'अ'-प्रत्ययं योजयित्वा 'चम्पयति इति चम्पूः' इति विग्रहेण 'चम्पू'शब्दो निष्पद्यते। संस्कृतसाहित्यस्य परिशीलनेन ज्ञायते यत् शब्दोऽयं प्रथितकाव्यलक्षणकर्तुः दण्डिनः 'काव्यादर्शे' सर्वप्रथमं समुपलभ्यते। दण्डिनः कालः खैष्टाब्दस्य षट्शतकात् सप्तमशतकं यावत् (६००–७०० ई०) मन्यते। तेन महाकविना लिखितम्—**गद्यपद्यमयी काचित् चम्पूरित्यभिधीयते** इति। अत्र 'काचित्'शब्दः सुस्पष्टमस्याः सन्दिग्धत्वं द्योतयति। एतेन प्रतीयते यद् दण्डिनः काले चम्पूकाव्यं प्रारम्भिकावस्थमेवासीत्, न तदा तत्प्रौढतां गतं स्यात्। तदीयं समग्रं वैशिष्ट्यं काव्यनिकषे परीक्षितं नाभवदिति।

अत एव खैष्टीय-दशमशताब्द्याः पूर्वं किमपि चम्पूकाव्यं नासाद्यते। तथापि संस्कृतवाङ्मयस्य गद्य-पद्यात्मिका मिश्रशैली पुनर्वैदिककालादेव समुपलभ्यते। उपनिषत्स्वपि सा प्राप्यते। 'ऐतरेय-ब्राह्मण'स्य 'हरिश्चन्द्रोपाख्यानम्' गद्य-पद्यमयशैल्या उत्कृष्टतमं निदर्शनम्। खैष्टवत्सरारम्भपूर्ववर्तिनि पातञ्जले महाभाष्येऽपि गद्यं चरमोत्कर्षतां गतं दरीदृश्यते। पालिजातकेषु पुनः मिश्रशैली समासाद्यते। किन्तु तेषां भाषा सरला, पद्यं च सापेक्षतया प्रयुक्तमस्ति। नूनमेभिर्वाङ्मयैः चम्पूकाव्यं बहुशः प्रभावितं स्यादिति कल्प्यते।

गद्य-पद्य-मिश्रशैल्या निदर्शनं ख्रिष्टस्य प्रथम-द्वितीयशताब्द्यां जायते। तदा लिखितेषु लेखेष्वपि मिश्रशैली सर्वोत्कर्षं गता समुपलभ्यते। समस्तपदालङ्कृतदीर्घवाक्यानि अस्यां मिश्रशैल्यां समासाद्यन्ते, यद्धि चम्पूकाव्यस्यैकं वैशिष्ट्यम्। 'जातकमाला' पुनरस्य चम्पूकाव्यस्य कृते शैली-वर्ण्यविषयदृष्ट्या नितान्तं पथप्रदर्शिका समभवदिति स्फुटं वक्तुं शक्यम्। एवमेव शिलालेखेष्वपि चम्पूकाव्यमिदं स्खलितमासीत्। तथापि ग्रन्थरूपेण निबद्धं चम्पूकाव्यं सर्वप्रथमं दशमशताब्द्यामेव दृशोर्विषयीभवति। यथा—नलचम्पूः, यशस्तिलकचम्पूः इति।

वयमस्मिन् निबन्धे मुख्यतश्चम्पूकाव्यस्य लक्षणविषये एव विवेचयिष्यामः, यथाशक्त्या तस्यासाधारणलक्षणाय च प्रयतिष्यामः। सन्दर्भेऽस्मिन् सर्वप्रथमं महाकविर्दण्डी एव समायाति। तेन हि 'गद्यपद्यमयत्व'-मात्रं चम्पूकाव्यस्य लक्षणं निर्दिष्टम्। किन्तु नैतत् पर्याप्तम्, यतो हि कथा-नाटकादिष्वपि तस्यातिव्याप्तेः। पञ्चतन्त्रे कथासाहित्येऽपि गद्यपद्यद्वयं प्राप्यत एव।

ततः परं हेमचन्द्र-वाग्भटाचार्यौ चम्पूलक्षणमिदं जगदतुः—'गद्यपद्यमयी साङ्का सोच्छ्वासा चम्पूः' इति। किन्तु इदमपि लक्षणमव्याप्तिग्रस्तम्। साङ्कत्वं सोच्छ्वासत्वञ्च सर्वत्र चम्पूकाव्येषु न घटते। समुपलब्धेषु ५२४ चतुर्विंशत्युत्तरपञ्चशतसङ्ख्यकेषु चम्पूकाव्येषु नलचम्पूः, गङ्गावतरणचम्पूश्चेति चम्पूद्वय-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मेव साङ्कं दृश्यते। प्रकरणविभाजकमभिधानमिदं शिष्टेषु चम्पूकाव्येषु नैकविधम्। यथा—यशस्तिलकचम्पूग्रन्थे 'आश्वासः'। चम्पूरामायणे 'काण्डम्'। काकुत्स्थविजयादिषु 'समुल्लासः'। विद्वन्मोदतरङ्गिणीप्रभृतिषु 'तरङ्गः'। जीवन्धरचम्पूप्रभृतिषु 'लम्भकः'। आचार्यदिग्विजयादिषु 'कल्लोलः।' भागीरथीचम्पूग्रन्थे 'मनोरथः'। मन्दारमन्दचम्पूग्रन्थे 'बिन्दुः'। रामचन्द्रचम्पूग्रन्थे 'परिच्छेदः' इति नैकरूपाणि प्रकरणानि विभक्तानि। अत एव लक्षणद्वयमपीदं न निर्दुष्टमिति।

अनन्तरं ख्रिष्टीय-चतुर्दशशताब्दीकः साहित्यदर्पणस्य प्रणेता श्रीविश्वनाथः चम्पूकाव्यस्य लक्षणमित्थमभिदधौ—"गद्यपद्यमयं काव्यं चम्पूरित्यभिधीयते। यथा—देशराजचरितम्" इति। किन्तु सुस्पष्टमिदं यदयमपि मनीषी असाधारणं चम्पूकाव्यलक्षणं निदर्शयितुं न प्राभवत्। यतो हि—लक्षणरूपबन्धनाभावेन चम्पूसाहित्यं निर्झरिणीवद् अलङ्कृतशैलीरूप-कलकलनिनादैः सर्वेषां हृत्तन्त्रीः झङ्कुर्वद् स्वेच्छया यां कामपि दिशं प्रवहत् प्रगतिशीलमासीत्। इत्थं प्रायेण सर्वेषु विषयेषु स्वरूपादिभिर्वैशिष्ट्यैः समलङ्कृतं चम्पूकाव्यं लक्षणशृङ्खलाभिर्निबद्धुं केऽपि मनीषिणो नाशक्नुवन्निति स्फुटम्।

अथ शब्दकल्पद्रुमे कोषे एतत्स्वरूपं दृश्येत चेत् तत्र 'चम्पू'शब्दः स्त्रीलिङ्गः काव्यविशेषबोधकश्च उक्तः। जटाधरमतानुसारेण तल्लक्षणं च तत्रेदं निर्दिष्टम्—'गद्यपद्यमयो वाणी चम्पूरित्यभिधीयते' इति। एवञ्च अयमपि कोषकारश्चम्पूकाव्यस्य विश्वनाथकृतमेव लक्षणं प्रकारान्तरेण पुनरावर्तयत्।

अग्निपुराणे उक्तम्—

'गद्यं पद्यं च मिश्रं च काव्यादि त्रिविधं स्मृतम्।'

तथा च अत्रापि काव्यस्य अङ्गत्रयमात्रमेव समुल्लिखितम्। एतेन प्रतीयते यन्मिश्रसाहित्यं तदानीमपि प्रचलितमुपलब्धं चासीत्। तथापि चम्पूकाव्यलक्षणविषये तत्रापि न कश्चित्सङ्केतो लभ्यते।

श्रीहरिदासभट्टाचार्याः प्राहुः—'चमत्कृत्य पुनाति सहृदयान् विस्मयीकृत्य प्रसादयति इति चम्पूः।' अत्रापि गद्य-पद्योभयसंश्लिष्टरूपेण पाठकमद्भुतविधिना आह्लादयितुं समर्थमिदं काव्यमित्येव सङ्केतितम्। नैतत् पुनरसाधारणं लक्षणमस्य।

डॉ० सूर्यकान्त त्रिपाठिना सम्पादितस्य दैवज्ञसूर्यकृतस्य 'नृसिंहचम्पू'नाम्नो ग्रन्थस्य भूमिकायाम् अज्ञातकविकृता चम्पूकाव्यपरिभाषा समुल्लिखिता वर्तते। यथा—

गद्यपद्यमयी साङ्का सोच्छ्वासा कविगुम्फिता।
उक्तिप्रत्युक्तिविष्कम्भशून्या चम्पूरुदाहृता॥ इति।

अत्रेदं बोध्यम्—चम्पूकाव्यस्य गद्यपद्यमयता तु सर्वैरभ्युपेयत एव। परं साङ्कत्वम्, सोच्छ्वासत्वञ्च पूर्वोक्तचम्पूकाव्यद्वयं परित्यज्य कुत्रापि चम्पूकाव्ये न दृश्यत इति पूर्वमेवोक्तम्। अतः हेमचन्द्रादेः पुनरावृत्तिरूपं लक्षणमिदं न निर्दुष्टं वक्तुं शक्यते। 'विश्वगुणादर्शचम्पू'काव्यं पुनः द्वयोः पात्रयोः कृशानुविश्वावसोः उक्ति-प्रत्युक्त्याधृतमेव। कतिपय-चम्पूकाव्यानामुत्तरार्धेषु उक्ति-प्रत्युक्तियुक्तत्वमेव दृश्यते। यथा—वीरभद्रविजयः, तत्त्वगुणादर्शः, विद्वन्मोदतरङ्गिणी, श्रीनिवासचम्पूश्चेति। अत एव इदमपि लक्षणं चम्पूकाव्यस्य नासाधारणो धर्मो भवितुमर्हति। एवमेव विष्कम्भकादीनां प्रयोगस्तु नाटकेषु रूपकेषु वा क्रियते। श्रव्यकाव्ये तु तथा व्यवहाराभावात् श्रव्यस्य चम्पूकाव्यस्य लक्षणे तच्छून्यत्वनिवेशो व्यर्थः सन् हास्यास्पदत्वमेव लक्षणकृतः साधयति।

इत्थं साहित्यशास्त्रेषु चम्पूकाव्यस्य किमपि प्रामाणिकं सर्वाङ्गपूर्णं लक्षणं नोपलभ्यते। सर्वत्र चम्पूकाव्यस्य किञ्चिद् बाह्यरूपमेव लक्ष्यते, आभ्यन्तररूपं तु न कुत्रापि। कोऽपि लक्षणकारः ईदृक् लक्षणं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चम्पूकाव्यस्य निर्देष्टुं न शशाक यस्मिन् अन्तर्बाह्यं समग्रवैशिष्ट्यं समाहितं भवेत् । 'गद्यपद्यमयता' इत्येको लक्षणांशः प्रायेण भ्रान्तिमुत्पादयति ।

ऐतिहासिकानां मतम्

साहित्यशास्त्रकाराः चम्पूकाव्यं स्पष्टं लक्षणैः परिभाषयितुं प्रायेण न शेकुः । ऐतिहासिकानां बुद्धौ चम्पूकाव्यस्य कीदृशं रूपम्, तदप्यत्र समासतः समीक्ष्यते । तत्रादौ 'कीथ' महोदयो लिखति :

They use prose or verse indifferntly for the same purpose,......

But it is only from a late period that we have works written in the full kavya style in which poet shows now his ability in prose and now in verses without seeking to reserve verses for any special end.

—A History of Sanskrit literate P. 332 By A. B. Keitu.

अयमैतिहासिकः चम्पूकाव्यस्य लक्षणं गद्यपद्यमयमित्येव स्वीकरोति । तन्निर्दिष्टो गद्यपद्यसंश्लेषः किञ्चिद् वैशिष्ट्यमादधाति । महानुभावोऽयं गद्यपद्यसमभावं प्रयोगे लक्षयति, चम्पूकाव्यस्यान्तमपि पक्षं प्रत्यवदधाति । एतदनुसारं कविः कदाचित् पद्यप्रयोगे स्वयोग्यतां प्रदर्शयति, अन्यदा तु गद्यप्रयोगे । गद्यपद्ययोः प्रयोगोऽयं निरपेक्षरूपेण क्रियते । कश्चिदपि कविः कथाख्यायिकावद् पद्यं विशेषाद्देश्याय नापेक्षते । यद्यपि परिभाषेयं न पूर्णसमस्तचम्पूकाव्यस्य, तथापि **निरपेक्षगद्यप्रयोगरू त्वम्** आंशिकं लक्षणम् अन्येभ्यो लक्षणेभ्यो भिन्नं दृष्टिपथमायात्येव ।

केचिद् ऐतिहासिकलक्षणकाराः दण्डिप्रभृतिलक्षणकारवचनमेवानुसत्य गद्यपद्यमयत्वमेव चम्पूकाव्यस्य लक्षणं निरधारयन् । तेषामुलेखः पिष्टपेषणमात्रमेव ।

श्री सी० कुन्हनराजा महोदयो लिखति :

'The admixture of prose and metrical in more or less equal proportions took a definite form in the classical period and this became a special pattern of literary art in sanskrit literature known as the Champu."

—Survey of Sanskrit literature P. 21.5

अयं गद्य-पद्ययोः मिश्रितः प्रयोगो न्यूनाधिको वा भवेत्' इत्येतदेव चम्पूकाव्यस्य लक्षणमभिमनुते स्म । अयमपि अन्यानि काव्यविशेषणानि न लक्षयति, तथापि गद्यपद्यप्रयोगे गद्यपद्ययोः मात्राविषये 'न्यूनाधिका वा' इति निर्दिशति । पद्यस्य सोद्देश्यप्रयोगोऽपि अनेन न वर्जितः । लक्षणानि अपराणि न सङ्केतितानि, इत्येषाऽपि अपूर्णा परिभाषा ।

श्री एम० कृष्णमाचारी कथयति :

'A narrative in mixed prose and verse has been called Champu.'

अस्मिन् लक्षणे एकमधिकं वैशिष्ट्यं प्रदर्शितं 'वर्णानात्मकता' इति । चम्पूनामकाव्यं वर्णनप्रमुखं भवेदित्यर्थः ।

श्री के० चन्द्रशेखरः कथयति :

'It contains a free mingling of prose and verse in course of narration.'

'वर्णनात्मकता' अस्यामपि परिभाषायां निर्दिष्टा । सर्वाणि चम्पूकाव्यानि न वर्णनप्रधानानि । कानिचिद् कथावस्तुप्रधानान्यपि दृश्यन्ते ।

मोनियर विलियम्स महोदय उल्लिखति :

"A kind of elaborate Composition in which the same subject is continued through alterations in prose and verse."

(A Sanskrit English Dictionary)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वैशिष्ट्यमेकमधिकमाभासते लक्षणेऽस्मिन्—'निरपेक्षगद्य - पद्यप्रयोगनिर्देशः' इति 'Elaborate composition.' चम्पूकाव्यमलङ्कृतभाषा - समायुक्तं भवेदिति सङ्केत उक्तवचनेन प्राप्यते। परिभाषेयं संस्कृतवाङ्मयस्य विविधेभ्यः काव्याङ्गेभ्यो भिन्ना परिलक्ष्यते। एकतः कथाख्यायिकाश्च सरलभाषा-समायुक्ताङ्गाः पृथक् क्रियन्ते, अपरतः विरुद-दानपत्र-करम्भकादि-सापेक्षपद्ययुक्तयोः काव्याङ्गयोः वैभिन्न्यं स्पष्टम्। प्राचीनकालादारभ्य ब्राह्मणोपनिषत्सु आरण्यकेषु च मिश्रसाहित्यस्य स्वरूपमपि चम्पू-काव्येतरमेवेति प्रमाणयितुं वयं शक्ताः। तेन काचित् चम्पूकाव्यस्य परा विशेषता अस्माकं समक्षे आयाति।

आधुनिकः ऐतिहासिकः श्री बलदेवोपाध्यायो वदति :

'चम्पू-काव्य गद्यकाव्य का ही प्रकारांतर से उपबृंहण प्रतीत होता है :'

—(संस्कृत साहित्य का इतिहास, पृ० ३६३)

उपाध्यायमहानुभावस्य कथनमिदं न युक्तियुक्तम्; चम्पू-साहित्यस्य पर्यवेक्षणेन प्रतीयते यत् कस्मिंश्चिद् चम्पूकाव्ये गद्यमात्राऽधिका वर्तते। यथा 'वरदाम्बिका-परिणय-चम्पू'ग्रन्थे। अपरेषु तु चम्पूग्रन्थेषु पद्यभाग-मात्राधिक्यम्। यथा—अनन्तभट्टकृतं 'चम्पूभारतम्'। कस्मिंश्चिद् गद्य-पद्ययोः सममात्रा। यथा—'नीलकण्ठ-विजयः', 'वीरभद्रचम्पू'ग्रन्थश्च च। अत एव चम्पूकाव्यं न गद्यस्यैव उपबृंहितं रूपम्, पद्यस्यापि तदुपबृंहितं रूपं भवितुमर्हति।

कानिचित् चम्पूकाव्यानि उक्ति - प्रत्युक्तिरूपेण संवादयुक्तान्यपि वर्तन्ते। यथा—'विश्वगुणादर्शचम्पूः'। इमानि चम्पूकाव्यानां परवर्तिरूपाणीति कथमपि कथयितुं न शक्यते। पुनश्च 'नलचम्पूः' साङ्को वर्तते। तादृशचम्पूकाव्याणि गद्यकाव्यापेक्षया नाट-केभ्योऽधिकं प्रभावितानीति।

एस. दासगुप्ता महोदयो लिखति :

In actual practice the question in the absence of the authoritative prescription seems never to have worried the authors. We employ prose and verse indifferently for the same purpose. The verse is not always specially reserved as one would expect for an important idea-poetic description and impressive speech, a pointed moral or a sentimental outburst, but we find that even for ordinary narrative and description verse is as much pressed into service as prose.

—History of Sanskrit Literature P. 433

अयमपि 'कीथवत्' चम्पूकाव्ये गद्य-पद्ययोः निर्बाध-प्रयोगं सूचितवान्। पद्यं विशेषप्रयोजनाय न सुरक्षितं भवति तत्र। विचारविशेषाय प्रभावोत्पादकोक्त्यै, आदर्शविशेषाय, भावात्मकावेगायैव पद्यं चम्पूकाव्ये प्रयुज्यते इति वचनं समीचीनम्; सामान्यवर्णने-ष्वपि पद्यं गद्यवत् प्रयुज्यत एवेति न तिरोहितं विपश्चिताम्।

समस्तैतिहासिकमतमन्थनस्य पश्चात् चम्पू-काव्यस्य असाधारणो धर्मः प्राप्यते—'निरपेक्षगद्यपद्य-प्रयोग' इति।

विद्वत्प्रवरः डा० भोलाशङ्कर व्यासः कथयति :

"बाण के उत्तराधिकारियों में बाण जैसी प्रतिभा नहीं दिखायी देती। बाण जैसी गद्य-शैली का निर्वाह करना उनके लिए बड़ा कठिन हो गया। गद्य के फलक पर बाण जैसी प्रवाहमय शैली को बनाये रखना तथा वैसी वर्णन-पटुता का परिचय देना बाण के बाद के गद्यकवियों के लिए संभव न था। फलतः उन्होंने गद्य के बीच-बीच पद्य की छौंक डालकर एक नयी शैली को जन्म दिया।"

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्रिविक्रमभट्टेन, भोजेन, तिरुमालम्बया च विरचितानि कतिपयचम्पूकाव्यानां गद्यखण्डानि बाणशैल्याः न कथमपि साहित्यिकसौष्ठवस्य न्यूनतां भजन्ते। यदा गद्य-पद्ये उभे अपि चरमोत्कर्षं प्राप्नुताम्, तदैव चम्पूकाव्यं जन्म लेभे। कवयः नूतनतमशैल्या स्वात्मनः काव्यरचनाक्षमतां प्रदर्शयितुमेकां नूतनां विधां संस्कृतसाहित्ये आविष्कृतवन्तः चम्पूरूपाम्। अनेकचम्पूकाव्यानां गद्यखण्डानि बाणस्य 'कादम्बरी'वद् अलङ्कृतैश्च समस्तैः पदैः समलङ्कृतानि दृश्यन्ते। अतः चम्पूकाव्यरचनोद्देश्यस्तेषां केवलं गद्य-पद्यरचनाऽक्षमतागूहनरूपः स्यादिति न कथमपि युक्तिसङ्गतम्।

अन्यच्च, व्यासमहोदयेन अस्याः निजोक्त्याः खण्डनमपि अपरत्र कृतं दृश्यते। 'नलचम्पू'काव्यस्य प्रणेतारं त्रिविक्रमभट्टमुद्दिश्य ते लिखन्ति :

'त्रिविक्रम की शैली से स्पष्ट है कि बाण के शाब्दी क्रीडावाले पक्षको त्रिविक्रम ने और बढ़ाया और इसका प्रभाव बाद के सभी गद्यकाव्यों पर देखा जा सकता है।'

एतेन सुस्पष्टमिदं यत् 'चम्पूकाव्यकर्तारः गद्य-पद्ययोः रचनाकौशले स्वाधिपत्यं प्रदर्शयितुमेव तानि काव्यानि विरचितवन्तः। दृश्यते चेदं यत् कतिपये एव विद्वांसस्तत्र पूर्णं साफल्यं लब्धवन्तः। सुधीरकुमार गुप्तोऽपि कथयति :

'उपलब्ध चम्पूकाव्यों में कहीं-कहीं ही विषय-निर्वाह में विशेषता आ पायी है। इनमें विषय और शैली में ऐसी कोई विशेषता नहीं जो अन्य गद्य या पद्यकाव्यों में अनुपलब्ध हो। इसमें न तो गद्य-काव्य की ओज-सफलता है, न पद्य-काव्यकी शक्ति और प्रभाव। इनमें लेखक की अपनी कोई मौलिकता नहीं है।'

'संस्कृत साहित्यका सुबोध इतिहास'-ग्रन्थे एस० एन० दासगुप्ता महोदयो लिखति :

The Champu thus shares the features fo both prose and poetry, but the mosaic is hardly of an attractive pattern, the large number of champus that exist scarcely show any special characteristic in matter and manner which is not already familiar to us from the regular metrical and prose kavya. The Champu has neither the siveway strength and efficieny of a real prose nor the weight and power of real poetry-Champu-writer as a rule has no real voice of his own.

—(A History of Sanskrit Lit P. 434)

ऐतिहासिकानां समस्तचम्पूकाव्यविषयिणी धारणेयं न न्यायसङ्गता। 'नलचम्पूः', 'यशस्तिलकचम्पूः', 'रामायणचम्पूः', 'वरदाम्बिकापरिणयचम्पूः' काव्यान्येतानि भाषाशैलीवर्ण्यविषयदृष्ट्या गद्यपद्ययोरुत्कृष्टरूपमपि प्रदर्शयन्ति। चम्पूकाव्यस्य यावान् विस्तृतो विषयः परिलक्ष्यते, न तथा संस्कृतवाङ्मयस्य कस्मिन्नपि काव्याङ्गे इत्यपि वक्तुं शक्यते। नूनं संस्कृतसाहित्ये चम्पूकाव्यानां महत्तमं योगदानम्। तद्धि नवीनामेव विधामुपस्थापयति। कस्यचिदपि मानसं गद्यरूप-कान्तारे परिभ्रमन् पद्यरूपं निर्झरमासाद्य निश्चयमेव प्रमोदमनुभवति।

'जीवन्धरचम्पू'-काव्ये महाकविर्हरिश्चन्द्रो लिखति :

गद्यावलि पद्यपरम्परा च
प्रत्येकमप्यावहति प्रमोदम्।
हर्षप्रकर्षं तनुते मिलित्वा
द्राग् बाल्यतारुण्यवतीव कान्ता॥

अर्थात् गद्य-पद्यचारुत्वं तथैव हृदयमाह्लादयति यथा बाल्यकाल-तारुण्यमध्यावस्थिता कान्ता रसिकान् प्रमोदयति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तथ्यमिदं काव्यकारास्ते सम्यगजानन् यद् गद्यस्य दुरूहत्वेन समस्तपदबाहुल्यजन्यनीरसत्वेन पद्यस्य प्रसादमयत्वेन सौष्टवेन, ध्वन्यात्मकत्वेन च गद्यपद्ययोर्भेदः। गद्यस्य पद्यस्य वा एकैकस्य प्रयोगेण ते भाषाभिव्यञ्जनायां व्यतिरेकमन्वभूवन्। ते इदमप्यन्वभूवन् यत् तेषामन्तर्निहितानां समस्तभावनानां गद्यपद्ययोरुभयोरपि समत्वभावेन प्रयोगोऽनिवार्यः। निजकाव्यस्य स्वरूपं रोचकतमं रमणीयतरं हृदयग्राही च भवत्वेतदर्थं ते मिश्रशैल्याः प्रयोगं नितान्तं व्यावहारिकं मन्वते स्म।

शरभोजी महाशयाः प्राहुः—

पद्यं हृद्यमपीह गद्यरहितं धत्ते न हृद्यास्पदं,
गद्यं पद्यविवर्जितं च भजते नास्वाद्यतां मानसे।
साहित्यं हि तयोर्द्वयोरपि सुधामाध्वीकयोर्योगवत्,
सन्तोषं हृदयाम्बुजे वितनुते साहित्यविद्याविदाम्॥

(कुमारसम्भव-चम्पूः)

महाशयस्यास्य चम्पूरचनाया उद्देश्योऽपि स्पष्ट एव यद् गद्यपद्ययोः मिश्रणं सुधामाध्वीकयोर्योगवत् निर्मातुं स चम्पूनाम्नीं मिश्ररचनां चकार। राज्ञी तिरुमालम्बाकृतस्य वरदाम्बिकापरिणयचम्पूकाव्यस्य भूमिकायां विद्वद्वरः डॉ० सूर्यकान्त त्रिपाठी लिखति :

The prime object of Tirumalamba in writting this Champu was to exhibit the beauty of Sanskrit prose and variety of imaginary as was doubtless th case with Subandh Dandin & Bana

अयमपि चम्पूकाव्यरचनोद्देश्यं गद्य-पद्ययोः समभावेन वर्णनपटुत्वप्रदर्शनमेव कल्पयति।

निष्कर्षोऽयं यत् चम्पूकाव्यं मिश्रकाव्यस्य एका विधेति सर्वे विद्वत्प्रवराः ऐकमत्येनेदं स्वीकुर्वन्ति। गद्यं पद्यं वा कोऽप्युद्देश्योऽत्र नापेक्षते। अस्यां स्वतन्त्ररूपेण गद्य-पद्ययोः प्रयोगः कर्तुं शक्यते। काव्यमिदं समस्तपदसम्पन्नं सालङ्कृतं च भवति। इयमेका प्रबन्धात्मिका विधा काव्यस्य। उक्ति-प्रत्युक्तिरहितानि चम्पूकाव्यानि परित्यज्य प्रायेण सर्वाणि चम्पूकाव्यानि कथावस्तुप्रधानान्येव। कतिपयवर्णनप्रधानेषु काव्येषु कथावस्तु न प्रधानम्।

चम्पूकाव्यरचनाया उद्देश्यस्तेषां गद्यरचनायोग्यताप्रदर्शनमिति कथनं सर्वथाऽनुचितम्। एषां चम्पूकाव्यानां वर्ण्यविषयः सुविस्तृतः।

"चम्पू-काव्यों के वस्तुग्रहण का क्षेत्र संस्कृत की किसी भी एक काव्यविधा से विस्तृत एवं व्यापक है। एक ओर पुराण, दूसरी ओर सामान्य जीवन की लोककथाओं तक ··। भारतीय जन-जीवन की जैसी झाँकी यहाँ मिलती है··· अन्यत्र दुर्लभ है।"

—'चम्पू-साहित्य का आलोचनात्मक अध्ययन'।

अत एव एषु मौलिकतायाः सर्वथाऽभाव इदमपि कथनं नोचितम्—

"गद्य-पद्य-मिश्रित चम्पू-काव्य कहलाता है। चम्पू-काव्यों में गद्य-पद्य की मात्रा निश्चित नहीं है। गद्य और पद्य वर्णन के किसी विशेष अंश के लिए सुरक्षित न रहकर समान रूप से व्यवहृत हुए हैं। चम्पूकाव्यों के वर्ण्य-विषयों का क्षेत्र व्यापक है। इसके मुख्य स्रोत पुराण रहे हैं। चम्पू-काव्यों का अङ्गी रस कोई भी हो सकता है।"

—'चम्पू-साहित्य का आलोचनात्मक अध्ययन'।

'चम्पूरामायण'स्य साहित्यिकं परिशीलनम्' नामके शोधप्रबन्धे प्रबन्धात्मकत्वं, सालङ्कृतत्वञ्चेति द्वे चम्पूकाव्यविशेषते अपि परिगणिते। परं तत्रापि चम्पूकाव्यलक्षणकरणे नितान्तमसामर्थ्यमेव दृश्यते।

काऽपि साहित्यिकविधा सीमाबद्धैव सम्यग् बोधगम्या भवति। तदैव कश्चिदपि तस्याः स्वरूपं सम्यक् ज्ञातुं प्रभवति। लक्षणविहीनं तु काव्याङ्गं मृगमरी-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चिकावत् प्रतीयते। काव्यनिकषे कषणमपि न तस्य सम्भवि। उपरिवर्णितानामैतिहासिकानाम्, शास्त्रज्ञानाम्, अनुसन्धातॄणां च विचारान् समालोच्येदं वक्तुं शक्यते यत् सन्ति केचिद् असाधारणा धर्माश्चम्पूकाव्येषु इति। यथा—१. निरपेक्षगद्यपद्यमयता, २. प्रबन्धात्मकता, ३. सालङ्कृतत्वं च। तथा च तस्येयं सामान्यतः परिभाषाऽपि समुपस्थापयितुं शक्यते—

'निरपेक्षगद्यपद्यमयं सालङ्कृतं प्रबन्धात्मकं च चम्पूकाव्यम्' इति।

अथ एतेषु एकैकान् गुणान् समासत व्याख्याय तेषामौचित्यं प्रदर्श्यते :

निरपेक्ष-गद्यपद्यप्रयोगः—सकृद्दर्शनेनैव काव्येऽस्मिन् वैशिष्ट्यमिदं दृग्गोचरं भवति। सर्वैरपि इतिहासज्ञैः शास्त्रविद्भिरपि स्वीकृतमिदम्। पूर्वरचितमिश्ररचनासु ब्राह्मणारण्यकोपनिषत्प्रमुखेषु कानिचिद् आख्यानानि मिश्रशैल्यां रचिताकानां काव्यानामुदाहरणानि, परं तत्र गद्य-पद्यमात्राया अपेक्षा वर्तते। कथाख्यायिकास्वपि पद्यं प्रयोजनविशेषेण प्रयुक्तम्। विरुद-करम्भक-दानपत्रादिष्वपि पद्यप्रयोगः सीमितः सोद्देश्यश्च भवति। सामान्यवर्णने एकदा गद्यप्रयोगः, पुनश्च पद्यप्रयोगः सर्वप्रथमं चम्पूरचनास्वेव प्राप्यते। इत्थमयं विशेषो चम्पूकाव्यस्य मिश्रशैल्यां विरचितेभ्यः काव्याङ्गान्तरेभ्यः पृथक्कर्तुं समर्थः।

सालङ्कृतत्वम्—कतिपयचम्पूग्रन्थान् व्यवकलय्य सर्वाणि चम्पूकाव्यानि समस्तपदयुक्तानि अङ्कृतानि च वर्तन्ते। गद्यपद्ययोरुभयोर्दाक्षिण्यं प्राप्य कवयश्चम्पूकाव्यानि विरचितवन्तः स्वीयं भाषाधिपत्यं रचनाकौशलं च प्रदर्शयितुम्। तदा अलङ्कारभूषिता समस्तपदसुशोभिता च भाषा कवीनां निकष आसीत्। बाण-सुबन्धु-दण्डिप्रभृतीनां कृतयस्तु विषयेऽत्र आदर्शभूता आसन्। अत एव चम्पूकाव्यनिर्मातारः द्वयोः गद्य-पद्ययोः प्रावीण्यप्रदर्शनमेवेति लक्ष्यं निर्ध्याय अलङ्कार-चमत्कृतां भाषां योजयामासुः।

प्रबन्धात्मकत्वम्—प्रायेण चम्पूकाव्यानि किञ्चित् 'कथावस्तु' आश्रित्यैव रचितानि। बन्धविहीनं मिश्रशैल्यां निबद्धं ग्रन्थं चम्पूकाव्यं कथयितुं वयं न शक्नुमः। तस्य मुक्तकरचनाभिः भेदप्रदर्शनं दुष्करमित्येकं कारणम्। द्वितीयं तु विरुद-करम्भकदानपत्रादिभिरपि तस्य भेदः प्रदर्शयितुं न शक्यते। पृथक्करणाय चम्पूकाव्यस्य प्रबन्धात्मकत्वरूपोऽसाधारणो धर्मोऽनिवार्यः। कानिचिद् अपवादस्वरूपाण्यपि चम्पूकाव्यानि प्राप्यन्ते। उक्तिप्रत्युक्त्याश्रितानि—'विश्वगुणादर्शचम्पू'वत् चम्पूकाव्याणि किमपि विशिष्टं कथावस्तु नाश्रयन्ते। किन्तु अपवादाः पुन विज्ञाननियमेष्वपि वर्तन्ते। पुनश्च, शृङ्खलाविहीनं स्वैरं वने परिभ्रमन्तं गजं यथा न कोऽपि वशीकर्तुं शक्नोति तथैव संस्कृतवाङ्मयस्य असीमे कान्तारे वर्तमानं स्वैरमाचरन्तं शिथिलैर्विविधैर्लक्षणैरुपेतं चम्पूकाव्यं न कश्चिदेकेन लक्षणेन निबद्धुं समर्थं इति निर्विवादम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पूर्णाहुतिः—महाभारतीयं दृश्यकाव्यम्

– कविवरः श्री कृष्णप्रसाद घिमिरे –

२.

प्रथमोङ्कः

(ततः प्रविशतः सुधर्मासभायाम् उद्धव-सात्यकिभ्यां चामरतालवृन्तकैः सममिवीज्यमानौ प्रियसारथिना दारुकेन सञ्चालितं स्वरथमभिशोभमानौ भगवन्तौ रामकृष्णौ ।)

श्रीकृष्णः (जगतामभयदानसमर्थेन स्वकरकमलेन अवलम्ब्य दारुकबाहुं रथाच्छनैः शनैरवरुह्य तमेवाऽभिलक्ष्य)—प्रिय दारुक ! पश्य, पश्य ! मध्याह्नसमये वायुवेगेन प्रासादतोऽत्र आगमनेन भगवतो भास्करस्य प्रखरकिरणैः सन्तापिताः प्रस्विन्नगात्रा अस्माकमिमे प्रियसदश्वाः स्वशरीरमपि आप्लावयन्त इव दरीदृश्यन्ते स्वेदाम्बुभिः । तद्गच्छ यथास्थानं नीत्वा इमान् सम्प्राप्तसमाश्वासनान् विधेहि । त्वमपि क्षणं विश्रम च यथासुखम् ।

(दारुकः साञ्जलिबन्धं प्रणम्य निर्गच्छति ।)

(स्वाग्रजं समीक्ष्य) पूज्यतमाग्रज ! समागम्यतामग्रे ! (पुनस्तन्मुखं सविशेषं निरूप्य सहर्षम्) अहो ! किमेतद् ? विराजतेऽद्य भगवतो भवतः श्रीमुखकमलमिदं पूर्णं परिपूर्णानन्दमयं लोकान्तरेण ज्योतिषा सम्पृक्तम् । कोऽर्थः स्यादार्य ! तत्कथ्यतां कार्यस्यास्य उपपत्तिं तन्निदानञ्च शुश्रूषवो वयं सञ्जातकौतुकाः स्मः ।

श्रीरामः (सस्मितम्)—शोभनं प्रतिभाति तवैव निरूपणमायुष्मन् ! यस्य रोमकूपान्तरिता अनन्ता अनन्ता महानन्दसागरा अनन्तकालादारभ्य अद्यावधि समुद्वेलयन्तः स्वात् प्रत्यागच्छन्ति पुनः स्वपूर्वस्थानमेव, यस्य कृते पुनरानन्दातिरिक्ताश्चान्ये पदार्था न प्रतिभान्ति, यश्च भूयो नित्यमेव तेषु रमते तदन्तस्थः, स एव तत्रैवाऽऽत्मानं रमयितुकामं यदा कदा तदानन्दांशप्रादुर्भूतान्तःकरणं यं कमपि तादृशावस्थायां संपश्येद् विभावयेद्वा, एतत्सर्वं तद्धृदयान्तरितसद्भावं न स्याद्विषयेऽस्मिन् किमप्याश्चर्यं तस्य व्यक्तिविशेषस्य कृते । तत्त्वमेवात्र कथय आयुष्मन् ! किमर्थमद्य अकस्मादसमय एवेदृशं प्रश्नविशेषं मत्पुरतो न्यधाः ?

श्रीकृष्णः (सभागृह-निःश्रेणीमारुहन्)—नहि नहि प्रतीक्ष्यचरण ! स्वहृदयाऽभ्यन्तरे प्रादुर्भूतानन्दो भवता संसूचितः, किन्तु कारणेनाऽनेन समुद्भूतोऽयमेतद्वैषयिकश्चेति तु नाऽत्र निर्देशितः । किमर्थं गोपितोऽसौ भवता भगवन् ? नूनं भवान् प्रतिष्ठितप्रज्ञो विभाति विषयेऽस्मिन् यः कच्छप इव स्वाङ्गानि संहरते विषयेभ्यो हृषीकवृन्दानि । आर्य ! वस्तुतो भवत्स्वभाव एव ईदृशः सञ्जातप्रायो दृश्यते यत् किञ्चिदुक्त्वा किञ्चिन्निगूहनम् । दृश्यमानस्यापि प्रपञ्चस्य अदृश्यमानत्वमिव प्रतिभानकरणम् । तथैव अलौकिकेषु स्थितिविषयेषु निरन्तरावगाहनं तत्रैव विहरणञ्च । यद्वा—युक्तमेवैतत् तत्र भवतः कृते यल्लोकोत्तरा महात्मनोऽनित्यलोके स्थिता अपि नित्यलोकं गता रमन्ते स्वात्मवस्तुन्येव ।

(नयनाञ्चलात्स्वात्मानं भगवतो रामस्य नयनमार्गेणैव तदात्मानं नीत्वा उभयोरात्मनोरैक्यं विदधदलौकिकानन्दमनुभवंश्च सभागृहाङ्गणं सममेत्य आत्मनः स्वागतार्थं समागतैर्मुनिभिर्वीतरागैः ब्राह्मणवर्गैश्च समर्पितान् सत्याशीर्वादान् प्रह्वेणाऽऽत्मना शिरसा संगृह्णंस्तानेव अवलोक्य) पूज्यवसु-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

देवपुत्रो वासुदेवोऽयं भवतस्तीर्थोपमान् श्रीचरणान् प्रणमति स्वात्मनिवेदनपूर्वकम् ।

ब्राह्मणवर्गः—विजयस्व वासुदेव ! जय त्वं पुनरहर्निशमित्थंरूपेणैव दिने द्विगुणं रात्रौ चतुर्गुणम् । वर्धस्व च स्वकर्मणि स्वान् सफलीकर्तुं परित्रातुञ्च दुष्टेभ्यस्तेषां सत्यान् कामांश्च परिपूरयितुम् । (बलराममवेक्ष्य) राम ! सदैव आरामदो भव त्वमपि स्वेभ्यः परिजनेभ्यो भक्तेभ्यश्च ।

(रामहस्तौ बद्धा प्रह्वेण शिरसा गृह्णाति । सभासदस्तयोः शिरसि पुष्पलाजाक्षतादीनि सुगन्धिद्रव्याणि च वर्षाधारा यथाऽभिवर्षयन्ति । इतो नेपथ्यमाश्रिताः स्तुतिपाठका बन्दिनश्च तौ स्तुवन्ति । तयोः सद्गुणैर्जनमनोवचनाविगैस्तौ प्रशंसन्ति च ।)

श्रीकृष्णः (सभागृहान्तःस्थं भद्रासनमुपसर्पन्)—तिष्ठन्तु भवन्तः सर्वेऽपि महानुभावा मुनयो ब्राह्मणवर्गाः सभ्या महाजनः श्रेष्ठिनश्च, स्वं स्वंमुपयुक्तासनं गृह्णन्तु च । (श्रीरामं समीक्ष्या) आर्य ! समागम्यतामितः, आवामपि तिष्ठावः । (उद्धवसात्यकिनौ प्रति) समागच्छतां युवामपि तिष्ठताम् ।

(सर्वे जना निवसन्ति । भगवान् कृष्णोऽपि भगवतो रामेण सार्धं भद्रासनमधिरोहति । निवसति च तदैव किञ्चिच्छ्रुतं यथाऽभिनीय तालवृन्तकेन स्वात्मानमभिवीजमानं सात्यकिनं विलोक्य)

प्रियसखे ! कुतः समागतोऽयं मधुरो रवः ?

सात्यकिः—जगन्नियामक ! विभो ! नाममात्रका इमा द्वारकावासिन्यो मानिन्यः कामिन्यः सभागृहस्यैतस्य पश्चाद्भागं समाश्रित्य तौर्यत्रिकैः समाराधयन्ति भवन्तं जगन्नियन्तारम्, इतस्ततः उत्प्लुत्य वादयन्ति च लयतालादिप्रदानार्थं स्वशरीरावयवविभूषितानि स्वाङ्गस्थान्याभरणजातानि । तत्तेषामेवाऽयं मधुरो रवः, तत एवागच्छन् अयं जिहीर्षति सभासदां मनांस्यपि ।

भगवान् (उद्धवं समीक्ष्य)—प्रियसखे ! आभिरपि संगृहीतमिव प्रतिभाति शोभनमुपयुक्तञ्चेदं कार्यजातम् । किं मन्यते तत्र भवान् प्रियवयस्यः ?

उद्धवः (मध्य एव चामरेणाभिवीजमानः)—इमा अपि स्वजीवनसाफल्यं कुर्वन्त्येव भगवन् !

भगवान् (ईषद्विहस्य अजानन्निव)—एतादृशाकर्मणाऽपि जीवनसाफल्यं सम्भवति किम् ?

उद्धवः (सगद्गदम्)—प्रश्नस्याऽस्योत्तरं त एव वितरन्ति भगवन् ! यैर्नाम एतदर्थमेव स्वं जीवनमाधुनिकानां मोहमदान्वितानां सांसारिकाणां दृष्टिषु निरर्थकमापादितम् । य इमे महानुभावा विराजन्ते भस्माङ्गरागधवलितस्वशरीरावयवा व्यक्तिविशेषा येऽप्यत्र विषयस्याऽस्य निदानभूता दरीदृश्यन्ते यैर्नाम पुनरात्मजीवनं तदर्थमेव यापितमहर्निशं रुदित्वा रावयित्वा चात्मसमान् अन्यानपि ।

भगवान् (वार्तामन्यथगां विधित्सुर्भूत्वा)—किं किं तत् सात्यकिना प्रोक्तं तद्रवो जिहीर्षति सभासदां मनांसीति ?

सात्यकि (सहर्षम्) एवं प्रभो ! अहन्तु तथैव निरूपयामि ! भवतः सत्कर्मगुणरूपलीलाप्रदर्शनप्रधानीभूतं तौर्यत्रिकमिदं विजृम्भमाणं सभ्यानां मनांसि जिहीर्षतीति नैव कथनीयमपेक्ष्यते, अपितु भगवन्नहरदिति वक्तव्यताञ्चावगाहते । धन्यं जगति महत्तरं खल्वेतदेव, यतः स्वात्मनः शान्तिमधिगच्छति लोकः । (विमुग्धो भवति) ।

भगवान्—युक्तमुक्तं भवता सखे । परन्त्वस्याः सभायाः सद्गुणोऽप्ययमेवाऽऽसीद् यदा स्थानान्तरितविग्रहाणां व्यक्तिमात्राणां ताः शोकमोहादिकाः बहूर्मयो नाशमायान्तीति या जनोक्तिः सुप्रसिद्धाऽऽसीत्, सत्या चेत् सा पुनः कथं सम्भवतीत्थं मोहरूपाकर्षणम् ? तत्कथय ? कथं मुखमुद्रणं क्रियते भवता तदेतेषां दुष्टप्रकृतीनां जनानां तदस्मिन् विषये ?

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सात्यकिः (सुप्रसन्नो भूत्वा)—युक्तं भगवन् ! परं कथञ्चैतत्सम्भवति ? श्रूयतां जगन्नियामक ! तावन्नरकविशेषाणामसह्यकष्टोद्वेगेन भृशं परिपीडयमानस्तुच्छातितुच्छयोनिगतोऽपि जीवः स्वशरीरं जीर्णातिजीर्णं दीनं हीनञ्च सदपि पुनः क्षणान्तर एव विनश्यदपि किमर्थं तद्विहातुं नेच्छति स्वेच्छया किञ्चित् पूर्वकाले, अपि तु तदवस्थायामेव आनन्दातिरेकमनुभवति च। किं ददाति तत्र भवानस्य युक्तमुत्तरम् ?

भगवान्—आत्मनः सच्चित्त्वमेवाऽत्र निदानं सखे ! यतस्तस्य नित्यानन्दमयस्वरूपत्वात्, अमरत्वाच्च।

सात्यकिः (सुमधुरं विहस्य)—आस्तां तावन्नाथ ! अस्त्वत्राऽपि तत्तौर्यत्रिक-कर्मान्तरित आनन्दातिरेक एव मुख्यो हेतुः। का नो हानिः। तदेवोपादनं स्यात्।

(इत्थं सर्वैरपि सर्वतः स्वकथनमनुपयुक्तमसङ्गतञ्चेति युक्त्वा सत्तकैश्च निर्दिश्यमानोऽपि मूकतामापादितोऽपि जगन्मोहनं हास्यं संत्यजन्)

भगवान्—धन्यो भवान् सञ्जातप्रायो दृश्यते सर्वल्लोकोपकारी महात्मा देवर्षिनारद इव। (स्वगतम्) अहो ! किमर्थमद्याऽकस्मात् स्मृतिपथमध्यारूढो मे भगवान् नारदः ? तद्दर्शनमेव तु न प्राप्स्यामि किम् ? (उपरितनं स्वभाषणक्रमं मेलयित्वा) यदात्मन्येवाऽनुभूयते नाऽन्यत्र। किमेतत् सत्यं स्यात् ?

सात्यकिः—सत्यं प्रभो ! सत्यमेवैतत् यदद्यावधि कृतस्यैतस्य भवच्छ्रीचरणसुसेवनस्य सद्योजातमिदं सुफलं सद्विचारमयम्। किमत्राऽऽश्चर्यं तदेव फलितमिति कथिते।

(जगवा विमोहनकारणीभूतं तादृशं स्वहास्यमपि तस्मिन्नित्थं विफलीभूतं विलोक्य किंकर्तव्यविमूढः सत्यमेवैतत्सुधर्मान्तरितं जनं मदीया मोहिनी शक्तिरपि स्ववशीकर्तुं नेशा चेत् पदार्थान्तरः प्रबाधितुं कथं सफलो भविष्यतीति विचारयन् स्वशिरः परावृत्य)

भगवान्—निगूढं विश्रूयमाणश्चैष वीणारवोऽपि तत्रैव संमिश्रित इवाऽनुभूयते चास्माभिस्तद्गतचित्तैः। किं मन्यते तत्र भवान् प्रियवयस्यः ?

(विभो ! किमयंमन्न इव भवान् मामित्थं मुहुर्मुहुः परिपृच्छतीति भावेन भगवन्तं समीक्ष्याऽभिवीज्य च तालवृन्तकेन)

सात्यकिः—प्रभो ! अहन्तु उपयुक्तमेवेति मन्ये इदमपि तानं परिपूर्णं सम्पाद्य शब्दब्रह्मस्वरूपिणस्तवैव सद्गुणगानेन त्वामेवाप्तुं प्रयतन्त इमे नटाचार्या अपि। तद्गायनजन्योऽयं रवोऽपि त्वामाकर्षयितुं तान्प्रति तमपि सफलीभूतं मन्ये। नो चेदुदासीनतमानां कथं समाकृष्टौ भवतो बधिरतरावपि कर्णपुटावित्थं तच्छब्दरसास्वादनार्थम्।

(सर्वेऽपि सभासदः सात्यकिनः पक्षं समाश्रित्य "भगवन् ! सत्यं त्वमसि भृशं निर्दय" इति भावेन भगवन्तं निरीक्षन्ते। भगवान् कृष्णस्तु "सञ्जातोऽस्मि अद्याऽहं जीवन्मुक्तानामेषां हस्तगतः सन्निरुद्धगतिश्च तैः। तदेकपद एव सभागृहादस्मादन्तर्हितो गन्तुं समीहेऽज्ञातस्थलम्, परन्त्वत्र विवशोऽस्मि। युक्तमप्येतत्—"वशीकुर्वन्ति मां भक्त्या सत्स्त्रियः सत्पतिं यथा" इति यदुच्यते, इति ध्यायन् वितिष्ठते। तावदेव सभागृहद्वारतो गवाक्षरन्ध्रेभ्यश्च रजोराशिरन्तर्हितो भवति। दृष्टामेतद्वार्तामन्यपथगां करोमीति मन्यमानः सम्प्राप्ततत्संयोगः किञ्चिद्विहसन्।

भगवान्—पश्यतां पश्यतां तावद्रजोराशिरयं कुतः समागतः सभागृहान्तरे ? कथ्यतां चैतस्य आगमनकारणम् ?

उद्धवः—भगवन् ! प्रातर्भवता गोदानरूपेण ब्राह्मणेभ्यो वितीर्णा इमा बद्धसंख्याका (१३०८४) अग्रेगामिन्यो गावः स्वगृहान् नीयन्ते वृन्दावने भवदिव गोचारणलीलामनुकुर्वद्भिः एभिर्ब्राह्मणवर्गैः। तदेतेषां पवित्रात्मनां विप्रवर्गाणां श्रीमुखतो विनिःसृत्य भगवद्गुणगणैः।

(उच्चैः सलयतानं सुमधुरेण रवेण गायति)

तव कथामृतं तप्तजीवनं कविभिरीडितं कल्मषापहम्।
श्रवणमङ्गलं श्रीमदाततं भुवि गृणन्ति ते भूरिदा जनाः॥

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पूर्वतोऽनुवृत्तम्

सूर्यनमस्कारो व्यायामः

--डॉ० नरेश झा शास्त्री

(४)

सूर्यनमस्कारस्य अद्यतनं रूपम्

पुरा सूर्यनमस्कारव्यायामो नूनं बहुचर्चितोऽभवत्। अथर्ववेदे, इतिहास-पुराणेषु तस्य बहुधा समुल्लेखः। क्वचिदुपासनायां क्वचित्तपसि क्वचिच्च व्रतकल्पे। प्रकारान्तरेण अनेकत्र सूर्यनमस्कारस्य चर्चा समुपलभ्यते। अथर्ववेदनमस्कारावलिः विकासक्रमे द्रष्टव्यः। स्कन्दपुराणे सूर्यायाऽर्ध्यदानमहिमवर्णने **पश्चादासनस्थं देवं सवितारं मण्डलमध्ये द्वादशात्मकं सुरादिभिः सम्पूज्यमानं ध्यात्वा पूर्वोक्तमर्घ्यपात्रं शिरसि कृत्वा भूमौ जानुनी निपात्य सूर्याभिमुखस्तद्गतमना भूत्वा-अर्घ्यमन्त्रमुदाहरेत्**[1] इत्यत्र 'जानुनी निपात्य' इति 'जानुनास' इत्यस्यैव मूलरूपम्। अत्र 'ॐ ख खोल्काय नमः' इत्युच्चारणं आधुनिके नमस्कारे 'ॐ ह्राँ' इतिवत् वर्तते। तथैव तत्रैव स्कन्दपुराणे—

तदस्त्वगस्त्यभ्राताऽसौ ग्रीष्मे पञ्चाग्निमध्यगः।
भास्करे दत्तदृष्टिश्च मौनव्रतसमन्वितः॥
तिष्ठन् कनिष्ठिकाङ्गुल्या वामपादश्च निश्चलः।
ऊर्ध्वबाहुर्निरालम्ब - स्तपस्तेपेऽतिदारुणम्॥

अत्र 'भास्करे दत्तदृष्टिः, मौनव्रतसमन्वितः, कनिष्ठिकाङ्गुल्या तिष्ठन्, वामपादश्च निश्चलः ऊर्ध्वबाहुः, निरालम्बः' इत्यादिविशेषणानि किं सूचयन्ति ? आधुनिके सूर्यनमस्कारे 'उपरि अवलोकयेत्, ऊर्ध्वेक्षणम्, नासिकया श्वासाकर्षणम्' इत्यादिपदैः किं सूच्यते ?

एवमेव भविष्यपुराणे[2] ब्राह्मपर्वणि सप्तमीकल्पे भानुपादद्वयव्रते वाल्मीकीयरामायणे[3] उत्तरकाण्डे च—

पञ्चवर्षसहस्राणि सूर्यं चैवान्ववर्तत।
तस्थौ चोर्ध्वशिरोबाहुः स्वाध्याये धृतमानसः॥

अत्र 'ऊर्ध्वशिरोबाहुः' इत्यनेन सूर्यनमस्कारव्यायाम एव सङ्केतितः।

बहुकालं शारीरिकोऽयं व्यायामो विकसन् शताद्व्यामस्यां पूर्णविकासं प्राप। सूर्यनमस्कारव्यायामस्य व्यापकप्रचारे श्रेयोभाजः सन्ति श्रीमन्तो भगवानराव श्रीनिवासराव पन्तप्रतिनिधि महोदयाः (औंध-नरेशाः)। तेषां प्रशंसनीयेन प्रयासेनास्य व्यापकः प्रचारोऽभवत्। १९९६ (सन् १९३९) वैक्रमवत्सरे प्रथमप्रकाशितस्य 'सूर्यनमस्कार'-पुस्तकस्य प्रास्ताविके एभिर्लिखितं यत् 'मया स्वयमेव सशास्त्रः समन्त्रः विशेषपद्धत्या च सूर्यनमस्कार - व्यायामो नियमेन समभ्यस्तः। अनुभूतञ्च यत् अनेन व्यायामेनास्माकं शारीरिकी मानसिकी चोन्नतिर्नितरामभूदिति। सर्वेषां स्त्री-पुरुषाणां समग्रा समुन्नतिर्भवेदित्याकाङ्क्षया मया 'सूर्यनमस्कार'नाम्नी एका लघुपुस्तिका मराठीभाषायां विरचिता। सा च पण्डितेन सातवलेकर महोदयेन स्वीये भारतमुद्रणालये मुद्रापयित्वा १९२२ ईशवीयवत्सरे प्रकाशिता। अनन्तरञ्च १९२८ ईशवीये वत्सरे अंग्रेजीभाषायामपि 'सूर्यनमस्कार'-पुस्तकं प्रकाशितम्। एवमेव तदनु 'लीडर प्रेस, प्रयाग'तः प्रायः १९३० ईशवीये वत्सरे हिन्दीभाषायामपि तत् प्रकाशितम्।

(क्रमशः)

१. स्कन्दपु० माहे० कौमारिका० ४३.५५।
२. भविष्यपु० १०८.१–९। ३. वाल्मीकी० रामा०।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विक्रेयाणि बहुमूल्यानि पुस्तकरत्नानि

गृहं स्वर्गीकर्तुं मानवजीवनञ्च सफलयितुं वाणीपुस्तकमालातः महापरिषदः महामण्डलसंस्थानतश्च प्रकाशितानि निम्नलिखितपुस्तकानि विक्रयार्थं प्रस्तुतानि। विशेषविवरणाय सूचीपत्रं नियमाश्च पत्रप्रेषणेन समासादनीयाः।

१. भारतधर्म-समन्वय ... १-५०
२. परलोक-तत्त्व ... २-५०
३. कठोपनिषद् ... ३-००
४. धर्मतत्त्व ... २-५०
५. वेदान्तदर्शन ... १-५०
६. हिन्दूधर्मका स्वरूप ... ०-३७
७. तत्त्वबोध, सजिल्द ... १-००
    बिना जिल्दका ... ०-७५
८. आदर्श देवियाँ प्रथम भाग ... २-२५
    ,, ,, द्वितीय भाग ... २-५०
९. सती सदाचार ... १-५०
१०. कर्म-रहस्य ... २-५०
११. केनोपनिषद् ... १-५०
१२. ईशावास्योपनिषद् ... १-००
१३. सप्तशती (दुर्गा) गीता, सजिल्द ... ३-००
    ,, दफ्ती जिल्द ... २-२५
१४. सदाचार-प्रश्नोत्तरी ... ०-३७
१५. व्रतोत्सव-कौमुदी ... १-३७
१६. हिन्दू-संस्कृति-समीक्षा ... ०-५०
१७. धर्म-प्रवेशिका ... ०-७५
१८. पूजा-प्रार्थना ... ०-६२
१९. गायत्रीमन्त्र-टीका ... ०-२५
२०. आचार-चन्द्रिका ... १-००
२१. कन्या-शिक्षा-सोपान ... ०-२५
२२. गजेन्द्र-मोक्ष ... ०-३७
२३. महिला-प्रश्नोत्तरी ... ०-५०
२४. व्रतोत्सव-चन्द्रिका ... ५-००
२५. धर्माधर्म-प्रश्नोत्तरी ... ०-२५
२६. सुलोचना ... ०-६२
२७. तीर्थ और देवपूजन-प्रश्नोत्तरी ... ०-२५
२८. स्मरणी ... ०-६२
२९. स्त्री-पुरुष-विज्ञान ... ०-३७
३०. श्राद्ध और परलोक-विचार ... ०-३७
३१. धर्म-विज्ञान प्रथम, द्वितीय, तृतीय, ५) ४) ४-००
३२. श्रीमद्भागवत, एकादश स्कन्ध ... ३-५०
३३. सती धर्म और योगशक्ति ... ०-३७
३४. अन्तःकरण-विज्ञान ... ०-७५
३५. निर्मूल आक्षेपोंका उत्तर ... ०-३७
३६. परलोक-प्रश्नोत्तरी ... ०-२५
३७. श्रीमद्भगवद्गीता प्रथम भाग ... ४-००
    ,, ,, द्वितीय भाग ... ३-५०
३८. मनुष्य-धर्म ... ०-३७
३९. धर्मकल्पद्रुम प्रथम खण्ड ... ६-००
    ,, द्वितीय खण्ड ... ३-००
    ,, तृतीय ,, ... ३-५०
    ,, चतुर्थ ,, ... ५-००
    ,, पञ्चम ,, ... ३-५०
    ,, षष्ठ ,, ... ४-००
    ,, सप्तम ,, ... ३-५०
    ,, अष्टम ,, ... ४-००
४०. प्रवीण दृष्टिमें नवीन भारत (प्रथम खण्ड) २-००
    ,, ,, (द्वितीय खण्ड) २-००
४१. नवीन दृष्टिमें प्रवीण भारत ... १-२५
४२. साधन-चन्द्रिका ... १-७५
४३. शास्त्र-चन्द्रिका ... १-७५
४४. धर्म-चन्द्रिका ... १-६५
४५. पातञ्जल-योगदर्शन (हिन्दी भाष्य) ... ३-००
४६. कर्ममीमांसा-दर्शन (सम्पूर्ण) ... १२-००

व्यवस्थापक : वाणी-पुस्तकमाला, आर्यमहिला हितकारिणी महापरिषद्, जगतगंज, वाराणसी

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पञ्जीकृत-संख्या—एल० १८९७

सूर्योदयस्य नियमाः

पत्र-संहिता

१. 'सूर्योदय'-मासिकपत्रस्य वार्षिकं शुल्कं रूप्यकपञ्चकं वर्तते। धनादेश (मनीआर्डर) द्वारा तत्प्रेषणीयम्। वी० पी० द्वारा प्रेषणे ५० पणाः पृथक् प्रदेयाः स्युः।

२. आवर्षं गम्भीरसाहित्यसमन्विताः १२ अङ्काः प्रकाश्यन्ते। नवीनग्राहकत्वं प्रथमाङ्कतः (जनवरी-अङ्कतः) एव स्वीक्रियते। माध्यमिकेन केनापि अङ्केन ग्राहकत्वं न स्वीक्रियेत।

३. आंग्लमासस्य २६ दिनाङ्के 'सूर्योदयः' प्रकाशितो भवति। वारद्वयं संशोध्य ग्राहकेभ्यः सः प्रेष्यते। अतस्तदलाभे पूर्वं स्वकीय-पत्रालयतस्तदनागमनस्य निर्णयं कृत्वैव १० दिनाङ्कानन्तरं वयं सूचनीयाः।

४. लेख-कवितादीनां भाषा संयता, सरला, शुद्धा च भाव्या। प्रकाशनीय-लेखादीनां स्पष्टाक्षरैः कर्गजस्यैकपृष्ठे एव लेखनमावश्यकम्। अस्वीकृता लेखादयः पोस्टविभागीय-चिटिका (टिकट) प्राप्त्यनन्तरं परावर्तयितुं शक्यन्ते।

५. सम्पादकीय-विषयसम्बद्धे पत्र-व्यवहारे 'सम्पादकः' इति, व्यवस्थाविभागीय-पत्रव्यवहारे च 'व्यवस्थापकः' इति च स्पष्टं लेखनीयम्। तेन उत्तरलाभे मुधा विलम्बो न भवेत्।

विज्ञापन-शुल्कम्

सूर्योदये सुरुचिपूर्णं विज्ञापनं प्रकाश्यते। एकवारं तस्य प्रकाशनस्य शुल्कक्रमश्च अधोलिखितोऽस्ति। सार्वकालिकस्य दीर्घकालिकस्य च विज्ञापनस्य कृते विशेष-सौविध्याय पत्र-व्यवहारः कार्यः।

साधारणस्य प्रतिपृष्ठस्य	१००) रु०	साधारणस्य प्रत्यर्धपृष्ठस्य	६०) रु०
साधारणस्य चतुर्थांशपृष्ठस्य	३५) रु०	आवरण-चतुर्थपृष्ठस्य	२००) रु०
आवरण-द्वितीय-तृतीयपृष्ठयोः	१५०) रु०	प्रथमावरणपृष्ठे विज्ञापनं न स्वीक्रियेत।	

—प्राप्तिस्थानम्:—

'सूर्योदय'-कार्यालयः, भारतधर्म-महामण्डलम्, जगतगंज, वाराणसी।

सम्पादकः, प्रकाशकः, मुद्रकश्च—गोविन्द नरहरि वैजापुरकरः,
श्रीभारतधर्ममहामण्डलम्, जगतगंज, वाराणसी कैण्ट।
मुद्रण-स्थलम्—आनन्दकानन प्रेस, सी-के० ३६/२०, वाराणसी।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूर्योदयः

भारतधर्ममहामण्डलस्य
मासिकं मुखपत्रम्

LIBRARIAN
Gurukul Kangri Vishwavidyalaya
Hardwar

वर्षम् ५०

अङ्कः ६

सम्पादकः
गो० न० वैजापुरकरः

जून
१९७४

वार्षिक-मूल्यम्
५) रूप्यकाणि

[illegible]
[illegible]

कुत्र याति तरङ्गिणीयम् ?

तुङ्ग-गिरिशिखरात् पतन्ती प्रास्तरं खण्डं हरन्ती ।
सूर - शशिबिम्बं वहन्ती या विभात्मनि - वेगिनीयम् ॥ १ ॥
जलकणान् हीरककणानिव प्रोच्छलन्-मौक्तिकगणानिव ।
किरति जर्जरतर - शणादिव सर्वथा प्रोन्मादिनीयम् ॥ २ ॥
सुशिथिलीकृत - तूलकाभा वोच्छ[illegible] - [illegible]ल [illegible]काभा ।
पथि बहूपल - खण्ड - लाभा भाति ननु [illegible]लोकिनीयम् ॥ ३ ॥

—आचार्यः श्री आनन्द झा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ग्राहका विज्ञापनदातारश्च विनिवेद्यन्ते

यत् 'सूर्योदय'स्य पञ्चाशत्तमवर्षस्य वार्षिकं शुल्कमद्यावधि नैकैः प्रत्नग्राहकैर्न प्रेषितम्। अतस्तैः एतदङ्क-प्राप्तेः समकालमेव पञ्चमुद्रात्मकं वार्षिकं शुल्कं धनादेश (मनिआर्डर) द्वारा प्रेषणीयम्। नव्योऽपि एकैको ग्राहको विधेयः।

एवं नैके धनिनोऽपि ग्राहकाः व्यवसाय-संस्थानानि शासनानि च सर्वेभ्यो मुक्तहस्तं स्वव्यापार-विज्ञापनानि प्रददति। परं 'सूर्योदयः' तै कदापि न स्मर्यते। सूर्योदये सुरुचिपूर्णं विज्ञापनं प्रकाशयितुमस्माभिरूप क्रान्तमस्ति। अतस्तेऽमुमपि कृपयाऽनया अनुगृह्णन्त्विति।— व्यवस्थापकेन

अनुक्रमः

प्रपाठकः	पत्रपुटम्	परिवेषकः
जगन्नाथस्वामी मम मनसि वासं वितनुताम्	१२१	म. महो. स्व. श्रीगङ्गाधरशास्त्रिपादाः
श्रीमहर्षि-ज्ञानानन्दचरितं महाकाव्यम्	१२२	श्री विन्ध्येश्वरीप्रसाद शास्त्रिणः
गोलोकवासिनः श्री गोविन्ददास महोदयाः!	१२३	सम्पादकीयम्
श्री पूर्णानन्दतीर्थस्तवः	१२४	स्वामी अखण्डानन्द सरस्वती
संस्कृत-प्रचार-तन्त्रम्	१२५	विद्याभूषणः श्रीगणेशरामशर्मा
रसाल-रस-चूषणम्	१३०	कविभूषणः श्री भुवनेश्वरप्रसाद चौधरी
नेपाले संस्कृत-विद्यालयः सर्वथाऽनुपेक्ष्यः	१३२	श्री पूर्णचन्द्रशास्त्री उपाध्यायः
कवि-समुद्बोधनम्	१३४	आचार्यः श्री आनन्द झा
सूर्यनमस्कारो व्यायामश्च	१३५	डॉ० नरेश झा शास्त्री
वेदव्यास-गौरवम्	१३६	डॉ० अमरनाथ पाण्डेयः
रूप-दीपिका	१३७	श्री रामानन्द द्विवेदी
रेडियो-दूतम्	१३९	श्री पद्मानन्द चतुर्वेदी
पूर्णाहुतिः	१४०	कविवरः श्री कृष्णप्रसाद घिमिरे
मानस-भारती	१४४	श्री जनार्दन गङ्गाधर रटाटे

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूर्योदयः

रागद्वेषनिशाटनं विधुरयन् मोहं तमो नाशयन्,
तामिस्रं जडवादकैरवकुलं ज्ञानत्विषा ग्लापयन्।
विद्वत्कोकमशोकयन् नवसुधीरोलम्बमुन्मीलयन्,
सञ्जातः सुमनोमनो मधुरयन् सर्वत्र सूर्योदयः॥

५० वर्षे] वाराणसी, आषाढ़ः, २०३० वैं० : जून, १९७४ ई० [६ अङ्कः

जगन्नाथस्वामी मम मनसि वासं वितनुताम्

•

सुरेशाशोदन्वत्तटलसितनीलाचलशिरोनिवेशातिश्यामाम्बुदविशयदोलावहरुचिः ॥
सुभद्राविद्युत्वान् हलधरशशाङ्कान्तिकचरो जगन्नाथस्वामी मम मनसि वासं वितनुताम्॥ १॥
अवेलाघग्रीष्मातपविकललोकावनकृते शुचौ प्राच्योदन्वत्प्रचलदनिलान्दोलिततनुः॥
दयार्द्राम्भोधाराः सकलसुखसारा दृशि किरन् जगन्नाथाम्भोदो मम मनसि शान्तिं वितनुताम्॥ २॥
कलिव्यालोद्गीर्णातुलकलुषहालाहलकृताऽविलङ्घ्यापर्यन्तप्रलयजनिमूर्च्छाभ्रमहरः ॥
श्रयन् शैले नीले श्रुतिशततनुतां जाङ्गलिकतां जगन्नाथस्वामी मम मनसि मोहं शमयतु॥ ३॥
भवज्वालामालाकुलसकललोकार्तिहतये मणिः श्यामो नैयायिकनुतगुणो नूनमुदितः॥
हरंश्चिन्तामात्रात् त्रिविधमपि तापं तनुभृतां जगन्नाथस्वामी भवजमनलं शीतलयतु॥ ४॥
सरस्वत्सात[illegible]पुलकल्लोलपटलीमिलत्कूले शैले मलिनघनशैवालचटुले॥
प्रफुल्लैलावल्ली[illegible]मलविलोलालितुलितो जगन्नाथस्वामी लसतु कमले चेतसि मम॥ ५॥

— महामहोपाध्यायाः स्वर्गीयाः श्रीगङ्गाधरशास्त्रिपादाः —

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीमहर्षि-ज्ञानानन्दचरितं महाकाव्यम्

— श्री विन्ध्येश्वरीप्रसाद शास्त्रिणः —

(अथ एकविंशः सर्गः)

११. कर्माण्यकर्म च विकर्म च ये यथार्थं पश्यन्ति ते वरधियो भुवनेषु धन्याः ।
कर्मण्यकर्म तदकर्मणि कर्म ये वा जानन्ति ते सकलकर्मकृतां वरेण्याः ॥
१२. इत्थं हि कर्मगतयो गहना नितान्तं याथार्थ्यतः सपरिचिन्त्य च तत्स्वरूपम् ।
विज्ञान - दर्शनवता पुरुषेण मोक्षः सम्प्राप्यते जगति जीवनलक्ष्यभूतः ॥
१३. कर्मैव मूलमखिलस्य जगद्व्रजस्य सृष्टि-स्थिति-प्रलयकर्मसु तन्निदानम् ।
वाणीपतेः पशुपतेः कमलापतेश्च लोकोऽधिगच्छति पदं किल कर्मणैव ॥
१४. ग्रन्थिं च चिज्जडयुतं रचयद् विचित्रं मायामयं सकलबन्धन-हेतुभूतम् ।
आनन्दचिद्घनविलासि-निजस्वरूपात् कर्मैव जीवनिवहान् विदधाति भिन्नान् ॥
१५. उद्भिज्ज - घर्मजनना - ऽण्डज - पिण्डजेषु देहेषु वै चतुरशीतिषु लक्षकेषु ।
जीवान् सदैव हि समुन्नमयन् क्रमेण कर्मैव मानवपदं वितरत्यमोघम् ॥
१६. कर्मैव जैव-सहजैशगती-वितन्वन् चक्रं गतागतमिदं परिपाति नित्यम् ।
निर्वाणमर्पयति सत्पदमेतदेव ब्रह्माण्डसङ्घमनुतिष्ठति सुव्यवस्थम् ॥
१७. कर्मैव हेतुरिह वर्णचतुष्टयस्य जन्मान्तरस्य च निदानमहो तदेव ।
अन्तर्जगत्सुपरिचालकहेतुभूत - देवर्षिपितृ - विविधास्पदकारणं तत् ॥
१८. एतादृशातिशयविस्तृत - कर्मराज्ये निर्देशकं किमपि दर्शनमस्ति नैव ।
तत्खण्डितत्वमिह दर्शनपद्धतीनामाभासते स्म मुनिकेसरिणोऽस्य चित्ते ॥
१९. तस्यासकृन्निशि विचिन्तयतोऽस्य भारद्वाजो मुनिः शमविविक्ततमे समाधौ ।
सूत्राण्यनेकविध - कर्मकलापकानां संलोपकानि सम[illegible]न समादिदेश ॥
२०. अन्तर्जगत्सु विचरन्ति सदैव देवा नित्यर्षयश्च पा[illegible]सदन्तरङ्गे ।
प्राप्ते निजानि विविधान्यनुकूलकाले ज्ञानानि सम्प्रकटय[illegible] तिरोहितानि ॥

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गोलोकवासिनः श्री सेठ गोविन्ददास महोदयाः !

जूनमासस्य (१९) एकोनविंशति-दिनाङ्के भारत-भारती-भारतीयताया अनन्यव्रतीनां श्री सेठ गोविन्द दास महाभागानाम् एकोनाशीतितमे वयसि गोलोक-वासो नूनं भारतराष्ट्रस्य कृते महती अपूरणीया क्षतिर्वक्तव्या भवेत्। यतो हि तैः स्वीये जीवने व्यष्टेः पुरतः कदापि समष्टेर्बलिर्न दत्तः। तान् दृष्ट्वा निर्विचिकित्सं कोऽपि वक्तुं शक्नोति स्म, यदेकेन सुप्रथितेन सहृदयेन नाटकरचयित्रा महत्तरेण साहित्यिकेन पत्रकारेण च राजनैतिक-रङ्गमञ्चेऽवतीर्य तथैव सहृदयता-सौमनस्यपूर्वकं तस्मिन् क्षेत्रेऽपि स्वात्मनोऽजात-शत्रुत्वं यथार्थतः प्रस्थापितम्। दलविशेषस्य राष्ट्रिय-समितेः यावज्जीवं सदस्यत्वेऽपि तैः कदापि दलीया-ऽस्मितया राष्ट्रहितकरः कोऽपि राष्ट्रियप्रश्नो नोपेक्षितः। प्रत्युत स्वातन्त्र्यसंग्रामे पञ्चशः कारायात्रा कृता, अष्टौ वर्षाणि कारावासो भुक्तः। त्रिपुरीनगरे कांग्रेसमहाधिवेशनस्य च सफलं स्वागताध्यक्षत्वं निर्व्यूढयम्। इत्थं नैकैर्महत्तरै कर्मभिः स्वीयां राष्ट्रनिष्ठां निकष-परीक्षणे नियोज्य तत्र शुद्धस्वर्णता ख्यापिता तैः। सत्यप्येवं तैः कदापि तत्प्रतिफलरूपेण मन्त्रिणो राष्ट्रपते राज्यपालस्य वा ऐन्द्रस्य पदस्य आकाङ्क्षा न प्रदर्शिता। एतेन किल तैः कांग्रेससंस्थाया राष्ट्रियताया यथार्थतः साक्ष्यं विधीयमाना आसन्। तेषां वास्तविक्यः अस्या राष्ट्रियतायाः सम्मानं कुर्वद्भिः भारतराष्ट्रपतिभिः द्वितीयादि-पञ्चमीनां लोकसभानां सम्मानितसदस्यभाव [illegible] वशालिन एते एव सामयिकलोकसभा[illegible]नि[illegible]-१९[illegible] तत्पदमलङ्कुर्वद्भिश्चैव तैः न[illegible]वत - संसत्सदस्यानां शपथ-ग्रहणं कारितम्।

राष्ट्रभाषा हिन्दी पुनरद्य भवतां लोकान्तर-गमनेन अनाथेव संवृत्ता। यदा हिन्द्या राष्ट्रभाषा-त्वस्य सर्वसम्मतो निर्णयोऽभवत् तदा भवन्तोऽपि प्रमुख-निर्णायकेषु समुपस्थिता आसन्। यदा च भवन्तो हिन्दीसाहित्य-सम्मेलनस्य सभापतय आसन्, तदैव हिन्द्या राष्ट्रभाषात्वस्य निर्णयोऽयं सम्पन्नः। शासना-रूढदलस्य सदस्यत्वेऽपि भवद्भिः राष्ट्रभावाविष-यिण्याः शासकीयदुर्नीतिः कठोरतया समालोचना कृता। संसदि अंग्रेजी-प्रभृतिविदेशीभाषाणां विरोधं हिन्दीभाषायाश्च अनन्यप्रेम भवन्तः 'अन्तरात्मन आह्वान'मेव स्वीकुर्वन्तस्तत्र विषये कदापि संसदीय-मङ्कुशं न स्वीकृतवन्तः। संसदि निर्भीकतया दार्ढ्येण च हिन्दीपक्षस्य समर्थने राजर्षि-टण्डन-महाभागाना-मनु भवतां नूनं शीर्षस्थानम्। साम्प्रतं हिन्द्याः कृते व्यावहारिकरूपेण राष्ट्रभाषापदस्य समग्रलाभदाना-ऽवसरे 'ननु-नच' कुर्वतां शासकीयाऽशासकीयानां दलानां नेतॄणां व्यक्तीनाञ्च सुक्ष्मप्रतिरोधकरणविधौ तत्र भवतामेतेष्वनुपस्थितिं विभाव्य नूनं राष्ट्र-भारती अवीरेव संवृत्ता।

मान्यैः श्री सेठ महाभागैः विश्वस्य प्रमुखदेशानां यात्रासु सुस्पष्टमवलोकितं यत् एकत्र रोमप्रभृति-प्राचीननगराणामवशेषास्तु अद्य दृश्यन्ते, परं तत्रस्था संस्कृतिः सर्वथा विलयं गता; अपरत्र च भारतीय-संस्कृतिः सर्वाभ्यः संस्कृतीभ्यश्चिरन्तना आदिमाऽपि पूर्णोत्साहेन जीवतीति। दृष्ट्वैवेदं तथ्यमेते भारतीय-संस्कृतेः सजीवतायाः यथार्थतोऽनुगायकाः संवृत्ताः। स्वीयजीवनस्य उत्तरकाले तामेव भारतीयसंस्कृतिं पल्लवितां पुष्पितां फलिताञ्च विधातुं तत्र भवतां

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समाधिकः समयो व्यतीयते स्म। भारतीयसंस्कृतेः आध्यात्मिकपृष्ठभूमितोऽतितरामाकृष्टाः सन्तस्ते देशस्य नैकेषां तटस्थानामध्यात्मविद्याविदां महात्मनां सान्निध्यमासाद्य तेभ्यः स्वीयां तत्त्वज्ञानपिपासां प्रशामयितुं प्रवृत्ता आसन्।

अस्मिन्नेव प्रवासे तत्र भवद्भिः सुस्पष्टमिदं निर्धारितं यद् भारतीयसंस्कृतेर्मूर्तं रूपं गोमाता किल, तस्या वधश्च भारतीयसंस्कृतेर्वध एव। अत एव एतैः कियद्वर्षेभ्यः पूर्वं संवृत्ते गोवधनिषेधस्य अखिलभारतीये महाभियाने, प्रामुख्यं स्वीकृत्य तत्साफल्याय कांग्रेसशासनकर्णधाराणामपि विरोधाय पश्चात्पदत्वं कदापि न स्वीकृतम्, नापि च तत्र कीदृशोऽपि सङ्कोचः कृतः।

संसदीय - जीवनस्य पञ्चाशद्वर्षपूर्त्यवसरे विगते वर्षे भारतीय-संसदः सदनद्वयेन तत्र भवतां हार्दिकमभिनन्दनं कृतम्। तदा एतैः महानुभावैर्ये हार्दिका भावाः स्फुटीकृताः, नूनं ते भारतराष्ट्रोत्थानस्य मूलमन्त्ररूपाः। महद्व्यक्तित्वस्य महतः कर्तृत्वस्य च प्रतिमूर्तिना महानुभावेनानेन स्पष्टमुक्तम् यद् 'देशस्य शिक्षायामद्य आध्यात्मिकताया अनिवार्यतः समावेशो भाव्यः, तदैव देशस्य यथार्थत उद्धारो भवेदिति।

वैष्णवकुलभूषण देशरत्न! स्वीयाराध्य श्रीकृष्णप्रभो-र्नित्यलीलालोके गोलोके भवति प्रस्थिते भारते भवतो मूर्तं प्रातिनिध्यं कः कुर्यात्? निर्भीकतया को नाम देशाय सन्मार्गं प्रदर्शयेत्? आध्यात्मिकाधिभौतिकाधिदैविकादिसर्वप्रकारेणाद्य विपन्नममुं देशं परित्यज्य गोलोक गमने कथं भवता व्यष्टिहितस्य पुरतः समष्टेर्हितं बलिरूपेण प्रदत्तम्? भवतो जीवनस्यायं परीवादनवावतार एव भवेत्। अतोऽस्मभ्यं समाश्वासय यदात्मनोऽजरामरत्वेन तत्रापि निवसता भवता भारतीयेभ्यो भारतीयसंस्कृतेः अमरप्रेरणा प्रदीयेत, यथा शीघ्रं च स्वसदृशमेव विशुद्धभारतीयव्यक्तित्वमस्मिन् धराधाम्नि समातीय देशममुमुद्धरिष्यसीति। अद्य नु भवतः कृते इयमेव नः श्रद्धासुमाञ्जलिः सनिवापाञ्जलिःप्रभवत्विति!

श्रीपूर्णानन्दतीर्थस्तवः

श्रीपूर्णानन्दतीर्थस्फुरदमृतगवीविप्रुषाऽऽप्लावितानां,
नास्माकं मोक्षचिन्ता प्रविदितमहसां ब्रह्मभावं गतानाम्।
किन्त्वेषा बोधधारा विघटितनिखिलाकारसंस्कारकारा,
स्वच्छन्दं दन्ध्वनीति प्रतिपदमधुना तामनुव्यञ्जयामः॥ १॥
शिक्षा सर्वागमानां निखिलजनमनःपावनी कापि दीक्षा,
दीप्तिः सर्वात्मदृष्टिर्निरवधिकरुणा किं नु वात्सल्यवृष्टिः।
निष्ठा ब्रह्मात्मविद्याद्युतिदलिततमस्केऽत्यषि[illegible]णीनां,
श्रीपूर्णानन्दतीर्थो जगति विजयते सत्प्रति[illegible]

—स्वामी अखण्डानन्द सरस्वती

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृत-प्रचार-तन्त्रम्

—विद्याभूषणः गणेशरामशर्मा—

राजस्थानप्रदेशस्य झालावाडजनपदाभिजना विद्यारण श्रीगणेशरामशर्माणः गद्ये पद्ये च समं रचनानिपुणाः संस्कृतसाहित्यस्य प्रौढा विद्वांसः प्रथिता स्तत्प्रदेशे । 'भारतीभूति-पत्र-पत्रिकासु प्राय (तेषां सारगर्भाः रचना प्रकाश्यन्ते । भिर्महानुभावै. संस्कृत-प्रचारतन्त्राख्यं निबन्धमसुं विलिख्य प्रारस्य महत्त्वमैतिहासिकम्, अद्यतनीयञ्च भूमिकारूपेण षोडश-पृष्ठैः ((क्जरसाइज बुक) समुपन्यस्तम् । ततः संस्कृतस्य सार्वभौम प्रचाराय भाषणात्मको लेखनात्मकश्चेति प्रचारं द्विधा विभज्य प्रत्येकस्य विभागस्य उपविभागा अपि व्यासशैल्या ल्लिषिताः ७६ पृष्ठानि यावत् । सोऽयमतीव साम्प्रतिको मूल-ग्राही संस्कृतसमुन्नयनाय कल्पपादपायमानो निबन्धः 'सूर्योदयपाठकानां परिज्ञानाय क्रमशोऽनेन अङ्केन प्रकाश्यते । एतादृश-प्रौढनिबन्धप्रदानेन वयं निबन्धकानामेतेषां नूनमधमर्णा इति सश्रयं सूचयाम — **सम्पादकः**

आमुखम्

इदानोमेतत्तु वयं प्रत्यक्षमेवानुभवामो यद्धि वर्तमानं युगं विज्ञाना-ऽर्थशास्त्र-राजनीतिप्रधानम् । अधुनातने विश्वस्मिन् सर्वाणि राष्ट्राणि, सर्वे च राष्ट्रा-धिनायका नेतारो, राजनीतिज्ञाः सर्वेऽप्यथ प्रजा-जनाश्च विज्ञान-राजनीत्यर्थशास्त्राधीसमेव हि स्व-स्वपुरुषार्थसिद्धये प्रयतमाना दरीदृश्यन्ते । विज्ञा-नस्य विकासात् सर्वसाधारणस्य जीवनोपयोगिनां भौतिकसाधनोपकरणानां तथा प्राचुर्यमजायत यथा जगति सर्वाणि राष्ट्राणि तत्प्रजाश्च देशकालव्यव-धानं विना ऐकात्म्यमभजन् किल । वर्तमाने संसारे शान्तिप्रियं क्रान्तिप्रियं वा नैकमपि राष्ट्रं, तदन्त-र्वर्तिनो मानवाश्च स्वेच्छया सर्वाशतः अन्ताराष्ट्रिय-सम्पर्कादैकान्तिकीं तटस्थतामवलम्बितुं प्रभवन्ति । सर्वराष्ट्राणां प्रजा भौतिकानां सम्पदामभिवृद्धये, तद्विभक्तये, वितरणाय च राजनीतिगतसत्ताधिकार-प्राप्तये, अर्थलाभा[illegible] च [illegible]रस्परं महान्तं संघर्ष-माचर[illegible] रां भौतिकीं सम्पदं शं[illegible] स्वायत्तां वा कुर्वन्ति, त एवात्र स्वास्तित्व[illegible] रक्षितुं क्षमा निष्पद्यन्ते । तद्वि-परीतं ये जना भौतिकमिमं सङ्घर्षं दिनानुदिनं जटिलात् जटिलतर जायमानं दृष्ट्वापि च स्वावलम्बनमुपेक्षन्ते शान्तिवादाऽध्यात्मवादादिमिषशतैः प्रमादाऽऽलस्य-दीर्घसूत्रता-कातर्य-कार्पण्यसङ्कीर्णतादीन् दोषांश्च-आत्मनि दधाना मिथ्यादर्शोद्घोषात् जोघुष्यन्तोऽपि यथार्थं वास्तविकं जीवनधारणक्षमं कठोरं च पुरु-षार्थभावं नाश्रयन्ति, ते विज्ञान-राजनीत्यर्थतन्त्रेषु प्रभविष्णूनामन्यराष्ट्राणां, राष्ट्राधिनायकानां, नेतॄणां च दासत्वमगत्याङ्गीकुर्वन्तो न मनागपि सुखं, शान्ति, स्वाधिकारान्, सम्मानं वा लभन्त इति सूर्यप्रकाशवत् सुस्पष्टमेवावलोक्यते अधुना चक्षुष्मद्भिः ।

इत्थंभूतायां जगत्परिस्थितौ शोचनीयायां भारतवर्षदेशस्यास्य अस्माकमध्यात्मवादिनामपि प्रजाजनानां भौतिकेऽस्मिन् महासङ्घर्षे स्वेच्छातो वा अनिच्छातो भागग्रहणं बत अनिवार्यमेवापतितम् ! अतो ह्युपायान्तरमपश्यन्तो नन्वध्यात्मवाद-सभ्यतामभि-लषन्तोऽप्यस्मद्देशनौकाकर्णधारा नेतारस्तिलक-गान्धि लाजपति-मालवीयप्रमुखा अन्ताराष्ट्रियां प्रजा-तन्त्रशासनप्रणालीमत्राङ्गीचक्रिरे । अतो वयमधुना स्वजीवने विज्ञानविद्वत्तां, राजनीतिप्रावीण्यं, तथा अर्थ-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शास्त्रचातुर्यं चापादितुं विव[illegible] स्मेति चापद्धर्म इव सुनिश्चितमेव मन्यताम् । अ[illegible]माकं मान्यतानुरोधाद् भारतीयधर्म-संस्कृति - सभ्यताचार - विचारश्रेष्ठता-ग्रहाद् अस्मत्पूर्वजानामितिवृत्तगत - चारित्र्यमहत्त्वो दोषाद् ईश्वर - जीव-जगत्सम्बन्धि-दर्शनाध्यात्मवाद-डिण्डिमध्वनिनिनादाच्च नेदमधुनातनं विज्ञानसाधन-सम्पन्नं विध्वसोन्मुखम् अर्थवादबलोद्दृप्तं, कान्दिशोक-मपि राजतन्त्राधिकारसत्तारूढं, तीव्रवेगात् परिवर्त-मानं जगत् सहसाऽवरोद्धुं शक्यते। एतत् पारवश्यं लोके केवलमस्माकमेव नास्ति, प्रत्युत भूगोलस्थानां सर्वेषा-मपि राष्ट्राणामियमेव दशाऽद्यत्वे सर्वतोदिग् वर्वर्ति। सर्वशक्तिमतो भगवतो मायापतेर्जगन्नियन्तुः सङ्कल्पा-देवैतत् सर्वं जगति जायते, जात, जनिष्यते चेति मत्वाऽपि किलास्माभिरत्र जीवनसङ्ग्रामसंघर्षे न न कदापि कापुरुषायित्वम् । **मामनुस्मर युद्धच च !** इति भगवद्वाक्यं संस्मृत्य संस्मृत्य वयमत्र जीवन-यात्रायां देशकालानुरोधाद् यथाशक्ति पौरुषमव-लम्बेमहि !

सत्यामथ विश्वं परितोऽन्ताराष्ट्रियपरिस्थितौ एवंविधायां वयं किं करवाम ? एकतन्त्रशासनं पुनः प्रतिष्ठापयाम प्रजातन्त्रं वा स्वीकुर्वीमहि ? प्राचीनां शासनपद्धतिं परिहरतां नवीनां चाङ्गीकुर्वतामस्माकं किं फलं स्यात् ? अस्मद्देशे यदि विज्ञानोन्नतिः क्रियेत तदा अन्यान्यराष्ट्राणामिवात्र विध्वंसलीला भवेद् आहोस्विन्निर्माणम् ? प्रवर्तमाना सेयं राजनीतिः किंरूपा परिणेष्यति ? किं नु खलु राष्ट्रमस्माकं भारतीयमेवंविधैः साधनैर्विलुप्तप्रायां स्वसभ्यतां, संस्कृतिं, धर्मं, श्रियं वा पुनरुज्जीवयितुं प्रभविष्यति न वेत्येवंविधान् प्रश्नान्, व्यर्थविकल्पान्, मिथ्यातर्को-हापोहान् वादविवादांश्च विहाय, विस्मयं च परि-त्यज्य, स्वजीवने स्वाधिकारसीमान्तःपातिनि क्षेत्रे, स्वकर्तव्यपरिपालनबुद्धया किमपि कर्तव्यमेव, किमपि चेष्टितव्यमेवावश्यमिति शुद्धसङ्कल्पात् पुरुषार्थोऽव-लम्बनीय एवास्माभिः !

एवंविधैः कैश्चिद् विचारैर्विमर्शैर्धारणाभिश्च सुर-भारतीसेवाहेवाकितया, तत्प्रचार - प्रसारभावनाभिः प्रेरितेन मनसा, वर्तमानसंसारस्य गतिविधीन् पर्या-लोच्याद्याहं पाठकमहाभागानां पुरतः संस्कृतभाषायाः प्रचाराय प्रसाराय च किञ्चिद् वक्तुमुत्सहे ।

प्रचारमाहात्म्यम्, प्रजातन्त्रञ्च

अथ को नु खलु सचेताश्चक्षुष्मान् जनोऽद्यत्वे प्रचारमाहात्म्यं जानन्न स्यात् ? अस्यां किल प्रजा-तन्त्रात्मिकायां राजनीत्यां, तच्छासनपद्धतौ च सर्वमपि हि विधिविधानतन्त्रं प्रचारेणैव प्रगतिशीलं सत् प्रवर्तते नाम नूनम् ।

प्रचारो नाम स्वसिद्धान्तानां, मतःमतान्तराणां, कर्मप्रवृत्तीनां, तत्प्रक्रियाकलापानां चानुकूलतया लोके सर्वतः प्रसारणम् । स च सिद्धान्तप्रचारो, धर्मप्रचारो, मतप्रचारो, नीतिप्रचारो, नियमप्रचारः सभ्यतासंस्कृति-प्रचारः, वृत्त - संवादप्रचारो, युद्धप्रचारो, व्यापार-वाणिज्यप्रचारो, भाषणप्रचारः, साहित्यप्रचारो, भाषाप्रचारश्चेत्यादिभिः शब्दैर्विबोध्यो भवति। इदानीं स एष प्रचारशब्दः प्रजातन्त्रशासनान्त-र्वर्तिनां राजनीतिगतसिद्धान्तानुयायिनां सम्प्रदाय-विशेषाणां, दलविशेषाणां च मतवादसंस्थापनार्थे रूढिं गतो व्यवह्रियते ।

अद्यत्वे प्रचारबलादेव राष्ट्राणां तन्त्रसञ्चालकाः परस्परं शासनोपयुक्तशक्तिसन्तोलनाय उत्सहन्ते। संसारेऽस्मिन् प्रजातन्त्रात्मिकां शासनप्रणालीमनु-वर्तमानेषु सर्वेष्वपि रा[illegible]ष्ट्रेषु प्रचारविभागो (Pro-paganda D[illegible]er[illegible]) वि[illegible]विधानस्य अभिन्नमङ्ग[illegible]त्यिषयश्च[illegible] च [illegible] द[illegible] [illegible]क्षशः कोटिशश्च रूप्यकाणा व्य[illegible] [illegible]म प्रचार-विभागं सञ्चालयन्ति । यतः [illegible]गेव हि प्रजाः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शासनपरिषत्सदस्यैः स्वमतानुकूल्यं नीयन्ते, प्रचारादेव वाणिज्य-व्यवसायक्षेत्रेषु क्रय-विक्रयोपयोगिनां लाभः संसाध्यते। प्रचारनीत्याऽसाध्यं हि साध्यं भवति, साध्यं सुसाध्यं, सिद्धं च सुरक्षितं भवति।

इदं त्वस्माभिः प्रत्यक्षमेवावलोक्यते यथा निर्वाचनेषु प्रचारसक्षमा लोका एवाधिकाधिकं शासनसभानां, धारासभानां अन्यासां वा महतीनां संस्थानां सदस्यत्वं जयन्ति। निर्बलानि राष्ट्राणि, दलानि, समाजाः संस्थाश्चापि प्रचारोद्घोषैरात्मनो बलवत्त्वं, क्षमत्वं योग्यत्वं च प्रख्यापयन्ति। प्रचारनीतिमाश्रित्यैव महतीष्वपि परिस्थितिषु संकटापत्तिकालं क्षपयित्वा नेतारो जननायकाः शासनाधिकारिणश्च स्ववर्गाश्रितान् जनान् विपद्भ्यः परित्रायन्ते।

किं बहुना, प्रचाराद् राजनीत्युत्कर्षः, प्रचाराद्धर्मविवृद्धिः, प्रचारात् चसाहित्योन्नतिः। प्रचाराद् भाषाप्रसृतिः, प्रचारात् कलाकौशलाभिवृद्धिः, प्रचारात् शिक्षाव्याप्तिः, प्रचारात् स्ववर्गसङ्घटनं, प्रचाराद् वाणिज्यव्यवसायाभिवृद्धिः युद्धनीतिसञ्चालनमित्यादि सर्वमपि च लौकिकमभ्युन्नतिसाधनं भवति।

प्राचीन-भारतीयाः प्रचारकाः

अथ वयं भारतीयाः स्वभावतः प्राचीनताप्रियाः स्मः। तदादौ स्वदेशस्य प्राक्तनस्य प्रचारप्रकारस्य परम्पराविषये कापि परिकल्पना प्रसङ्गोपात्तं प्रोच्यते। प्राचीनभारतेऽप्यतिप्राचीनकाले प्रचारक्रमः प्रवर्तते स्मेति प्रतिभाति नः। तदानीमन्यान्यदेशेष्विव अस्माकं भारतवर्षेऽपि केचित् सफलाः प्रचारकाः प्रचारविधयश्चासन्। तथा हि—

सुराणाम् असुरशक्ति[illegible] सह सङ्घर्षसमये महामतिः [illegible] ना[illegible] देव[illegible] [illegible]लीने समाजे सुराणां रा[illegible]ी[illegible] [illegible]-सिद्धान्तानां प्रच[illegible]न्ये, स खलु सुराणां शासनतन्त्रे किल[illegible]धानो जागरूकश्च प्रचाराध्यक्षो बभूव, यो हि देवानां सर्वविधप्रवृत्तिषु स्वमतानुरूपां प्रचारयति स्म। देवाश्चाप्यथ नारदसम्मताचरणेरेव असुरान् जेतुं प्रबभूवुः।

अथ असुरगुरुः शुक्राचार्योऽपि स्वनीतिप्रचारे खल्वद्वितीयोऽभूद्, यस्य प्रचारकौशलात् सुरा भूयो भूयोऽसुरेभ्यः पराजयं प्रापुः।

नैमिषारण्ये सूत-शौनकादीनामष्टाशीतिसहस्रसंख्यकानामृषीणां समुदायोऽपि धर्मप्रचारे सुप्रसिद्धः सङ्घोऽभूद् यो हि कथाख्यानोपाख्यान-पुराणेतिहासचर्चाभिः भारतीयवर्णाश्रम-सनातनधर्मस्य अध्यात्मविद्याया आर्षसभ्यतायास्तत्संस्कृतेश्च महान्तमाशाप्रसारं प्रचारं च कुर्वन्नासीत्।

एवमेव भगवान् वेदव्यासो मुनिर्वाल्मीकिर्जनको याज्ञवल्क्योऽन्येऽपि च धर्म-सभ्यता-संस्कृतिप्रचारे सफला महाप्रचारकाः स्वनाम्ना कर्मभिश्च तैस्तैर्विश्रूयन्ते।

पुराकाले राजसूययज्ञानुष्ठानं, स्वयंवरसभाश्च क्षत्राणाम् बल - पौरुष - गुण - रूपसौन्दर्योत्कर्षादीनां प्रचारायैवाभूदिति मन्तुं सुशकम्। भदन्तो भगवान् सिद्धार्थस्तच्छिष्याश्चानेके बौद्धसङ्घद्वारा अहिंसातत्त्वसिद्धान्तं प्रचारयामासुः। सम्राड् अशोकस्तावद्धर्मप्रचारे सफलः प्रचारको बभूवेति सर्वसम्मतम्।

कूटनीत्यां प्रवीणस्य महागुरोः चाणक्यस्य अभिसन्धिपूर्वकं कृतः प्रचारो नन्दवंशं जघान, चन्द्रगुप्तं मौर्यं च सम्राजं विदधे, राक्षसमन्त्रिणं विजित्याऽन्ते संन्यासं स्वीचकारेति को वा न जानाति? चन्द्रगुप्तो विक्रमादित्यो विद्याप्रचाराय विद्वन्नवरत्नमण्डलं चकल्पे। सम्राड् अकब्बरश्च विद्याकलारसिकत्वात् सुप्रसिद्धानि नवविद्वद्रत्नानि स्वसदसि स्थापयामास। महाराष्ट्रकेसरिणः छत्रपतेः शिवराजवीरस्य प्रचारकौशलमत्यद्भुतं विश्रूयतेतमाम्। अन्येऽपि च प्रतापदुर्गादास-प्रभृतयो बहवः क्षत्रा यवनशासकेभ्यो विरुद्धं प्रचारबलेनैव जिग्युः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अस्मद्देशीयाः प्रायेण सर्वेऽपि प्राचीना धर्माचार्या दार्शनिका विद्वांसः कवयो वा राजगृह - तक्षशिला-काश्युज्जयिनी - प्रभृतोनि स्थानानि विद्याप्रचार-क्षेत्राणि गत्वा, शास्त्रार्थैरन्यमतानि खण्डयित्वा, स्वसिद्धान्तमतवादान् प्रतिष्ठाप्य आचार्यत्वमापुरित्यपि तथ्यमेव। इत्थं प्रचारसूत्रं विभिन्नमपि सद्देशकाला-पेक्षया सर्वविधसमयेषु सर्वविधासु शासनपद्धतिषु प्राचामुपलभ्यते।

अद्यतनीयं प्रचारस्वरूपम्

अथाऽधुनातनस्य प्रचारस्य स्वरूपविषये स्वभावतो जनानां हृदि जिज्ञासा जागर्ति। वर्तमाने काले प्रचारोऽसौ किंरूपः प्रचलति, को वाऽस्य प्रकार इत्यादयः प्रश्नाः स्वत एवोद्भवन्ति। ततो ह्युच्यते :

प्रचारस्तावद् राजनीति गत-शासनतन्त्रप्रभवः। नाधुनातनः प्रचारः कोऽप्याध्यात्मिको धार्मिको भावविशेषो सिद्धान्तविशेषो वा। स्वनीतिसाफल्याय राजनीतिविद्भिः स्वीकृतो मतप्रसारकः किलैकः प्रकारविशेष एव सः। श्रूयते, यूरोपभूभागे यद्धि रोमन-कैथोलिकाख्यस्य सम्प्रदायस्य सदस्यै ईशवीय-धर्मस्य सिद्धान्तान् प्रचारयितुं यत्र तत्र सर्वत्र केचि-ज्जनाः प्रचारकत्वेन नियोजिता आसन्। ततो यूरोपे धर्मक्षेत्रं परित्यज्य प्रचारक्रमो राजनीतिक्षेत्रं जगाम स्वोपयोगमहिम्ना।

भारते चापि अथाङ्गलाः प्रचारबलादेव प्रवेशमाप्य देशान्तर्वर्तिनीः सर्वाश्चापि शासकशक्तीर्जेतुं प्रबभूवुः। गौराङ्गशासनविरुद्धं या भारतीया राजक्रान्ति-र्विद्रोहात्मिका वाऽहिंसात्मिका वाऽजायत, स्वराज्यं च लब्धं तत्रापि प्रचारसूत्रमोतप्रोतं कूटनीत्यभि-सन्धिना अन्तर्निहितमभूदेवेत्यहो माहात्म्यं प्रचारस्य!

प्रचारः सत्यो ह्यसत्यो वा अर्धसत्यो वा अंशतः सत्यो वा भवितुमर्हति। क्वचित् प्रचारः स्वोत्कर्षसाधनाय, क्वचित् परापकर्षसाधनाय, क्वचिल्लोकप्रवृत्ति-रोधाय, क्वचिद् विरोधिनां विरोधाय, क्वचिल्लाभ-लिप्सया अन्यत्र च परपक्षापक्षयाय भवति। परस्परं स्पर्धमानानां राष्ट्राणां, समाजानां, जनवर्गगत-दलानां, शासनाधिकारिणां, नेतॄणां, सर्वकारस्य, सङ्घविशे-षस्य, सर्वसाधारणानां प्रजाजनानां वा योगक्षेमाय, प्रतारणाय वा समाश्रीयते प्रचारः।

प्रचारस्य तात्त्विकस्वरूपविषये न कोऽपीदमित्थं वक्तुं पारयेत्, तथापि देशकाल-परिस्थितिजनभावाद्यनुरोधात्, कार्यगौर-वाच्च प्रचारो नानारूपो नानाकारो लोकानां मनोवृत्तिज्ञानपूर्वकं जनसङ्घान् कार्यविशेषेषु चान्दोलनविशेषेषु च नियोक्तुं क्षमो नीति-कुशलैराविष्कृतो, व्यवस्थितयोजनासाफल्याय परिकल्पितः स्वमतप्रचारणस्य प्रकारविशेष इत्यंशतस्तद्रूपरेखा इति वक्तुं युज्यते।

वस्तुतस्तु प्रचाराभिसन्धिं विरला एव जानन्ति। निम्नाङ्किता किलैका सूक्तिः प्रचारनीति-सिद्धान्ततत्त्व-विदो मनीषिणो विषये सर्वांशितो घटते—

बहिः सर्वाकारप्रगुणरमणीयं व्यवहरन्,
पराभ्यूहस्थानान्यपि तनुतराणि स्थगयति।
जनो विद्वानेकः सकलमभिसन्धाय कपटै-
स्तटस्थः स्वानर्थान् घटयति च मौनं च भजते॥

अपरं च किञ्चिद् रूपान्तरिता सेयमुक्तिः—

सत्याऽनृता च परुषा प्रियवादिनी च,
हिंस्रा दयालुरपि चार्थपरा वदान्या।
नित्यव्यया प्रचुरनित्यधनागमा च,
वेश्याङ्गनेव विविधा हि प्रचारनीतिः॥

प्रचारक-गुणाः

अथ प्रचारका[illegible]गा [illegible]न्ते [illegible]त्यषयश्च [illegible] प्रचारकर्मणि स[illegible] [illegible]-विज्ञानवेत्तारः, शासनपाटवं बि[illegible] [illegible]-तत्त्वज्ञाः, क्रान्तिकारिणः, प्रत्युत्पन्न[illegible]व हि[illegible]नः,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सार्वजनीनकार्योद्योगव्यसनिनो, लोकसेवका, बहुभाषाविदो, नानावेशविन्यासचतुरा, विविधशासनपद्धतिसम्बन्धि-विधिविधान-नियमवेत्तारो, बहुश्रुता, देशविदेशवृत्त-प्रवृत्तिविशेषज्ञा, विज्ञा अभिज्ञाश्च लोकचरित्राणां साहित्यसेविनो, लेखकाः, सङ्घटनक्षमा, व्यापारविज्ञानकुशलाश्च ये भवन्ति। नहि सर्वसाधारणा जना विषयमेतं ज्ञातुं समर्थाः ; तथाप्यत्र स्थूलरूपं प्रचारसिद्धान्तं व्यावर्णयन्ति बुधा नव्ययुगीनाः । तमेव वयं किञ्चिद् ब्रूमः ।

भाषण-प्रचारः

भाषणं, लेखनं (Press and Platform) चेति क्षेत्रद्वयं मुख्यं प्रचारसाधनस्य। सभा-सम्मेलनानां रङ्गमञ्चेषु,नाटकाभिनयप्रेक्षागारेषु समाजेषु उत्सवेषु, धार्मिकेषु मेलकेषु, राजनीतिप्रशासन - सम्बन्धिनीषु परिषत्सु, वादविवाद - प्रतियोगितासु, कथा कीर्तनप्रसङ्गेषु, सङ्गीतगोष्ठीषु, ज्ञातिषु, मित्रमण्डलीषु यात्रासमारोहेषु, यज्ञोपवीत - वाग्दान - विवाहादिशुभप्रसङ्गेषु, तथाविधेष्वपि संस्कारविधिषु च यो हि वाण्या भाषण - सम्भाषण - वार्ता - संलापादिभिः स्वाभीष्टस्य विचारस्य, मतस्य मान्यतायाः, सिद्धान्तानां भावानां वाऽभिसन्धिपूर्वकं प्रचारः क्रियते स खलु- भाषणात्मकः प्रचार आद्य इति वदन्ति तद्विदः ।

अयं हि भाषणात्मकः प्रचारः सरलातिसरलः प्रभावजुष्टोऽपि च क्षणस्थायी तात्कालिकपरिस्थितिसुविधादिसापेक्षो भवति ।

वाङ्मयः प्रचारोऽसौ सुकरोऽपि सन्नल्पप्रभावकारकः । अस्मिन् प्रचारे [illegible] श्चापि सम्भाव्यन्ते । वि[illegible] सत्यपि (A ti Prop[illegible] [illegible]पि भाषणं नाम मु[illegible] [illegible]तं सुनिश्चितम् । भाष[illegible] [illegible]तु महान्तो मनस्तत्त्ववेत्तारो जनरुचि[illegible] प्रगल्भा वाग्मिन एव प्रभवन्ति, न तु सर्वसाधारणा मानवा अत्र कर्मणि साफल्यमासादयन्ति। अधुना भाषणमुखः प्रचारो जीर्णप्रायो जातः। यथा अर्धशताब्द्याः प्राक् प्रभावोऽभूद्विदुषां भाषणानां लोकमानसे, न तथाऽद्यत्वे वर्तते इति बलात् स्वीकर्तव्यं भवेत् । यतो हि जनरुचिर्भाषणेभ्योऽपारज्यत, अतिपरिचयादवज्ञातश्च स एष भाषणात्मकः प्रचार-प्रकारः ।

परं तथ्यमेतत् संस्कृतस्य भाषणात्मके प्रचारे किलांशत एव घटते। संस्कृतगिराम् भाषणात्मकस्य प्रचारस्याद्यापि भूयानवकाशोऽवशिष्यते । विषयेऽत्राग्रे वक्ष्यामो विस्तरेण, परमत्र त्वेतावदेवावधार्यतां यद्धि प्रचारक्षेत्रे भाषणस्य प्रथमं स्थानमिति ।

लेखनादि-प्रचारः

प्रचारस्य द्वितीयमप्यद्वितीयं क्षेत्रं वा स्थानं वा लेखनं, मुद्रणं प्रकाशनं चेति । लेखन-मुद्रण-प्रकाशनैर्यो हि प्रचारो विधीयते, स खलु विचारविमर्शनिर्णीतो, योजनाभिसन्धिगम्भीरो, द्रढीयान् निरापदश्चिरस्थायी च भवति । युगेऽस्मिन्मुद्रणालयास्तवात्प्रचारस्य महान्ति साधनानि समपद्यन्त। इदानीन्तने संसारे प्रायेण सर्वत्र प्रचारो मुद्रणात्मको दरीदृश्यते। प्रकारोऽसौ प्रचारस्य जगत्यधिकाधिकं जायमानो विजृम्भतेतमाम् । मुद्रणात्मके प्रचारे भाषण इव प्रत्युत्पन्नमतित्वं लोकरुचेराराधनं, सद्यो मानसतत्त्ववेदित्वं, व्यक्तित्व-प्रभावादिकं तत्कालमपेक्षातो न्यूनमपि सद् विक्रियां न व्रजति। अतो मुद्रणात्मकः प्रचारो निर्बाधो, निरातङ्को, निश्शङ्कः, फलेग्रही च पर्यवस्यति नूनम् । ततो द्वितीयं प्रचारसाधनं सुपरिष्कृतक्षेत्रसापेक्षं, प्रचुरद्रव्यव्ययसाध्यं जनशक्तिशबलं, सबलं, बुधजनैर्योजनापरिष्कृतं सदक्षयं फलं प्रयच्छतीति निश्चप्रचम् ।

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रसाल-रस-चूषणम्

—कविभूषणः श्री भुवनेश्वरप्रसाद चौधरी—

[भागलपुरस्य - 'मारवाडी - पाठशाला' - प्रधानसंस्कृताध्यापकानां कविभूषणानां श्री भुवनेश्वरप्रसाद चौधरी 'भुवनेश' शास्त्रिणां रसाल-रसचूषणमास्वाद्य 'सूर्योदय' - पाठका लौकिकाम्रफलरसचूषणेन तोलयन्तु । कविभूषणैः स्वोपज्ञा विविधपद्य-नाटक-नक्षत्रमाला अस्मभ्यं प्रकाशनाय प्रहिता । तस्या इदमेकं नक्षत्रं वरीवर्ति परं रसाप्लुतमिति ।—सम्पादकः]

एकस्मिन् दिने औदासिन्यात् मम मनः कथमपि कुत्रापि न लगति स्म । किं कर्तव्यमिदानीम्, इति मनसि चिन्तयन्नेवासं, तदानीमेव ममाग्रे दैनिकं पत्रम् 'आर्यावर्तम्' कोऽप्यागत्य दत्तवान् । तस्मिन् पत्रे एकः श्लोकः आसीत्—

दिङ्मण्डलं परिमलैः सुरभीकरोषि,
सौन्दर्यमावहसि लोचन-लोभनीयम् ।
हंहो रसाल फलवर्ष ! तथापि ब्रूये,
यद् ग्रन्थिलं च कठिनं हृदयं बिभर्षि ॥

अयं श्लोक आम्रविषये अन्योक्तिः । अस्यैव श्लोकस्य भावम् अवलम्ब्य बहुभिः छन्दोभिः मया बहूनि पद्यानि रचितानि । अनेन कार्येण तद्दिनमत्यानन्देन व्यतीतम् । तान्येव पद्यानि अत्र समुद्घाटयन्ते 'सूर्योदय' - पाठकानां हृत्पटलेषु ।—लेखकः]

१. सर्वासु दिक्षु विमलं प्रतनोषि गन्धं
रूपैर्विमोहयसि नेत्र-युगं रसाल ।
तृप्तिं परां च विदधासि फलैर्जनानां
हा ! ग्रन्थिलं च कठिनं हृदयं कथं ते ॥

२. रसाल ! दिक्षु सौरभं ददासि दिव्यमद्भुतं
तथैव रूप-राशिभिस्तनोषि नेत्रयोः सुखम् ।
करोषि तृप्तिमप्यहो फलैः सुधोपमैर्नृणां
हृदीह चोपलं कथं दधासि ? तद्धि कष्टदम् ॥

३. ददासि गन्धं ननु दिक्षु दिव्यं,
रूपैस्तथा चाक्षि-सुखं समन्तात् ।
रसाल ! तृप्तिं च फलैरपूर्वां,
शिलोपमं किं हृदयं बिभर्षि ? ॥

४. परिमलं ननु दिक्षु ददासि वै
निज - सुकान्तिभिरक्षि - सुखं तथा ।
परम - तृप्तिमपीह फलैरहो
हृदयमेव कथं कठिनं कृतम् ? ॥

५. ददास्याम्र ! गन्धं च दिव्यं दिशासु
तथा सुन्दरत्वेन वै नेत्र-सौख्यम् ।
फलैश्चापि तृप्तिं करोष्येव सम्यक्
कथं ग्रन्थिलं हृद्दधासीति चित्रम् ॥

६. अति सुमधुर-गन्धं दिक्षु दिव्यं ददासि,
ननु नयन-सुखं च स्वीय-रूपैरतीव ।
सुमधुर-फल-दानैराम्र ! तृप्तिं तनोषि
कथमिव हृदयं ते ग्रन्थिलं चावभाति ॥

७. रसाल ! त्वं गन्धं दिशि दिशि मनोज्ञं वितरसि
तथा दिव्यै रूपैरपि नयन - सौख्यं च तनुषे ।
ददासि त्वं तृप्तिं सुमधुर - फलैश्चापि परमां
कथं ग्रन्थिं नूनं वहसि हृदयेऽतीव कठिनाम् ॥

८. दिव्यं गन्धं ददासि त्वमिह मधुमयं
चाम्र ! सर्वासु दिक्षु
रूपै रम्यै विविधा [illegible]पि सुखममितं
[illegible]र्यच्छसि त्वम् ।
तृप्तिं [illegible]त्यर्थयश्च [illegible] नोषि
किन्त्वेकं दुःखमेवोपल [illegible] व हृद्धासि ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

९. गन्धं दिक्षु ददासि चाम्र मधुरं सर्वत्र सम्मोदयन्
सौन्दर्येण मनोहरेण नयने सम्मोहयस्यञ्जसा।
तृप्तिं त्वं मधुरैः फलैश्च नितरां सम्पादयस्येव नो
ग्रन्थिश्चैकमतीव कर्कशमहो धत्से कथं चान्तरे॥

१०. सर्वासु त्वं परम-मधुरं दिक्षु गन्धं ददासि
सौन्दर्येणापरिमितगुणेनाक्षिसौख्यं तथैव।
तृप्तिं पूर्णां सुमधुर-फलैः कण्ठपूरं तनोषि
ग्रन्थिं कस्माज्जठर-कुहरे कर्कशं सन्दधासि॥

११. सौरभमाम्र ददासि दिशासु नेत्रसुखं च तथैव सुरूपैः।
तृप्तिमपीह फलैर्विदधासिग्रन्थिमहोहृदिकिं निदधासि

१२. दिक्षुगन्धं ददास्याम्र! रूपैरक्षि-सुखं तथा।
फलैश्च परमां तृप्तिं हृदये ग्रन्थिलं कथम्॥

हिन्दी-छन्दांसि

१३. दत्से मनोहर-गन्धमिह सर्वासु दिक्षु रसाल हे
सौन्दर्यमप्यवलोक्य तव नयनोत्सवं च लभामहे।
आस्वाद्य फलमिह चाप्नुमस्तृप्तिं परां ननु सर्वथा
तद्ग्रन्थिमेकं कर्कशं निदधासि किं हृदये वृथा॥

१४. दत्से त्वं रसाल दिक्षु दिक्षु मधु-गन्धमिह
यमवाप्य मानवा मुदं च हृदि मन्वते।
तव रूप-राशयोऽपि जन-दृष्टिपथमेत्य
परानन्दमाशु मानसे च ननु तन्वते।
मधुरैः फलैस्तथैव तृप्तिं परमां तनोषि
येन सर्व-जन्तवः प्रशंसां तव कुर्वते।
किन्तु दुःखमेकमेव यद्विशाल-हृदये हि
दृश्यते शिलोपमं कठोरं किल पर्व ते॥

१५. आम्र! तनोषि दिशासु मनोहर-
गन्धमतीव शुभं च सुभव्यम्।
सुन्दर तात इहाशु ददासि हि
नेत्र-युगे च सुखं ननु नव्यम्।
तृप्तिमपोह करोदिन्द्रश्च [illegible]-
[illegible] सदैव।
[illegible] सा
[illegible]विमूढो [illegible]
[illegible] मुधैव॥

१६ मु[illegible]मुखा[illegible] [illegible]गन्ध [illegible]षि;
[illegible] नेत्रोत्सवं रूपैः करोषि।
परां तृप्तिं फलैरप्याशु दत्से;
हृदि ग्रन्थिं कठोरं किं नु धत्से॥

१७. सौरभेणैव ते चाम्र! सर्वा दिशो-
मोदयुक्ता विधीयन्त एतास्तथा।
तावकेनैव रूपेण चाकृष्यते
नेत्र-युग्मं वसन्ते मुहुः सर्वथा।

१८. हायने हायने ते फलैरप्यहो!
प्राप्यते पूर्ण-तृप्तिर्मुदा मानवैः।
ग्रन्थिरेकः कथं कर्कशस्तेऽन्तरे
दृश्यते धार्यते यः सदा दानवैः॥

१९. दिक्षु गन्धतो रूपतो
मोदं चाम्र! ददासि।
फलैश्चापि तृप्तिं, कथं
ग्रन्थिं हृदि निदधासि?॥

२०. गन्धं फलं सुकान्तिं चाम्र! ददासि।
हृदये ग्रन्थिं कठिनं किं निदधासि?॥

२१. आम्र! फलैरपि गन्धैः सौन्दर्येण।
सुखयसि, किं दुःखयसि च हृदुपलकेन॥

उपालम्भमाकर्ण्य आम्रस्य उक्तिः। आम्र उवाच—

२२. सेवाव्रतं ननु ममास्ति सनातनं हि
रूपै रसै परिमलैश्च करोमि सेवाम्।
ग्रन्थिं हृदीह मम पश्यसि तन्न शाठ्य-
मागामिजन्मन इदं ननु बीजमेव॥

निवेदनम्

२३. पद्यानि यानि बहुलानि मयाऽद्य सद्य
आम्रं वलम्ब्य रचितानि मुदे विदानाम्।
तान्येव चेह लिखितानि विनोदनाय
स्वान्तःसुखाय च विदामनुमोदनाय॥

२४. अत्र केचिद्धसिष्यन्ति, मह्यं क्रोत्स्यन्ति चापरे।
रसज्ञा रसमाप्स्यन्ति शिक्षां शिक्षार्थिनस्तथा॥

२५. विषयञ्चैकमालब्य बहुच्छन्दोनिदर्शनम्।
विनोदाय हि लोकानां भविष्यत्ययमुद्यमः॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नेपाले संस्कृत-विद्यालयः सर्वथाऽनुपेक्ष्यः

--श्री पूर्णचन्द्रशास्त्री उपाध्यायः--

प्रायः सर्वाऽपि आर्यसंस्कृतिः विश्वभाषामूलभूतायां संस्कृतभाषायां निहिता । संस्कृतभाषायाः कलेवरं किल विशालं विकासशीलञ्च । नैतादृशी योग्यता विश्वस्य अन्यभाषासु । हिन्दूनामधारिणामार्याणां कृते स्वकीयार्यसंस्कृतेः, विश्वभाषाजनन्याः संस्कृतभाषायाश्च संरक्षण - संवर्धनमन्तरा न किञ्चित्परं कर्तव्यम् । अत एव कर्तव्येन संविधानतश्च हिन्दूराष्ट्रनाम्ना प्रथिते नेपाले संस्कृतभाषान्तर्गतानां मानवजीवनेन सह सदैव सम्बद्धानां रहस्यानां ज्ञानाय विश्वस्मिन् तेषां प्रचार - प्रसाराय च संस्कृतविश्वविद्यालयसंस्थान नितरामावश्यकम् । प्रारम्भे एव 'नेपाल-संस्कृतविश्वविद्यालय'स्य बाल-मृत्युविषयिणी घटना न केवलं हिन्दूजातेः, प्रत्युत विचारशीलविश्वमानवमात्रस्य कृतेऽपि दुःखदा । स्मृतैव सा परितो गाढं तमो जनयति, हिन्दूजगति नैराश्यं च तनुते ।

सर्वतोऽप्यावश्यके प्रारब्धे च नेपाल - संस्कृतविश्वविद्यालये नेपालशासनेन अविवेकतोऽवरुद्धे सर्वत्र नैराश्यं व्याप्तम् । क्रमशः सर्वत्राऽनेकशः संस्कृतविद्यालया निःशेषं भग्नाः, बहवश्च संस्कृतविद्यालया आङ्गलभाषा-विद्यालयरूपेण परिणताः । अवशिष्टेष्वपि संस्कृतविद्यालयेषु छात्राणां संख्या नितरामल्पीयसी जाता । एवंस्थितौ संस्कृतसंस्थानसञ्चालनाय संस्कृतजगति कृतकर्मणोः नितान्तमुत्साहिनोर्विद्वत्प्रवरयोः श्री अम्बिकाप्रसाद अधिकारी श्री तोयनाथ पाण्डेय महोदययोः क्रमशोऽध्यक्षोपाध्यक्ष (डीन-डिपुटीडीन) रूपेण राष्ट्रनायक श्री ५ महाराजाधिराजतो यत् मनोनयनमभूत्, तन्नूनं संस्कृतजगति शुभायतेः सञ्चारः ।

साम्प्रतं नेपालशासनद्वारा सञ्चाल्यमानस्य संस्कृत-संस्थानस्य वर्तमानाधिकारिभिः एतैः महोदयैः संस्कृत - विद्वद्भिरन्यैश्च संस्कृतजगति कृतकर्मणां विद्यानिधीनां गुरुगोरक्षनाथसम्प्रदायस्तम्भानां योगिराज श्री नरहरिनाथ महोदयानामपि साहाय्यमपेक्ष्येत चेत् संस्कृतजगति क्रियमाणे प्रगतिकार्ये शैघ्र्यं भवेदिति सर्वेषां संस्कृति-संस्कृतानुरागिणां विश्वासः । वर्तमान-संस्कृत-संस्थायाः 'संस्कृत-संस्थान'स्य कलेवरवृद्धये तस्मै यथाशीघ्रं विश्वरूपप्रदानाय च योगिराजाः सर्वदा सर्वथा सर्वतोभावेन चानुरूपा इत्यत्र न लेशतोऽपि सन्देहः । योगिराजानां साहाय्यादानाय विद्वत्परिषदैका अञ्चलीय-शिक्षाव्यवस्थापिकया अञ्चलसमित्या सङ्घट्टनीयेत्यस्माकं प्रस्तावः । आशास्महे च विद्वत्परिषदो दृढ मन्तव्यं न ते उपेक्षितुं शक्ष्यन्तीति । अन्यच्च, हिन्दूराज्ये नेपाले विश्वसंस्कृतीनां मूलभूताया आर्यसंस्कृतेः विश्वभाषाणां मूलभूतस्य संस्कृतस्य च संरक्षणार्थं प्रचार-प्रसारार्थं च दृढा व्यवस्था नूनं संभवेत् ।

प्रसङ्गेऽस्मिन् संप्रार्थ्यन्तेऽस्माभिः नेपालराष्ट्रनायक श्री ५ महाराजाधिराज-सर्वकारा अत्यावश्यकस्य नेपालसंस्कृत-विश्वविद्यालयस्य साकारताविषये पुनर्विचारकरणाय । अनुपेक्षणीयस्यास्य नेपाल-संस्कृतविश्वविद्यालयस्य दर्शनाभिलाषिणो योगिराजाः श्री नरहरिनाथ महोदया अपि चिरात् विषयेऽत्र प्रयत्नशीलाः । संप्रति ते संस्कृत-विश्वविद्यालयस्यैव पृष्ठपोषकं द्वितीयं विश्व - हिन्दू - सम्मेलनं कर्तुं नेपाले हिन्दूराष्ट्रे संचेष्टन्ते । नेपालदेशस्य पश्चिमाञ्चले भ्रमन्तो बृहदा[illegible] शाखाः प्रशाखाश्च विस्तारयन्तस्ते [illegible]

विश्वमा[illegible]स्त्य-

पाश्चात्यदर्शनेऽगाधज्ञा[illegible] वि[illegible]न्या

महामन्त्रिणः श्री एस० एस० [illegible] हि[illegible]श्च

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हिन्दुराज्ये नेपालदेशे द्वितीयं विश्वहिन्दूसम्मेलनं समायोजयितुं प्रयतन्ते। एतादृशानि महायोजनानि विश्ववाङ्मयमूलस्य संस्कृतवाङ्मयस्य प्रचार-प्रसाराय अत्यन्तं हितकारीणि।

हिन्दूराज्ये नेपाले आर्यसंस्कृतेर्हिन्दुत्वस्य च मूलकीलनाय नेपाल-संस्कृत-विश्वविद्यालयं स्थापयितुं विश्वविभूतिभिर्भारतवासिभिः पूज्यपाद करपात्र-स्वामिपाद - परमश्रद्धेयकाशीनरेश - पूज्यपाद - धर्मगुरु-श्रीशङ्कराचार्य - श्रीरामानुजाचार्य - श्रीनिम्बार्काचार्य-श्रीवल्लभाचार्य - श्रीजैनाचार्य-श्रीबौद्धाचार्य-श्रीसिखधर्माचार्य - श्रीरामानन्दाद्याचार्यवर्यैः परमश्रद्धेयैर्विश्वहिन्दुपरिषद् - भारतधर्ममहामण्डला-ऽऽर्यसमाजादि-धार्मिक-सामाजिक-हिन्दुसङ्घटनैश्च यः प्रयासः कृत आसीत्, तस्यैव फलं नेपालराष्ट्रस्य पश्चिमाञ्चले राप्त्यञ्चले दाङ्ग मण्डलीये हेमन्तपुरस्थे परितः पर्वतमालामण्डितेऽत्यन्तविशाले बिल्वकुञ्जे नेपाल-संस्कृत-विश्वविद्यालयः प्रचलति। महता उत्साहेन सञ्चाल्यमानः स सर्वकारेण निरुद्धो न ज्ञायते कियत्कालं निरोत्स्यते। भगवान् पशुपतिरेवेदं जानीयात्। विषयेऽत्र समये समये पूर्वोक्तैः सर्वैरपि हिन्दूसमाजमार्गदर्शकैः धर्माचार्यैः नेपाले गत्वा पत्रद्वारा वा "प्रस्तुतविश्वविद्यालयस्थगनं नितान्तमशोभनम्" इति नेपालराष्ट्रनायकाः श्री ५ महाराजाधिराजसर्वकाराः संप्रेरणीया इति तेऽस्माभिः सादरं सप्रश्रयं प्रार्थ्यन्ते भारत-नेपालमैत्र्याः दृढमूलतायै।

नेपाले नेपाल - संस्कृत - विश्वविद्यालयस्य सञ्चालनाय संस्कृतभाषाया अधिकाधिकमात्रायां प्रचारप्रसाराय च कियत्[illegible]राष्ट्रे कृतयात्रैः पूज्यपादैः श्री[illegible]श्वरैः भगवच्छङ्कराचार्य[illegible] श्री ५ महाराजाधिराज[illegible]सविधे एतदर्थं प्रयासः [illegible]

अचिरादेव ज्ञान-विज्ञानाकराणां श्रीमद्भगवतां वेदानां हिन्दूराज्ये नेपाले प्रतिष्ठापनार्थं लब्धप्रतिष्ठान् विदुषो वीतरागान् महात्मनश्च साकं नीत्वा नेपालराज्यस्य राजधानीं काष्ठमण्डपं गतैः वेद-दर्शनाचार्यैः महामण्डलेश्वर श्री गङ्गेश्वरानन्द स्वामिपादैश्चापि तादृश एव प्रयासः कृतः। काष्ठमण्डपस्य ऐतिहासिकेषु महत्त्वपूर्णेषु पञ्चषस्थानेषु वेदानां प्रतिष्ठापनञ्च कृतमेतैः महता उत्साहेन।

अन्यच्च, यावत् नेपालदेशस्थाः संस्कृतसंस्थाः संस्कृत-संस्थानं च स्वातन्त्र्येण विश्वविद्यालयस्य रूपं न गृह्णन्ति, तावत् अन्यविश्वविद्यालयस्य निर्देशनं प्रतिक्षणं ग्रहीत्रा तेन संस्थानेन न किमपि कर्तुं शक्येत। संस्कृतवाङ्मयमत्यन्तं विशालम्। ज्ञान-विज्ञानाकरा वेदाः, वेदानुकूलक्रियामूला उपवेदाः, महत्त्वपूर्णानि वेदाङ्गानि, सृष्टि-स्थिति-विनाशग्रन्थि-भेदकानि दर्शनानि, धर्मशास्त्रम्, नीतिशास्त्रम्, कामशास्त्रम्, गणितशास्त्रम्, ज्यौतिषशास्त्रम्, भौतिकशास्त्रम्, प्राणिशास्त्रम्, रसायनशास्त्रम्, भूगोलशास्त्रम्, खगोलशास्त्रम्, खनिजशास्त्रम्, राजनीतिशास्त्रम्, शिल्पशास्त्रम्, कृषिशास्त्रम्, साहित्यशास्त्रम्, मनोविज्ञानशास्त्रम्, इतिहासपुराणादीनि अनेकानेकशास्त्राणि च सन्ति। तेषु एकैकं शास्त्रं तेषामपि एकैकमङ्गं विशालं रहस्यपूर्णं च वर्तते। तेषामङ्गप्रत्यङ्गरूपाणां शास्त्राणां रक्षणं विश्वस्मिन् प्रभावकारि अन्वेषणं च कर्तुं न शक्यते परतन्त्रेण तेन संस्कृतसंस्थानेन, वैदेशिक उदारश्च प्रभूत आर्थिकसहयोगोऽपि न प्राप्तुं शक्यते तेनैव स्वल्पेन रूपेणानेन।

इदानीं नेपाले संस्कृतस्य ईदृशी अवस्था यद् अनादिकालीयं हिन्दूचिकित्साविज्ञानं प्रसिद्ध आयुर्वेदोऽपि स्वीयां दयनीयामवस्थामनुभवति। स्वातन्त्र्येण तदविकासोऽद्य समवरुद्धः। आचार्यकक्षां ततोऽपि अधिकम् अन्वेषणकक्षा (अनुसन्धानीयकक्षा) पर्यन्तं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कवि-समुद्बोधनम् : आचार्यः श्री आनन्द झा

१. मधुमय - नवनीत - भव्य - काव्य - स्नुत स - पूरितमानसा कवीन्द्राः ।
हृदमल - कमलस्थ - देव - देवीचरण - नख - क्षति - नष्टदुष्ट - तन्द्राः ॥

२. नियति - नियमशून्य - मोदमात्रप्रद - निजतन्त्र - रसाढ्य - कर्म - योगात् ।
कविषु ननु भवत्सु सत्सु नैव प्रभवति संशयितं नवं विधित्वम् ॥

३. करबदरनिभं जगत् प्रपश्यद् - विकच - तृतीयविलोचनं दधानाः ।
इह ननु विलसन्ति यद्भवन्तः स्फुटमिव भाति कवेर्नवं शिवत्वम् ॥

४. भवदति - ललितोपदेश - वाक्य - श्रुतिकृत - निश्चयलब्ध - सुव्यवस्था ।
विलसति जनता स्थिरा स्वकृत्ये किमु भवतां न ततः स्फुटं विधुत्वम् ॥

५. कविकुलगुरु - कालिदासमुख्यैः कविनिवहैर्विहिता न किं भवद्भिः ।
शकहतिमुपपाद्य देशरक्षा नृपवर - विक्रम - विक्रमाग्नि - वातैः ॥

६. निजघटक - कवीन्द्र - बाण - वाणीनिवह - विवर्धित - हर्षभूप - हर्षैः ।
किमथ न कविभि - र्भवद्भिरेव प्रतिगत - हूणहतिः कृता महद्भिः ॥

७. व्यवहिततर - विप्रकृष्ट - वस्त्वप्यथ विषयीक्रियते यतो भवद्भिः ।
श्रुतिगत - कविकल्पनां दधानै - विमतिरतो भवतां न हीश्वरत्वे ॥

च तस्य महाविज्ञानस्य पठन-पाठनानुसन्धानक्रमः पूर्वमासीत्, इदानीं स निरुद्धो वर्तते। सोऽपि स्वरक्षकं संस्कृत-विश्वविद्यालयमपेक्षते । नेपाल-संस्कृत-विश्वविद्यालये स्वतन्त्ररूपेण चलिते चिकित्सामहाविज्ञानस्यापि कृते स्वतन्त्रविकासस्यावसरः स्यात् ।

बुद्धदर्शनमपि अत्यन्तं विशालं चतुर्षु संस्थानेषु विभक्तम् । नेपालदेशो बुद्धदर्शनस्य मूलस्थली । तत्र बुद्धदर्शने जातश्रद्धा अनेके देशाः । संस्कृतभाषाज्ञानद्वारेणैव ते बौद्धदर्शने प्रवेष्टुमिच्छन्ति । बुद्धदर्शने पठन-पाठनानुसन्धानव्यवस्थायास्तथा तलस्पर्शिविशेषाध्ययनस्य च व्यवस्थाकर्तृ एकं पृथगेव बुद्धविद्यापीठं नेपाल-संस्कृत-विश्वविद्यालयाङ्गभूतं भगवतो बुद्धस्य जन्मभूमौ विश्वस्य च नैकदेशश्रद्धाभूमौ लुम्बिन्यां तिष्ठतु। अनेनैव प्रकारेण संस्कृत-विश्वविद्यालयस्य अनेकानि संस्थानानि अङ्गानि च भवितुमर्हन्ति ।

भारतसाहाय्येन सङ्घट्टितम् इतिहास-पुरातत्त्वयोः समन्वेषकं महत् संस्थानं वर्तते नेपाले यत्खलु प्राचीनतमानामैतिहासिकानां वस्तूनामन्वेषणं करोति । एतत्संस्थानं नेपाल-संस्कृत-विश्वविद्यालयस्य अङ्गरूपेण चलतु नाम । तथा सति तत्संस्थानं सुष्ठुतया कार्यं कर्तुं प्रभवेत् । संस्कृतसाहित्यं स्वतो विशालं महद्रहस्यपूर्णं च । तत्र साहित्येऽनेकेषामनुसन्धानकक्षापर्यन्तक्षेत्राणां शास्त्र-निवहानां कार्यमेकस्य संस्कृतविश्वविद्यालयस्य कृते न्यूनमपर्याप्तञ्च वर्तते। एतत्सर्वं विचार्य नेपाल - संस्कृत - विश्वविद्यालयः शीघ्रमेव चालयितुं नेपाल - सर्वकारः पुनर्विचारयतु इति प्रार्थये। तस्मै विश्वविद्यालयाय अन्ताराष्ट्रिय क्षेत्रे [illegible]तः शान्तिस्थापनाय अग्रणी भारतदेशोऽ [illegible] दास्यति इत्यपि च कामये।

Digitized by Arya Samaj Foundation Chennai and eGangotri

पूर्वतोऽनुवृत्तम्

सूर्यनमस्कारो व्यायामश्च

—डॉ० नरेश झा शास्त्री—

तथैव १९९५ मिते वैक्रमे वत्सरे सदाचार-शिक्षायाः प्रथमे भागे सूर्यनमस्कार-व्यायामस्य चर्चा वर्तते।[1] अस्मिन् पुस्तके द्वादश नमस्कारैः पूर्णो व्यायामोऽनुमोदितः।

आस्तां तावत्। प्रकृतमनुसरामः—यदर्थं व्यायामोऽयं विधीयते तदारोग्यं मानवानां त्रिषु मुख्यावयवेषु अवलम्बितम्।

(१) प्रथमावयवः—पचनेन्द्रियाणि, उदरम्, यकृत्, प्लीहा, अन्त्राणि।

(२) द्वितीयावयवः—हृत्-फुफ्फुसे।

(३) तृतीयावयवः—यावत् मज्जातन्तुप्रवेशः (Nervous System, पीठ की रीढ़ ?) मस्तिष्कम्, संज्ञारज्जु (Spind cord Solar plaxus)

यथा सूर्यनमस्कार-व्यायामेन एषां त्रयाणामपि अवयवानामारोग्यं जायते, तथा नान्यैर्व्यायामैः। अन्य-व्यायामेषु बह्व्यः असुविधाः भवन्ति। यथा—व्यायाम-शालाभावः, सामग्र्यभावः। अतो नूनं स्वाधीनः सूर्यनमस्कारव्यायाम एव निषेवणीयः।

नमस्काराणां संख्या

साधारणतः स्त्रीभ्यः पुरुषेभ्यश्च कृते नमस्कार-संख्या अवस्थानुरूपा भवति। [illegible]दन्द्रश्च [illegible]

वयः [illegible] विद्दश्य [illegible] सा

८—१२ [illegible]र्यत्रिमूढो [illegible] २५-[illegible]०

१२-[illegible]राम[illegible] [illegible]—१० [illegible]ताप

मु[illegible]नमुख[illegible] [illegible]

[illegible]यामो यथाशक्ति कर्तव्यः।

[illegible]दैतस[illegible]

१ [illegible] पृ० ३।

अस्मिन् व्यायामे अन्ये व्यायामाः पूरकाः। अतो नमस्कारव्यायाम एव श्रेष्ठतरः। स च अष्टभिरङ्गैः साध्यते। यथा—

उरसा शिरसा दृष्ट्या वचसा मनसा तथा।
पद्भ्यां कराभ्यां जानुभ्यां प्रमाणोऽष्टाङ्ग उच्यते॥[1]

अथवा—

जानुभ्यां च तथा पद्भ्यां पाणिभ्यामुरसा धिया।
शिरसा वचसा दृष्ट्या प्रणामोऽष्टाङ्ग ईरितः॥[2]

धर्मशास्त्रेतिहासे[3] पञ्चाङ्गनमस्कारस्यापि चर्चा विद्यते। स च हस्ताभ्यां पद्भ्यां शिरसा च संपाद्यते। दशविध-सूर्यनमस्कारव्यायामे अष्टाङ्गप्रणामः पञ्चमः। अङ्गैः सम्पाद्यमानानां गतिविधीनां चर्चा यथास्थानासनेषु विद्यते, किन्तु 'वचसा दृष्ट्या' इत्यनयोर्विषये विवेचनमावश्यकम्। तत्र दृष्टियोगो यथा—

समं कायशिरोग्रीवं धारयन्नचलं स्थिरः।
संप्रेक्ष्य नासिकाग्रं स्वं दिशश्चानवलोकयन्॥[4]

'वचसा' इत्यस्य विवृतिः सूर्यनमस्कारमन्त्राः। ते च यथा—

(अ) ॐ।[5] (आ) ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः।

---

१. कुमारसंभवम्, ६.९१।

२. संस्कृत हिन्दी-शब्दकोशः (आप्टे) पृ० १२३।

३. म० म० डॉ० पाण्डुरङ्ग वामन काणे कृतः 'धर्मशास्त्रेतिहासः—हिन्दी संस्करणम्, प्रथम-भागः।

४. श्रीमद्भगवद्गीता ६.१३।

५. ओङ्कारश्चाथ शब्दश्च द्वावेतौ ब्रह्मणः पुरा।
कण्ठं भित्वा विनिर्यातौ तस्मान्माङ्गलिकावुभौ॥
(बोधा० धर्म० २.४.१ सूत्रविवरणे)।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

→(इ) सूर्यस्य द्वादशैतानि नामानि मित्राय नमः (जगन्मित्रमित्यर्थः) । रवये नमः (सर्वेभ्यः पूजनीयः) ।[1] सूर्याय नमः (प्रवर्तकः सञ्चालकश्च) ।[2] भानवे नमः (तेजामयः, सौन्दर्यप्रदाता) ।[3] खगाय नमः (इन्द्रियोद्दीपकः) । पूष्णे नमः (पोषणकर्ता) । हिरण्यगर्भाय नमः (वीर्यबलवर्धकः) ।[4] मरीचये नमः (सर्वरोगनाशकः) ।[5] आदित्याय नमः (आदरणीयः) । सवित्रे नमः (सर्वोत्पादकः) ।[1] अर्काय नमः (आदरणीयः) ।[2] भास्कराय नमः (प्रकाशमानः) ।

ऋग्वेदस्य तिसृणामृचां द्वादश भागाः—
(१) उद्यन्नद्य मित्रमहः, (२) आरोहन्नुत्तरां दिवम् ।
(३) हृद्रोगं मम सूर्य, (४) हरिमाणं च नाशय ॥
(५) शुकेषु मे हरिमाणम्, (६) रोपणकासु दध्यसि ।
(७) अतो हारिद्रवेषु मे, (८) हरिमाणं निदध्मसि ॥
(९) उदगादयमादित्यः, (१०) विश्वेन सहसा सह । (११) द्विषन्तं मह्यं रन्धयन्, (१२) मो अहं द्विषते रधम् ॥

यजुर्वेदस्य एकर्चः द्वादश भागाः—१ हंसः शुचिषत् । २. वसुरन्तरिक्षसत् । ३. होता वेदिषत् । ४. अतिथिर्दुरोणसत् । ५. नृषत् । ६. वरसत् । ७. ऋतसत् । ८. व्योमसत् । ९. अब्जाः गोजाः । १०. ऋतजा अद्रिजाः । ११. ऋतम् । १२. बृहत् ।

(क्रमशः)

---

१. सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः ।
—रघु० १.१८ ।

२. सूर्ये तपत्यावरणाय दृष्टेः कल्पेत लोकेन कथं तमिस्रा ।
—रघु० ५.१३ ।

३. माण्डेलाखिलदिक्प्रान्ताश्चण्डांशोः पान्तु भानवः ।
मामिनीविलासः १.१२९ ।

४. हिरण्यगर्भः शिशिरस्तापनोऽहस्करो रविः ।
—आदित्यहृदयम्, श्लो० १२ ।

५. सवितुर्मरीचिभिः ।—ऋतु० १.१६ ।

१. उदेति सविता ताम्रस्ताम्र एवास्तमेति च ।
—काव्यप्रकाशः, ७ ।

२. आविष्कृतारुणपुरस्सर एकतोऽर्कः ।—(शाकु० ४.१)

वेदव्यास-गौरवम् : डॉ० अमरनाथ पाण्डेयः

१. साहित्यसर्वस्वविधानदक्षो व्यासः कवीनां नृपतिर्बभूव ।
तस्य प्रकृष्टैः कविकर्मबन्धैरालौकिता लोकसमर्चिता ये ॥

२. मनीषिलीलालिभिरात्मबोधं राज्ञां चरित्रैर्व्यवहारकोषम् ।
मुनीन्द्रनिध्यातरहस्यरत्नं जग्रन्थ काव्यं जनताहिताय ॥

३. व्यासस्य संयोजनया प्रसन्ना लोकाः प्रशंसन्ति तदीयवृत्तम् ।
ये ये प्रसङ्गा निहिता मनोज्ञास्तेषां गुरुत्वं प्रथितं कथासु ॥

४. वृत्ते महाभारतनामधेये तत्त्वं निगूढं विबुधैर्विमृष्टम् ।
व्याख्याकदम्बैरपि पूजितं यत् तद् भारतं भारतदेशरत्नम् ॥

५. शिक्षाप्रसन्नोक्तिविलासिनीनां दीप्तिः प्रकृष्टाऽविरतं चकास्ति ।
तत्र प्रगीतेषु महत्सु सम्पत् काचित् समिद्धा हृदि भावनीया ॥

६. आचारसन्तानसमेधितानि पर्वाणि लोकेषु [illegible] ।
तेषां विलासः कविवृन्दपूज्यः सृष्टिश्च तेषां [illegible]

७. खिन्नं प्रसादयति बोधयति प्रमुग्धं ज्ञानप्रकाशविततैर्दशति व्यव[illegible]
नीतिं प्रसारयति भेदविधाभिरच्छां तद्भारतं जगति गौरवमा[illegible]

८. भक्तिप्रवाहपरिपूरितदिग्विभागं सद्वृत्तबोधितकवीन्द्रगृहीतका[illegible]
युद्धस्फुरद्भटसमर्चितपादपद्मं व्यासं मुनिं कविगुरुं शिरसा नमा[illegible]

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रूप-दीपिका :: श्री रामानन्द द्विवेदी

४. सन्धि-विचार:

सान्नधो स्युर्गणाध्यक्षः शारदा कमलासना।
ग्रहेन्द्रः सर्वभूतेशो नरोत्तम शुभोर्जितः॥
देवर्षिर्मानवश्चैवं मिथो भावैक्यनन्दिताः।
वनौषधिः सुखार्थाय हरेर्नाम भवौषधम्॥

श्रीहर्यर्चा च हर्याज्ञा हरीच्छा च हरीशिता।
हर्युक्तिश्चैव हर्यूर्जा हर्येकता च हर्यृचा॥
हर्यैश्वर्यं च हर्योजो हर्यौदार्यमिति क्रमात्।
भान्वादयश्च शब्दास्तु सन्ध्यर्हाः स्युः शिशिक्षुभिः॥

श्रीगुर्वर्चा च गुर्वाज्ञा गुर्विच्छा सद्धिताय हि।
गुर्वीशिता गुरूक्तिश्च गुरुहा गुर्वृणं स्मरेत्॥
गुर्वेकता सते स्याद्धि गुर्वैश्वर्यं तथैव च।
गुर्वोज ऊर्ध्वमार्गत्वे गुर्वौदार्यमसक्तियुत्॥

पित्रर्चा पूज्यपित्राज्ञा पित्रिच्छा सत्सुखाय वै।
पित्रीशिता च पित्रुक्तिः पित्रूर्जिता स्वशक्तयः॥
पितॄणधारिता तस्मात् धार्या पित्रेकता सदा।
पित्रैश्वर्यं च पित्रोजः पित्रौदार्यं महत् मतम्॥

धर्मेऽर्थो धर्म आमुक्तिः धर्म इष्टिः धर्म ईश्वरः।
धर्म उत्साहवृद्धिः स्यात् ऋतऊर्जा ऋतयुतम्॥
धर्म एकत्वप्राप्तिः स्यात् धर्म ऐश्वर्यसाधनम्।
धर्म ओजस्तु प्रासव्यः धर्म औचित्यमीरितम्॥

गोऽर्चनं हि गवास्था च गाविष्टिश्च गवीक्षणम्।
गवुत्सवः गवूर्जा च गवृणं च गवेषणम्॥
गवैश्वर्यं गवोकश्च गवौदार्यमुदाहृतम्।
तदंशुमान् तदात्मा च तदिन्द्रश्च तदीश्वरः॥

तदुपेन्द्रस्तदूर्ध्वं [illegible] यजुश्च साम तत्।
तदेको [illegible] तदोङ्कारस्तदौषधम्॥
तत्कृ[illegible] गुरुस्तद् धनेश्वरः।
तन्ङ्क[illegible] तच्चन्द्रस्तच्छंबी रवेः॥

तज्ज्योतिस्तज्झरो वै तट्टकस्तदठक्कुरः स्मृतः।
तड्डयने च पक्षीशस्तड्ढुण्ढिराजरीरितः॥
तत्तपः सर्वभृत्तत्थं तद्देवस्तद्धनुर्धरः।
तन्नारायण उक्तश्च तत्पिता तत्फलाधिपः॥

तद्ब्रह्मा चैव तद्भूभृत् तन्मातृका सुरेश्वरी।
तद्योगेशश्च तद्रुद्रः तल्लक्ष्मी तद्विधायिनी॥
तच्छं तत् षण्मुखो देवस्तद्धरिः सम्प्रकीर्तितः।
रामोऽस्ति राम आस्ते च राम इच्छति शं नृणाम्॥

श्रीराम ईक्षते सर्वान् राम उदेति पूर्णतः।
राम ऊर्जास्ति लोकस्य राम ऋच्छति कोशले॥
स राम एधते लोके राम ऐश्वर्यमेति च।
राम ओजःप्रदाता च राम औदार्यशीलवान्॥

रामः क्रीडति खेलं च रामो गच्छति वै वने।
रामो घोषयते धर्मं रामश्चरति चाश्रमम्॥
रामश्छादयते भक्तान् रामो जयति सर्वदा।
रामष्टीका नृपाणां तु रामो डम्भयते चमूः॥

श्रीरामस्तारयत्याशु रामो ददाति पात्रताम्।
रामो नमति गुरून् सर्वान् राम ᳵ पठति वै श्रुतीः॥
रामो बाधते विघ्नान् रामो मुञ्चति चाश्रितान्।
रामो याति वनं रामो रणे च लभते जयम्॥

रामो विशत्ययोध्यायां रामश्शंसति वै सखीन्।
रामष्षट्पदो भाति भक्तानां हृदयाम्बुजे॥
रामः स्फुरति भावेन रामो हरति खल्वघान्।
रामः क्षात्रगुणोपेतो रामस्त्राता भवार्णवात्॥

रामो ज्ञानं रतिं दत्ते जना अचरिता मुदाः।

सन्धिः

माहेश्वरैर्हि सूत्रैश्च प्रोद्घाटयाः नियमा बुधैः।
उदाहरणरीत्येह क्रमात् स्वल्पमुदीरितम्॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१. अइउण् । २. ऋलृक् । ३. एओङ् । ४. ऐऔच् । ५. हयवरट् । ६. लण् । ७. ञमङणनम् । ८. झभञ् । ९. घढधष् । १०. जबगडदश् । ११. खफछठथचटतव् । १२. कपय् । १३. शषसर् । १४. हल् । इति माहेश्वराणि सूत्राणि अणादिसंज्ञार्थानि ।

स्वरसन्धिः

१. दीर्घसन्धिः

सवर्णे अचि परे चाको दीर्घादेशः सकृद्भवेत् ।
गणाध्यक्षो गिरीशश्च भानूदयस्तथैव च ॥
रामार्थाय रमार्थाय रामाज्ञया रमाज्ञया ।
गिरीशश्च भवानीशो हरीच्छया सुधोच्छया ॥
विधूदयो लघूर्मिश्च भूद्धवं भवेद् वधूत्सवः ।
अको दीर्घं सवर्णेऽचि चैवं पितृणमीरितम् ॥

२. यण्सन्धिः

इकः स्थाने च यण् स्याद्धि संहितायामचि त्विह ।
हर्यर्चनं च गुर्वाज्ञा पित्रादेशो यथाक्रमम् ॥

३. अयादिसन्धिः

क्रमादेचोऽयवायावश्च स्युरचि परे सति ।
शयनं भवनं चैव नायकः पावको यथा ॥

४. गुणसन्धिः

अचि परे ह्यवर्णात्तु स्यात् पूर्वपरयोर्गुणः ।
अदेङ् हि गुणसंज्ञः स्याद् योगेशः पुरुषर्षभः ॥

५. वृद्धिसन्धिः

स्यादादेचि परे वृद्धिरेकादेशः प्रतिष्ठितः ।
आदैच्च वृद्धिसंज्ञः स्यात् कृष्णैकता भवौषधम् ॥

६. पूर्वरूपसन्धिः

अन्त्यादेङोऽति पाश्चात्त्ये पूर्वरूपः प्रतिष्ठितः ।
यथा प्रयाणकालेऽपि हृष्टोऽन्तः दुःखहो भवेत् ॥

व्यञ्जनसन्धि (हल्सन्धिः)

१. श्चुत्वसन्धि (स्तोः श्चुनाश्चुः)

सकारस्य तवर्गस्य शकारश्च चवर्गतः ।
शकारश्च चवर्गः स्तो योगे सच्चित् मनश्च तत् ॥

२. जश्त्वसन्धिः (झलां जश् झशि, झलां जशोऽन्ते)

झशि परे झलां जश् स्यात् पदान्तेऽपि झलां जशः ।
बोद्धव्यं लब्धिवत् पूर्वं वागीशवदपरं तथा ॥

३. अनुनासिकसन्धिः (यरोऽनुनासिकेऽनुनासिको वा)

यरोऽनुनासिको वा स्यात् पदान्तरस्यानुनासिके ।
वाङ्मयं षण्मुखश्चैव चिन्मयस्तदुदाहृतम् ॥

४. चर्त्वसन्धिः (खरि च, झयो होऽन्यतरस्याम्)

हृत्स्थमुत्थानवच्च स्युः खरिपरे झलां चरः ।
तद्धि पूर्वसवर्णः स्याज्झयः परस्य हस्य वा ॥

५. तोर्लि-सन्धिः

तवर्गस्य लकारे च परसवर्ण उदीरितः ।
तल्लीनतां बृहल्लीलां श्रद्धावांल्लभते भुवि ॥

६. ष्टुत्वसन्धिः (ष्टुनाष्टुः, चोः कुः)

ष्टु स्याच्च स्तोः ष्टुना योगे हृष्टः प्रवेष्टितो यथा ।
चवर्गस्य कवर्गः स्यात् पदान्ते झलि मुक्तवत् ॥

७. ङमुट्-सन्धिः (ङमो ह्रस्वादचि ङमुण्नित्यम्)

ह्रस्वात्परे ङमन्ताद्धि पदात्परस्य वै ह्यचः ।
स्याद् ङमुडागमो नित्यं कुर्वन्नपि पदं यथा ॥

विसर्गसन्धिः

१. विसर्गसन्धिः (विसर्जनीयस्य सः)

खरि विसर्जनीयस्य सः स्याद् विकाररीतिशः ।
विष्णुस्त्राता हरिश्चन्द्रो धनुष्टङ्कार उक्तयः ॥

२. रेफलोपसन्धिः (वा शरि, रोरि)

शरि विसर्जनीयो वा हरेश्शयः हरेः शयः ।
रेफे लोपस्तु रेफस्य धार्तराष्ट्रा रणे यथा ॥

३. यत्वसन्धिः (भोभगोअघो अपूर्वस्य योऽशि)

रोर्यादेशोऽशि भूयाद् भो अपूर्वस्य भगो अघो ।
यस्य लोप हलि स्याच्च यच्छ्रेय एतयोर्यथा ॥

४. विसर्जनीयसन्धिः (खरवसानयोर्विसर्जनीयः)

पदान्तस्य रेफस्य विसर्गः स्यात् परे खरि ।
समः सिद्धावसिद्धौ च कृत्वापि न निबध्यते ॥

५. षत्वसन्धिः (इदुदुपधस्य चाप्रत्ययस्य)

अप्रत्ययविसर्गस्य स्यादिदुदुपधस्य षः ।
नैष्कर्म्यं निष्कृतिश्चैव [illegible] दाहृताः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रेडियो-दूतम् : : खण्डकाव्यम

– श्री पद्मानन्द चतुर्वेदी –

[एम० ए०, साहित्याचार्यः]

२.

वेणीपद्म - गदादि - शंखविदितं श्रीमाधवं माधवं, कामारिं शशिशेखरं भयहरं सिद्धेश्वरं पाण्डुकम् ।
द्रष्टुं पूजयितुं व्रजन्ति परितो भक्ता जना मन्दिरे, सम्पूर्णे रुचिरे प्रयागनगरे देवस्थली वर्तते ॥२२॥

भक्ता यत्र समष्टिपूजनविधिं कुर्वन्ति पुण्यां तिथौ, एकान्तेषु पवित्रभावविधिवत्सन्मृत्तिकानिर्मितः ।
भेरीशंखमृदङ्ग - वाद्यध्वनिभिः संस्तूयमानः पुनः, आविर्भूतशिवस्य कोटिगणना गङ्गातटे उत्तरे ॥२ ॥

प्राचीने समये रिपून्निजजयोल्लासैः समाक्रम्य ये, धर्मिष्ठाश्च दशाश्वमेधक्रतुभिस्तीरं पवित्रीकृताः ।
तेषां धार्मिकभावनापरिचिते गङ्गातटे शान्तिदो, दारागञ्जविनिर्मितो गजमुखोपान्तेऽस्ति घट्टः शुभः ॥२४॥

गङ्गायाः पूर्वभागे ऋषिजनविदितं वारणावत्प्रदेशं, तत्रोपान्ते विचित्रं कुरुजनरचितं दुर्गमेकं प्रसिद्धम् ।
वासार्थं पाण्डवास्ते परिहृतविभवा आगतास्त्राणहेतो-र्दासीपुत्रेण लाक्षागृहकृतरचना बोधिता रक्षणाय ॥२५॥

अत्रैवास्ते निखिलनिगमाक्रान्तविद्यो महर्षिः, भारद्वाजः कुलपतिपदे यः प्रतिष्ठापितोऽभूत् ।
विद्यार्थीषु विविधविषयज्ञानभाव विधास्यन् दाक्षिण्यं दुष्टवृत्तं सुरसरिनिकटे रावणारिं बुबोध ॥२६॥

विश्व-विद्यालयानामयमग्रणीः, आर्ट-साइंस-भाषासु पाठ्यक्रमः ।
डाक्टरेञ्जीनियर-काष्ठशिल्पादिकः, पाठ्यते पाठशालासु विज्ञैर्जनैः ॥२७॥

धर्मज्ञानोपदेशाख्य - विद्यालयः, सिद्धपीठः श्रीहरदेवनाम्नो गुरोः ।
यत्र निष्णातविद्यो मदनमोहनः, एवमन्येऽपि छात्राः प्रसिद्धास्तताः ॥२८॥

संस्कृताध्येतॄणामत्र विद्यार्थिनां, वास-शिक्षाप्रदानाय विद्यालयाः ।
सन्ति ये प्राज्ञ-प्राध्यापका भारते, वेदवेदाङ्गशिक्षां मुदाऽशिक्षयन् ॥२९॥

प्राज्ञस्य श्रीरामचरित्रनाम्नो द्विवेदिनः पाठनपद्धतिर्वरा ।
अद्यापि तच्छिक्षितबन्धुवर्गाः, प्रभातकाले सततं नमन्ति ॥३०॥

[illegible] गङ्गाप्रवाहोर्मि संशोषयन्, सूर्यकन्या मिलन्ती रहस्यं दधौ ।
[illegible]ारस्वती-नीरशोभावृता, हर्षफुल्ला त्रिवेणी प्रसिद्धिं गता ॥३१॥

[illegible]त्तरस्थै-र्जनैः संकुला, तीर्थराजस्य भूमिः पवित्रा मता ।
[illegible] कुम्भोत्सवे भिन्नधर्मा जना भारतीं संस्कृतिं वीक्ष्य मौग्ध्यं गताः ॥३२॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पूर्णाहुतिः—महाभारतीयं नाटकम्

——कविवरः श्री कृष्णप्रसाद घिमिरे—

प्रथमोऽङ्कः

इत्थं सममेव समेधमानानां कलिमलनिरसन-शीलानां तासामेव खुरेभ्य उद्गतानां रजतां विशुद्धो राशिरयमागतोऽस्मानपि पवित्रीकरणार्थम्। (स्वगतम्) धन्यमेवैतत् सुदिनमपि। यस्मिन् दिने जगन्नियामकस्याऽस्यैव शुभाज्ञां समादाय गोकुलं गतः सन्देशवाहकस्वरूपेण तदैव धन्य आत्म तासां पवित्रकीर्तिशालिनीनां गोकुलनिवासिनीनां गोपवधूनां श्रीचरणारविन्दसमुद्भूतरजसा संप्राप्तस्नानमात्रेण। पश्चात् पुनर्मथुरायामेतस्यैव भगवतोऽन्तरङ्गलोलासखानां गोपालबालकानां लोकोत्तरानन्दजनकं यद्व्रजःस्नानं समासादितं द्वितीयवारम्। तदेतत् तार्तीयकमासां सुरभीणां खुरसमुद्गतरजःस्नानम्। तद्धन्योऽस्मि। जातं जीवनसाफल्यम्!

(चित्रवद्भवति। यस्येदृशीमवस्थामवलोक्य सर्वेऽपि

सुजावननामकः श्रीशः वसन् कालिन्दिधारायाम्। विधत्ते जान्हवीशोभां, यदा क्षोण्यां समागच्छत् ॥३३॥
अरैले वल्लभाचार्यस्य पीठं यत्र सोमेशम्। त्रिवेणीं प्रेक्ष्य वटवृक्षं सदा भक्ताः प्रमोदन्ते ॥३४॥
यदाऽभूद्वारणावन्नामको देशः प्रयागोऽयम्। कुरूणां पाण्डवानां भिन्नधर्माणाञ्च सञ्चारः ॥३५॥
विशिष्टाद्वैत - द्वैताद्वैत - माध्वैकत्वरूपाणाम्। अशोकस्तम्भदुर्गाणां पुराणत्वं चिनोत्येषः ॥३६॥
यदा निर्वासितः खुशुरू स्वमुस्लिम-बन्धुसेवाभिः। प्रयागे जीवनान्ते प्राप्य स्थानं लब्धवान् भूमिम् ॥३७॥
यवनकालीन-खुशुरूद्यानशोभाक्रान्तपरिखाभिः। अमीरखुशुरोः कृतित्वं शास्त्रविज्ञत्वं स्फुटं लोके ॥३८॥

दक्षिणे भिन्नचेष्टापराः यात्रिकाः मानवानां हिते कार्यलग्नास्तताः।
जीविकासाधने दत्तचित्ता जनाः आत्मतुष्ट्यैव कार्यं सदा कुर्वते ॥३९॥

अठारहसौ सतावन ईशवीयाब्दे प्रयागेऽस्मिन्। अनेके देशभक्ताः चत्वरे फांसी-पदं प्राप्ताः ॥४०॥
भारतीयान् वणिक्वृत्त्या शासनं कर्तुं कुचेष्टाः। मूर्खगौराङ्गा मनुष्यान् "राष्ट्रद्रोही" कथितवन्त ॥४१॥
अद्भुतं किमतः परं वंशावली नो भारतीया। वर्णसङ्कर नामधेयाः शासका स्युः राष्ट्रभक्ताः ॥४२॥
भारते हिन्दू-यवनशासकरहस्यं भेदयित्वा। भेदनीत्या शत्रुतामुत्पाद्य गौराङ्गाः प्रसन्नाः ॥४३॥

बिडालिका - न्यायपरम्परातः स्वयं स्वरूपं विनियोजयित्वा।
विधाय दुर्नीतिविधानपद्धतिं बभूवतुस्ते शुभन्यायकांक्षिणः ॥४४॥

अष्टदशसत्तावने परतन्त्रता-दुःखस्य बीजम्। सैनिकानां मनसि जातः प्रथम[illegible] मूलम् ॥४५॥
करपट्टिकासार्धं कमलपत्रस्य सङ्केतः प्रचारे। क्रान्तितिथिरपि निश्चितासीत् परं[illegible] ॥४६॥
पाण्डेयोपाधि-मङ्गलनामकस्य प्रथमगुलिका। मङ्गलाय बभूव क्रान्तेस्तेन [illegible] ॥४७॥

[illegible] प्र[illegible]शः)
[illegible]गव हि[illegible]

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समासदो भक्तिरससिन्धौ अवगाहमानाः प्रतिमावद्वितिष्ठन्ते। तावदेव सभागृहद्वारादागतो द्वारपालो दृश्यते। स च नितरां विनीतो भूत्वा मध्येसभं प्रविशति। ततश्च सुचिरं पृथिव्यां दण्डवन्निपतितं स्वशरीरं पूर्वभागतः समुत्थाप्य उभौ हस्तौ बद्ध्वा आवेदयतीत्थं भगवते वासुदेवाय।)

द्वारपालः—भगवन् ! अदृष्टपूर्वः कश्चिन्मनुष्यो भगवतो भवतः श्रीचरणारविन्दयोर्दर्शनं प्राप्तुकामोऽधितिष्ठति सभागृहद्वारम्। यदाज्ञापयति तत्र भवान्।

भगवान्—(ईषद्विहस्य) अदृष्टपूर्वाणां सुदर्शनमपि भविष्यति जगद्धितकारि, भविष्यति च जगन्मनोहारि, यदि ते तादृशा उदाराः सद्धर्मकर्मनिरता भविष्यन्ति चेत्। तत्सादरमानीतव्योऽसावागन्तुकः।

(द्वारपालः सभक्ति प्रणमन्निःसरति।) ततोऽयं लोकोत्तरघटनासङ्घटनशीलो महाविनोदी विभुर्भगवन्तं श्रीरामं समीक्ष्य 'प्रतीक्ष्यचरण ! समुपयुक्तोऽयं समयः सन्निकृष्टः सञ्जात" इति स्वेङ्गितेनैव तं विज्ञापयति। पुनः सभ्यान्निरीक्ष्य।)

पूज्याः सभ्याः ! ह्योभूते ब्रह्मज्ञानप्रसङ्गे असमाप्तावेव तत्प्रस्तावसमाधाने कार्यवशात् पूर्वमेव सभाभवनतो विनिर्गतोऽहमासम्। तदस्मिन् विषये महात्मानं विधिकल्पं प्रज्ज्वलितसद्ब्रह्मज्ञानैकतत्त्वं विनिवेदयामि स्वामेतद्वैषयिकीं विजिज्ञासां निरसनोत्सुकोऽहं 'तदस्य कीदृशः सञ्जात उपसंहार इति'। तद् दयन्तां तत्र भवान् भगवान् मुनिराजः। (इति स्वशिरो नमयति भगवान्।)

गर्गाक्षः—(किञ्चिद्विहस्य) तादृश एव सञ्जातः प्रभो ! यादृशो भवतां तत्र महात्मनां स्वकर्मणैव आप्तसमस्तप्राप्तव्यानां सैद्धान्तिक आसीत्, यश्चैभिर्मुनिवरैर्महात्मभिश्च स[illegible]शं सुपालितः संमानितोऽनुसृतश्च[illegible] पश्यन्) अस्माभिरपि तदेतेनैव[illegible]णि सुखदुःखादिद्वन्द्वजालानि [illegible]तद्वति व्यक्तिमात्रे निप-

तन्तीति भावनया सम्यङ् निरूप्य तदस्मिन् विश्वचक्रपरिभ्रमणेऽग्रे गन्तव्यं स्वात्मनः कृतकर्मफलादिकं सम्भोक्तुं प्राप्तुं च तत्रैव स्वलक्ष्यम्। विषयस्याऽस्यैव सच्छिक्षणमस्माभिः सम्प्राप्तं जीवन्मुक्तेभ्यो मनुमहाराजप्रभृतिभ्यः। तद्यथा—

येनाऽस्य पितरो याता येन याताः पितामहाः।
तेन यायात् सतां मार्गं तेन गच्छन् न रिष्यति॥

(स्वपार्श्वे संस्थितं भद्राक्षाऽभिधेयमन्यं मुनिं समीक्ष्य)

किं मुनिवर ! सत्यमेतन्नो वा ?

भद्राक्षः—(सुप्रसन्नमुद्रम्) सत्यं भगवन् ! सत्यमक्षरशः। एतदेवाऽस्माकं जीवनजीवनं तद्रसायनं तदाधारश्च।

भगवान्—(संलापक्रममन्यतो नयन्, सभ्या इमे पुण्यश्लोकानां तेषां सन्मार्गं कथमनुसरन्ति ? कीदृश्यस्ति तेषां विषये चैषां सुदृष्टिरिति विविदिषुः स्वां विजिज्ञासां निदर्शयन्) तथा चेन्मुनिराज ! ह्यस्तनविषये प्रचलति वर्तमान एवमपि तदुदाहरणार्थं निर्दर्शितानां सुपवित्रकीर्तिशालिनां महाराजानां नल-हरिश्चन्द्रादीनां जीवनचरित्रं किमर्थं तथाविधं मुनिर्दयं प्राकृतजन्तूपमं सञ्जातमित्यस्मिन् विषये मुनिवराणां तत्र भवतां को विचारः ? तदहं श्रोतुं समिच्छामि। उपदेश्यतां तावदेष जनः।

(सर्वेऽपि सभ्याः औत्सुक्येन मुनिवरस्य गर्गाक्षस्य मुखं समीक्षमाणा वितिष्ठन्ते)।

गर्गाक्षः—(श्रद्धासुरतिसञ्जातावेशवशात् स्वासनादेवोत्तिष्ठन्) अलमलं वासुदेव ! नाम्नैव जगत्पवित्रीकरणक्षमानां महामहिम्नां तेषामुदारश्रवसां महात्मनां पवित्रतरेषु सच्चरित्रेषु यदस्माकमेकमात्रम् आराध्यमाधारभूतञ्च वरीवर्ति, मा दोषदृष्टिं व्यधाः। एतेनाऽपि न आत्मनोऽसह्यनरकयातनां प्रापयति। स्मृतं त्वया नाथ ! तद्गतप्राणानस्मात् त्वद्रूप-गुण-लीला-स्मरण-कीर्तन-मननादयो नयन्ति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वस्थानं ददति च स्वेप्सितं लोकान्तरान् लोकोत्तरानन्दादींश्च ते तद्विधेषु तेष्वपि तादृश्यपेक्षा नास्ति यादृशी वरीवर्ति तेषां पवित्रकीर्तिशालीनां त्वच्चरणप्रेमिणां स्वादर्शभूतेन सत्कर्मादर्शनेव लोकानलोकान् दिव्यलोकांश्च प्रापयमाणानां तेषां महाराजानां सच्चरित्रेषु ।

(सगद्गदम्) शृणु भो भगवन् ! पुनस्त्वमीदृशोऽसि, यद्विधोऽसि, यादृशोऽसीति दृढं निरूप्यैव विमृश्यैव सुगृहीतोऽस्माभिः संसारचक्रभ्रमणभ्रामितमतिभिः । यतो हि त्वमस्माकं हृदयगह्वराद् दहररूपादपसर्तुमसमर्थः स्या इति । दत्तावधानो भव विभो ! मर्त्यलोकस्थैरेभिर्मुनिभिश्च किमन्यैः प्राकृतैस्तु स्वानेकजन्मतः सदुपार्जितैः सद्भावनासुभावनाजन्यसस्कारैः अतर्क्यशक्तिसमन्वितैः स्वलीलाविहारधन्ये त्वयि निरन्तरं संरममाणं स्वं मनः सम्पाद्य नैकविधेषु सन्मार्गेषु स्वोचितमन्यतमं सत्पथमवलम्ब्य विभिन्नलोकान्तरेषु समागतानां नैकविधानामसह्यरूपाणां तत्तत्संकष्टानां बहुविधरूपाणि फल्गून्यपि आत्मन्यनुभूय स्वतीव्राभ्यासयोगात् तीव्राकाङ्क्षावशात् तत्संस्कारपरिपाकाच्च स्वे पुण्यापुण्ये निरस्य सच्चिदानन्दधाम्नस्तव तदास्थानसीमानं सुदृढं कष्टेनैव ।

ततोऽपि महाकष्टतः किञ्चिदग्रे गत्वा स्वं च तत्रैव प्रवेशयित्वा त्वच्चरणान्तिकं सम्प्रातुं पञ्चाशन्मात्रसंख्याका निःश्रेण्योऽवशिष्टा भवेयुः । तास्वपि कतिचिदारोहिताः कतिचिदेवाधिरोहितव्या दृश्येरन् । तस्यामेवाऽवस्थायां किं त्वं तत्रैवाऽऽगत्य अलमलमेता अवशिष्टा निश्रेण्यो नारोहितव्यास्त्वया, सहायभूतेन मयैव व्यतिक्रियन्ते, धन्यस्त्वमित्यभिधाय आरोहमाणं तं सत्साधकं निरुद्ध्य किं त्वं नयसि सच्चिदानन्दकं तत् स्वधाम ?

किं भो वञ्चक प्रभो ! संपश्येमां स्वदयालुताम् । संप्राप्ताऽक्रूरसहायोऽपि त्वं सञ्जातोऽसि ईदृशः क्रूरतरः ! शृणु भो महात्मन् ! यदि कश्चित्तादृशोऽनन्यपरकः साधकः स्वेनैव सत्कर्मणा ता ऊनपञ्चाशन्निःश्रेणीः अध्यारुह्य यदैव पञ्चाशन्निःश्रेण्यां संस्थापित - स्वचरणोऽग्रे जिगमिषुर्दरीदृश्यते तदैव तादृशस्त्वमपि स्वां तादृशीं दयालुतां दर्शयन् तं तदोप्सितं स्थानं प्रापयिषुः स्खलद्गतिं गत्वा परिष्वज्य च तं हृदयोपपीडं तत्स्वात्मैक्यं प्रददासि नो वा ? तत्पश्य इमामात्मनो विराजितां स्वदयालुताम् !

धिक् कष्टम् । ईदृशोऽसि त्वं निर्दयः पाषाणहृदयश्च शङ्कर ! शङ्कर !!

(इत्युक्त्वा वर्षाधारा यथा स्वनेत्राभ्यामश्रूणि पातयित्वा)

तद्वद भो मायिक ! किं त्वयाऽत्र तत्परिष्वजनार्थानागमने साधकोऽसौ तत्स्वेप्सिततमं स्थानं सम्प्राप्तुं शक्नोमि वा न तदवस्थायाम् ? यद्वा पतति तत एव स तदन्धे तमसि महागर्ताभिमुखं गतः कश्चिन् मदान्ध इव ? कथय रे बकारे ! एवंविधे युष्मदस्मत्सम्बन्धप्रपञ्चे विदृश्यमाने कः सम्बन्धलेशस्त्वय्यपि मायिकशिरामणौ अस्माकम् ? ब्रूहि भो भगवन् !

(भगवन् तु श्रुत्वैव तत्सर्वं स्वात्मानन्दानुभवेन अलौकिकेनानन्दयता आत्मानं समुच्छलद्धृदयो निःशङ्कं गर्गाक्षमुखं विलोकमानोऽवतिष्ठते । मुनिः पुनरपि सैद्धान्तिकं स्वाभिप्रायं तदत्र कर्तव्यञ्च सभ्यान् निर्दिशन् जल्पति)

तदित्थं विनिर्लज्जस्त्वमपि पीताम्बराऽवगुण्ठितगात्रोऽपि तिरस्कृतस्वागतभक्तपात्रः । स्वात्मनो लीलाविहारार्थं स्वमनोविनोदनार्थं सम्प्राप्तसमयांस्तादृशानेव आरूढपञ्चाशन् - निःश्रेणिकान् व्यक्तिविशेषान् साधकांश्च उद्धर्तुकामः समये समये त्वमेकोऽप्यनेको भवसि ऊर्णनाभिरिव स्वविहितस्वेप्सितचेष्टो नित्यं विहरसीत्थंरूपेण ।

(सभ्यानुद्दिश्य सम्बोध्य [illegible] गा [illegible]

- सभ्या महानुभावाः [illegible] मुख्यं [illegible] र्मकराकारणम् । शृण्वन्तु शास्[illegible] गव हि [illegible]

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्तत्परश्च महानुभावाः। तदत्राऽस्माकं कर्मैव मुख्यं कारणम्। कर्मप्रधानाः सभासदो! मयोक्तमेतमेव विषयमवलम्ब्य युधिष्ठिरादीनन्यान् मुनींश्च तत्तत्त्व-मुपदेष्टुकामोऽसौ वृद्धोऽस्मत्प्रतीक्ष्यचरणद्वन्द्वो भीष्म-पितामह इममेवोद्दिश्य वदति स्म पुरा प्रतिकल्पं यस्याऽऽसीत् कर्मयोग योग एष स्वेष्टतम ईश्वरो नान्यद् यद् (भगवन्तं वासुदेवं हस्तेन निर्दिश्य) तत्सभा-सदः परिचितसत्तत्वा विधित्सुः निर्दर्शितमासीद् अस्यैव ईदृशमतर्क्यं वाचां मनसां च परं तन्महत्त्वमास्ते।

सर्वात्मनः समदृशो ह्यद्वयस्याऽनहंकृते।
तत्कृतं मतिवैषम्यं निरवद्यस्य न क्वचित्॥

तस्माद्वयमपि तथाविधेऽस्मिन् सद्गतौ परतत्त्वा-भिधेये सत्कृतं स्व कर्मैव सर्वश्रेष्ठतरमात्मोद्धार-साधनं चेति मत्वा तादृशानां पवित्रकीर्तिशालिनां महात्मनां ब्रह्मर्षि - देवर्षि - राजर्षिप्रभृतीनां तादृशं सुचरित्रमेव स्वलक्ष्यप्राप्तौ एकमात्रं निदानमादर्श-स्वरूपञ्चेति विभाव्य कर्मयोगस्यैव सुपथाऽग्रे गत्वा पश्चात्तत्रैव सम्प्राप्तं निवृत्तिपरकं सन्मार्गमवलम्ब्य स्वस्वरूपावलम्बनं कर्तुं शक्नुमश्चेद् आत्मना आत्मान-मेव विज्ञातुं पारयामश्चेद् (सप्रौढम्) आत्मन इयत्तां यया अनेनानेकानां ब्रह्माण्डनिकायानां कार्यक्रमः सुचारुतया सञ्चालितो विद्योतते सम्यक्तयाऽवबोद्धुं समर्थाः प्रभवामश्चेत् तत्रैव निदि-ध्यासनादिभिः प्राप्तव्योऽसौ परात्मा अधुनाऽमुना दासीकृता वयमिवाऽस्माकमाज्ञानुसारी संभविष्यति च सोऽयं भगवान् स्वयमेव। नात्र किञ्चिदनुभूयते-ऽस्माभिर्विचिकित्सालेशोऽपि। तदास्तां तावद्, गच्छाम्यह-मधुना। अस्तु सर्वतोभद्रं युष्माकम्।

(इति समाभाष्य सभ्यान् अमुष्य भगवतः स्वरूपं स्वनेत्र-मार्गतो विधाय स्वहृद्गुहागतं तत्रैव आत्म परमात्मनोरैक्य-मनुभवन् निमील्य स्वनेत्रपुटैः सभागृहाद्विनिसरति। सर्वेऽपि सभ्याश्चित्रगता इव विदृश्यन्ते। भगवांश्च मुनेर्गमनं निरीक्ष्य माणः किंकर्तव्यविमूढो भूत्वा तथैव वितिष्ठते। इतो भग-वान् बलरामः स्व... ...वमेकधैव तथाविधायां समितौ तथा मुनिमुखाद्विनि... श्रुत्वा च सर्वं सुविस्तृतं "प्राप्तं ...तस्य ... फलं त्वये"ति भावेन भगवन्तं श्रीकृष्णं समीक्ष्य बोधयित्वा च तत् स्वेङ्गितेनैव मध्येसभं सन्तिष्ठते।)

भगवान्—(एतदन्तरा भद्रासनादुत्थाय मुनिमभि धावन्) मुनिराज! मुनिराज! (समीपं गत्वा तच्चरणौ प्रगृह्य) यदि मत्तः कश्चिद्विषयश्च्युतश्चेत् क्षम्यताम्! क्षम्यतां भगवन्!

गर्गाक्षः—(किञ्चिद्विहस्य तं स्वपादत उत्थापयन् सोद्गारम्) नहि नहि अच्युत! कथं त्वं च्युतो भवसि नाथ! सत्यं त्वमेवाऽच्युतोऽसि केवलः। कुतश्च्युत इति कथ्यते? परं तदत्र सांसारिकदृष्ट्या त्वद्गतभक्ति-रतिवशादित्थं ब्रुवन्तो वयमेव च्युताः स्मः इत्थम्। तदनुचितकार्यव्यग्रान्न एव क्षमस्व विभो!

भृशं विमूढा वयमत्र सद्गतिं
त्वां प्रार्थयामो बहुधाऽकृतक्रियाः॥
अहंममाद्यैः कृतकिल्बिषैश्च तै-
र्यद्भामिता स्तो भ्रम एष यच्च्युताः॥

तदच्युत भगवन्। एनमपि सहैव नीत्वा स्वस्थान-मधितिष्ठतु तावद् भवान्। गतोऽहमात्मना आत्मन्येव आत्मानं त्वां सम्प्राप्तुं प्रयतनार्थम्।

(इत्युक्त्वा कृष्ण-कृष्ण!! इत्यक्षरद्वयं स्वहस्तस्थ-तुलसीमालया संख्यापयन् द्वारकापुर्या एव बहिर्निःसरति।)

(ततो विनिवृत्य सभागृहद्वारादेव सभासदां तादृशो-मवस्थां तत्स्मृतिश्च विस्मृतिगर्भं नेतुकामो योगमायाया अलौकिकीं जगद्विमोहिनीं शक्तिं विक्षिपन् प्रयुञ्जंश्च तां स्वभद्रासनमध्यारुह्य सभ्यान् सस्मितं समीक्ष्य—)

भगवान्—क्व गतोऽसौ द्वारपालः? किमर्थं नाऽद्यापि समागतः?

श्रीरामः—(किञ्चिन्मधुरं विहस्य) आयुष्मन्! सोऽपि स्वयैव शक्त्या ताः पञ्चाशन्निःश्रेणीरारुह-न्नेवास्ते वेति मन्ये।

भगवान्—(स्वगतम्) हा धिक्! अत्रापि योग-माया विफलैव सञ्जाता। कृतोऽस्मि स्वहस्तगत एव एभि रुदारात्मभिर्महानुभावैः। किं वा कुर्याम्? किंकर्तव्यविमूढ इवाऽस्मि सञ्जातः। शङ्कर! शङ्करः! (इति स्वेष्टमन्त्रं जपन् सन्तिष्ठते)। (क्रमशः)

वस्था

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मानस-भारती : देवगिरा गुम्फितं मानसम्

—श्री जनार्दन गङ्गाधर रटाटे, एम० ए० साहित्याचार्यः—

शम्भोः प्रसादाद्धृदये सुमतिस्तस्य काशिता।
तुलसी रामचरितमानसस्य कविस्ततः॥
य इदं विदधात्येव सुरम्यं तु यथामति।
तथापि सुजनाः श्रुत्वा सुचित्तेन विशोध्यताम्॥
सुमतिर्वसुधा चित्तं तत्रागाधं स्थलं मतम्।
वेदाः पुराणान्युदधिः साधवो जलदास्तथा॥
ते वर्षन्ति वरं वारि रामस्य सुयशो ध्रुवम्।
मधुरं सुमनोहारि तथा मङ्गलकारकम्॥
यद्वर्णयन्ति सगुणां लीलां रामस्य साधवः।
तदेव वारिणस्तस्य स्वच्छता मलनाशिनी॥
अवर्णनीया रामस्य या प्रेमाभक्तिरुच्यते।
सैवास्य स्वादुता नूनं तथा शीतलता शुभा॥
तद् वारि सुकृताख्याय शालये हितकृन्मतम्।
रामभक्तजनेभ्यस्तु नूनं जीवनमेव तत्॥
तद्वारि पावनं प्राप्तं मेधारूपां वसुन्धराम्।
सञ्चीय प्राचलत् कर्णमार्गेण च शुभेन तत्॥
स्थले सुमानसे श्रेष्ठे प्रपूर्य स्थिरतां गतम्।
चिरायितं तत्सुखदं शीतं रुचिकरं तथा॥

वरं सुरम्यं मतितो विचार्य,
न्यवेषि संवाद - चतुष्टयं यत्।
अस्यास्ति तद्घट्टचतुष्टयं सत्,
पूतस्य कान्तस्य सरोवरस्य॥ ३६॥

सप्तकाण्डप्रबन्धाः सत्सोपानान्युत्तमानि च।
मनः प्रमोद्यते येषां ज्ञानाक्षिभ्यां निरीक्षणात्॥
बाधहीनं निर्गुणञ्च महिमानं प्रभोस्तु यम्।
वर्णयिष्ये स एवास्य वार्यगाधं वरं हि सः॥
वारिपीयूषसदृशं श्रीसीतारामयो - र्यशः।
उपमाश्च तरङ्गाणां विलासोऽस्ति मनोरमः॥

कोमला चारु - चौपाई सघना पद्मिनी मता।
युक्तयः शुक्तयश्चात्र मञ्जुमुक्ताजनिप्रदाः॥
छन्दांसि सोरठा दोहा मञ्जुवृत्तानि यानि सत्।
तान्येव बहुवर्णानि भान्ति पद्मकुलानि तत्॥
औपम्यरहितोऽर्थः सुभावो भाषा च शोभना।
त एव केसरः पुष्परस आमोद उत्तमः॥
सुकृतानां समूहस्तु भृङ्गानां मञ्जुमालिका।
ज्ञानं विरागो रुचिरो विचारो मानसौकसः॥
ध्वनि - वक्रोक्ति - कविता - गुणपुञ्जाश्च ये स्थिताः।
ते सर्वे मञ्जुला मीना विविधा वारिगा मताः॥
धर्मार्थकाममोक्षाख्याः पुरुषार्थाश्चतुर्विधाः।
ज्ञान - विज्ञानयोर्यच्च वर्णनं सुविचारितम्॥
रसा नव जपस्तद्वत् तपो योगविरागकौ।
सर्वे वारिचरास्तेऽस्मिंस्तडागे रुचिरे ध्रुवम्॥
पुण्यात्म - साधु - सन्नाम्नां गुणानां गायनानि तु।
विचित्र वारि - विहगकुल - सादृश्यवन्त्यदः॥
सतां सभाऽमुं परितः सहकार - घनावलिः।
ऋतुराज - वसन्तेन समा श्रद्धा प्रकीर्तिता॥
विधानैर्विविधैर्भक्ते बहुधा सुनिरूपणम्।
क्षमा दया दमश्चैव वितानं वीरुधां मतम्॥
शमो यमाश्च नियमाः प्रसूनानि फलञ्च चित्।
हरिपादरतिश्चैव रस इत्याजगौ श्रुतिः॥
अनेकानां प्रसङ्गानां सन्ति या इतरा कथाः।
ता एवात्र खगा नानावर्णा शुक - पिकादयः॥

रोमाञ्च आराम - वनद्रुवाटचः
सुखं विहारः सुविहङ्गमानाम्।
कान्तेन नेत्रेण सुचिर[illegible] माली,
सिञ्चत्यहो तान् [illegible]लेन॥

[illegible] यशः
६६ [illegible]गव हि:

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विक्रेयाणि बहुमूल्यानि पुस्तकरत्नानि

गृहं स्वर्गीकर्तुं मानवजीवनञ्च सफलयितुं वाणीपुस्तकमालातः महापरिषदः महामण्डलसंस्थानतश्च प्रकाशितानि निम्नलिखितपुस्तकानि विक्रयार्थं प्रस्तुतानि। विशेषविवरणाय सूचीपत्रं नियमाश्च पत्रप्रेषणेन समासादनीयाः।

१. भारतधर्म-समन्वय ... १–५०
२. परलोक-तत्त्व ... २–५०
३. कठोपनिषद् ... ३–००
४. धर्मतत्त्व ... २–५०
५. वेदान्तदर्शन ... १–५०
६. हिन्दूधर्मका स्वरूप ... ०–३७
७. तत्त्वबोध, सजिल्द ... १–००
    बिना जिल्दका ... ०–७५
८. आदर्श देवियाँ प्रथम भाग ... २–२५
    ,, ,, द्वितीय भाग ... २–५०
९. सती सदाचार ... १–५०
१०. कर्म-रहस्य ... २–५०
११. केनोपनिषद् ... १–५०
१२. ईशावास्योपनिषद् ... १–००
१३. सप्तशती (दुर्गा) गीता, सजिल्द ... ३–००
    ,, दफ्ती जिल्द ... २–२५
१४. सदाचार-प्रश्नोत्तरी ... ०–३७
१५. व्रतोत्सव-कौमुदी ... १–३७
१६. हिन्दू-संस्कृति-समीक्षा ... ०–५०
१७. धर्म-प्रवेशिका ... ०–७५
१८. पूजा-प्रार्थना ... ०–६२
१९. गायत्रीमन्त्र-टीका ... ०–२५
२०. आचार-चन्द्रिका ... १–००
२१. कन्या-शिक्षा-सोपान ... ०–२५
२२. गजेन्द्र-मोक्ष ... ०–३७
२३. महिला-प्रश्नोत्तरी ... ०–५०
२४. व्रतोत्सव-चन्द्रिका ... ५–००
२५. धर्माधर्म-प्रश्नोत्तरी ... ०–२५
२६. सुलोचना ... ०–६२
२७. तीर्थ और देवपूजन-प्रश्नोत्तरी ... ०–२५
२८. स्मरणी ... ०–६२
२९. स्त्री-पुरुष-विज्ञान ... ०–३७
३०. श्राद्ध और परलोक-विचार ... ०–३७
३१. धर्म-विज्ञान प्रथम, द्वितीय, तृतीय, ५) ४) ४–००
३२. श्रीमद्भागवत, एकादश स्कन्ध ... ३–५०
३३. सती धर्म और योगशक्ति ... ०–३७
३४. अन्तःकरण-विज्ञान ... ०–७५
३५. निर्मूल आक्षेपोंका उत्तर ... ०–३७
३६. परलोक-प्रश्नोत्तरी ... ०–२५
३७. श्रीमद्भगवद्गीता प्रथम भाग ... ४–००
    ,, ,, द्वितीय भाग ... ३–५०
३८. मनुष्य-धर्म ... ०–३७
३९. धर्मकल्पद्रुम प्रथम खण्ड ... ६–००
    ,, द्वितीय खण्ड ... ३–००
    ,, तृतीय ,, ... ३–५०
    ,, चतुर्थ ,, ... ५–००
    ,, पञ्चम ,, ... ३–५०
    ,, षष्ठ ,, ... ४–००
    ,, सप्तम ,, ... ३–५०
    ,, अष्टम ,, ... ४–००
४०. प्रवीण दृष्टिमें नवीन भारत (प्रथम खण्ड) २–००
    ,, ,, (द्वितीय खण्ड) २–००
४१. नवीन दृष्टिमें प्रवीण भारत ... १–२५
४२. साधन-चन्द्रिका ... १–७५
४३. शास्त्र-चन्द्रिका ... १–७५
४४. धर्म-चन्द्रिका ... १–६५
४५. पातञ्जल-योगदर्शन (हिन्दी भाष्य) ... ३–००
४६. कर्ममीमांसा-दर्शन (सम्पूर्ण) ... १२–००

व्यवस्था[illegible] वाणी-पुस्तकमाला, आर्यमहिला हितकारिणी महापरिषद्, जगतगंज, वाराणसी

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पञ्जीकृत-संख्या—एल० १८९७

सूर्योदयस्य नियमाः

पत्र-संहिता

१. 'सूर्योदय'-मासिकपत्रस्य वार्षिकं शुल्कं रूप्यकपञ्चकं वर्तते। धनादेश (मनीआर्डर) द्वारा तत्प्रेषणीयम्। वी० पी० द्वारा प्रेषणे ५० पणाः पृथक् प्रदेयाः स्युः।

२. आवर्षं गम्भीरसाहित्यसमन्विताः १२ अङ्काः प्रकाश्यन्ते। नवीनग्राहकत्वं प्रथमाङ्कतः (जनवरी-अङ्कतः) एव स्वीक्रियते। माध्यमिकेन केनापि अङ्केन ग्राहकत्वं न स्वीक्रियेत।

३. आंग्लमासस्य २६ दिनाङ्के 'सूर्योदयः' प्रकाशितो भवति। वारद्वयं संशोध्य ग्राहकेभ्यः सः प्रेष्यते। अतस्तदलाभे पूर्वं स्वकीय-पत्रालयतस्तदनागमनस्य निर्णयं कृत्वैव १० दिनाङ्कानन्तरं वयं सूचनीयाः।

४. लेख-कवितादीनां भाषा संयता, सरला, शुद्धा च भाव्या। प्रकाशनीय-लेखादीनां स्पष्टाक्षरैः कर्गजस्यैकपृष्ठे एव लेखनमावश्यकम्। अस्वीकृता लेखादयः पोस्टविभागीय-चिटिका (टिकट) प्राप्त्यनन्तरं परावर्तयितुं शक्ष्यन्ते।

५. सम्पादकीय-विषयसम्बद्धे पत्र-व्यवहारे 'सम्पादकः' इति, व्यवस्थाविभागीय-पत्रव्यवहारे च 'व्यवस्थापकः' इति च स्पष्टं लेखनीयम्। तेन उत्तरलाभे मुधा विलम्बो न भवेत्।

विज्ञापन-शुल्कम्

सूर्योदये सुरुचिपूर्णं विज्ञापनं प्रकाश्यते। एकवारं तस्य प्रकाशनस्य शुल्कक्रमश्च अधोलिखितोऽस्ति। सार्वकालिकस्य दीर्घकालिकस्य च विज्ञापनस्य कृते विशेष-सौविध्याय पत्र-व्यवहारः कार्यः।

साधारणस्य प्रतिपृष्ठस्य	१००) रु०	साधारणस्य प्रत्यर्धपृष्ठस्य	६०) रु०
साधारणस्य चतुर्थांशपृष्ठस्य	३५) रु०	आवरण-चतुर्थपृष्ठस्य	२००) रु०
आवरण-द्वितीय-तृतीयपृष्ठयोः	१५०) रु०	प्रथमावरणपृष्ठे विज्ञापनं न स्वीक्रियेत।	

—सङ्केतः—

'सूर्योदय'-कार्यालयः, भारतधर्म-महामण्डलम्, जगतगंज, वाराणसी।

सम्पादकः, प्रकाशकः, मुद्रकश्च—गोविन्द नरहरि वैजापुर[illegible]
श्रीभारतधर्ममहामण्डलम्, जगतगंज, वाराणसी कैण्ट।
मुद्रण-स्थलम्—आनन्दकानन प्र[illegible]सी-के० ३६/२० [illegible]राणसी।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूर्योदयः

भारतधर्ममहामण्डलस्य
मासिकं मुखपत्रम्

वर्षम् ५०

अङ्कः ७

सम्पादकः
गो० न० वैजापुरकरः

जुलाई
१९७४

वार्षिक-मूल्यम्
५) रूप्यकाणि

प्रत्यङ्क-मूल्यम्
अर्धरूप्यकम्

गुरुकुल कांगड़ी
8/10/74

मधुप ! तव गानं निःसारम् !

मधुप, तव गानं निःसारम् !
वृथा गच्छसि वारं-वारम् !
अहो पिशुन ! जानामि किं दशा मदीयां नैव ।
नन्दकिशोर - वियोगजा हृदि निवसति पीडैव ॥
दहति या देहं सुकुमारम् !
विरहिण्या मम जीवनं नितरां शून्यमवेहि ।
व्यथितां मा पीडय मुहुः शीघ्रं दूरमपेहि ॥
क्षते मा लेपय रे क्षारम् !
मम वीरः स्वामी गतो जगद्व्यथा - हरणाय ।
एतदेव बहु वर्तते षट्पद मे तोषाय ॥
न कुरु निज करुणा-विस्तारम् !

—डॉ० शिवशरणशर्मा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ग्राहका विज्ञापनदातारश्च विनिवेद्यन्ते

यत् 'सूर्योदय'स्य पञ्चाशत्तमवर्षस्य वार्षिकं शुल्कमद्यावधि नैकैः प्रत्नग्राहकैर्नं प्रेषितम् । अतस्तैः एतदङ्क-प्राप्तेः समकालमेव पञ्चमुद्रात्मकं वार्षिकं शुल्कं धनादेश (मनिआर्डर) द्वारा प्रेषणीयम् । नव्योऽपि एकैको ग्राहको विधेयः ।

एवं नैके धनिनोऽपि ग्राहकाः व्यवसाय-संस्थानानि शासनानि च सर्वेभ्यो मुक्तहस्तं स्वव्यापार-विज्ञापनानि प्रददति । परं 'सुर्योदयः' तैः कदापि न स्मर्यते । सूर्योदये सुरुचिपूर्णं विज्ञापनं प्रकाशयितुमस्माभि-रुपक्रान्तमस्ति । अतस्तेऽमुमपि कृपयाऽनया अनुगृह्णन्त्विति ।—व्यवस्थापकेन

अनुक्रमः

प्रपानकः	पत्रपुटम्	परिवेषकः
प्रफुल्ल-पुण्डरीकलोचनं रमापतिं भजे ।	१४५	श्री 'भुवनेशः'
श्री महर्षि-ज्ञानानन्द-चरितम् महाकाव्यम्	१४६	स्वर्गीयाः श्रीविन्ध्येश्वरीप्रसादशास्त्रिणः
आकाशवाणीतो दैनिक-संस्कृतवृत्त प्रसारणम्	१४७	सम्पादकीयम् (अग्रलेखः)
मानस-भारती : देवगिरा गुम्फितं मानसम्	१४९	श्री जनार्दन गंगाधर स्टाटे,
कीर्ति-कामना	१५०	श्री डॉ० डी० अर्कसोमयाजी
रूप-दीपिका	१५१	श्री रामानन्द द्विवेदी
रसतत्त्व-विमर्शः	१५३	श्री बालशास्त्री आचार्यः
भारते षड्ऋतयः	१५८	श्रीमती पूनम पाण्डेया एम० ए०
संस्कृत-प्रचार-तन्त्रम्	१६०	श्री विद्याभूषणः गणेशरामशर्मा
(५) पूर्णाहुतिः	१६५	श्री कृष्णप्रसाद घिमिरे

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूर्योदयः

रागद्वेषनिशाटनं १वधुरयन् मोहं तमो नाशयन्,
तामिस्त्रं जडवादकैरवकुलं ज्ञानत्विषा ग्लापयन् ।
विद्वत्कोकमशोकयन् नवसुधीरोलम्बमुन्मीलयन्,
सञ्जातः सुमनोमनो मधुरयन् सर्वत्र सूर्योदयः ॥

५० वर्ष] वाराणसी, आषाढः, २०३० वै० : जुलाई १९७४ ई० [७ अङ्कः

प्रफुल्ल-पुण्डरीकलोचनं रमापतिं भजे !

१. नवीन - नील - नीरदाभ - दिव्यकान्ति - मण्डितं
विभुं तमेव येन भक्तपापमाशु खण्डितम् ।
गदाब्ज-शङ्ख-चक्र-धारिणं चतुर्भुजं हरिम्, प्रफुल्ल० ॥

२. स्वभक्त - कल्पपादपं समृद्धिसिद्धि - सौख्यदं
प्रपन्न - दीन - तापहं समस्त - कल्मषापहम् ।
सुरारिवृन्द - नाशकं प्रशस्त - धी-प्रकाशकम्, प्रफुल्ल० ॥

३. विभिन्नरूपतो भुवं समेत्य हन्ति किल्बिषं
तथैव धर्मरक्षणं करोति यो दयान्वितः ।
स्वभक्तभीतिभञ्जकं सदानुरक्त - रञ्जकम्, प्रफुल्ल० ॥

४. किरीटकुण्डलान्वितं मुखं सदा सुशोभितं
सुपीत - वस्त्रधारिणं समस्त - कष्ट - हारिणम् ।
सदैव साधु - भक्तवृन्द - वन्दितं विमुक्तिदम्, प्रफुल्ल० ॥

५. रमापतिस्तवं पठेद् यदीह कोऽपि भक्तितः
समस्त - पाप - तापतो विमुक्तिमेति सत्वरम् ।
कदापि नो भवार्णवे पतेत् पुनर्भयावहे, प्रफुल्ल० ॥

— श्री 'भुवनेशः' —

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीमहर्षि-ज्ञानानन्दचरितं महाकाव्यम्

— श्री विन्ध्येश्वरीप्रसाद शास्त्रिणः —

(एकविंशः सर्गः)

२१. दुर्बोधकर्मगतिदर्शकसूत्रजालं सम्प्राप्य योगिवरपूजितपादपद्मः ।
भाष्येण तच्च महता परिभूष्य कर्ममीमांसनं पुनरसौ प्रकटीचकार ।।
२२. तच्चोत्तरार्धमृषिजैमिनिना प्रणीतं यत्रास्ति यज्ञनिवहस्य विवेचनं हि ।
पूर्वार्धमेवेतदिति च द्वितयं मिलित्वा कर्माख्यदर्शनमिदं परिपूर्णमास्ते ।।
२३. तत्कर्मकाण्डसुविवेचकशास्त्रमेतत् पादैश्चतुर्भिरमलैः सुविभक्तमस्ति ।
संवर्धनाय सुधियां सुखसन्ततीनां संदर्श्यते विशकलय्य हि तत्स्वरूपम् ।।
२४. आद्यो निरुक्त इह राजति धर्मपादः संस्कारपाद इति नामधरो द्वितीयः ।
पादस्तृतीय उदितो विमलः क्रियाख्यो मोक्षाख्यया निगदितोऽस्ति चतुर्थपादः ।।
२५. सच्चासदप्यथ च धर्म उताप्यधर्मो भेदावुभावभिहितौ किल कर्मणोऽस्य ।
तौ सम्मतौ च भुवने सुख-दुःखमूलौ तावेव पुण्यमपि पापमपि प्रगीतौ ।।
२६. त्यक्त्वा ह्यधर्ममथ धर्ममुपास्य लोका विश्वोन्नतिं समधियन्ति ततश्च मोक्षम् ।
एतद्विचिन्त्य मुनिना प्रथमे तु धर्माधर्मस्वरूपमिह पूर्णतया न्यगादि ।।
२७. संस्कारराशिरखिलोऽपि च किंस्वरूपः के वस्तुतस्तु च भवन्ति तदीयभेदाः ।
तच्छोधनार्थमिह सन्ति च के ह्युपायाः पादे विवेचितमिदं निखिलं द्वितीये ।।
२८. संस्कारशुद्धिजनितैव मता क्रियायाः शुद्धिश्च सन्ति कतिधा च तदीयभेदाः ।
तत्साधनाय सुकरः क उपायवर्गो निर्दिष्टमेतदखिलं हि तृतीयपादे ।।
२९. तद्धर्मसंस्कृतिसदर्हितकर्मशुद्धिजन्यं फलं चरममाकलितं हि मोक्षः ।
यः प्राणिनां जगति विश्वजनीनलक्ष्यं तद्वर्णनं विलसतीह चतुर्थपादे ।।
३०. काण्डं च वेदविहितं समुपासनायाः सम्यग् विवेचयितुमङ्गिरसाऽऽत्मवेत्रा ।
यद्दर्शनं विरचितं समभूत् पुरा तत् कालप्रभाववशगं सुविलुप्तिमापत् ।।

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आकाशवाणीतो दैनिकं संस्कृतवृत्त-प्रसारणम्

जुलाई-मासस्य नवम-दिनाङ्कतः भारतशासनस्य सूचना-प्रसार-मन्त्र्यालयद्वारा प्रतिदिनं प्रातः नववादनसमये पञ्चनिमिषपर्यन्तम् आकाशवाणीतो देववाण्या संस्कृत - वृत्त - प्रसारणस्य उपक्रमः समजनि। तदर्थं सूचनाप्रसार-मन्त्रिणः श्री गुजराल महोदयाः निखिल - भारतीय - संस्कृत - समाजद्वारा नितरां धन्यवादार्हाः। यदा किल भारतशासनेन स्वीयसंविधान-स्वीकृतासु चतुर्दश-भाषासु संस्कृतमपि एका भाषा स्वीकृता, सर्वासां च भाषाणां शासकीयेषु सर्वेषु पदेषु प्रचारतन्त्रेषु च प्रयोगो जायते, तदा संस्कृतस्य आकाशवाणीतोऽद्यावधि प्रसारस्य समुपेक्षणं संविधानस्य पर्यायतोऽवमाननमेवासीत्। कामं सन्तु शतमिताः सहस्रमिता वा संस्कृतमात्रभाषिणो संस्कृतमात्रज्ञातारो जनाः देशस्य पृष्ठभागे, परं तेष्वपि जातीयाभिनिवेशसंकुलतया संस्कृतस्य महत्त्वं नासीत्। अत एव अन्यभाषीयजनानां स्पर्धर्धया इव संस्कृतस्पर्धायै अवसरो न दृष्टिपथमुपागतोऽत्र देशे। तथापि पर्यन्ते निखिलभाषासु नैकविधयाऽनुस्यूतेयं तेषां भाषिकं सौभगत्वं संसाधयन्ती निष्कामकर्मयोगीव फलाशानिरपेक्षा सर्वाः समुज्जीवयन्ती इयं विराजते। तस्मात् तस्याः गौरवकरणमस्माकं कर्तव्यमेव।

वस्तुतो भारतीयसंविधाने राष्ट्रभाषाया निर्णयावसरे सर्वैः गुणगणैः संस्कृतमेव सर्वा भाषा अतिशाय्य तत्पदमलङ्कर्तुं निर्धारितप्रायाऽभवत्। अत्रान्तरे नेतृविशेषाणां प्रभावविशेषेण हिन्द्या तत्पदमधिकृतम्। संस्कृतस्य स्वाभाविकगौरवरक्षणाय समपेक्षितं प्रयत्नजातं कर्तुमपि तत्रस्थैर्नेतृवरैस्तदा प्रतिज्ञातमासीत्। किन्तु अद्यावधि शासनेन सर्वोच्चशासकतोऽवरशासकपर्यन्तं केवलं मौखिकरूपेण संस्कृत-गुणगानमन्तरा व्यावहारिकदृष्ट्या कियत्कृतं तदितिवृत्तविदां न तिरोहितम्। नासीत् संस्कृतं केषाञ्चन तथाकथिता 'मातृभाषा', येन कश्चिद् रामलु-सदृशो महात्माऽत्र अवतीर्य प्राणदानेन भाषानुसारि - संस्कृतप्रदेशस्य महाभियानं सफलयितुं प्राभवत्। संस्कृतज्ञा विद्वांसः पुनः सर्वथा सन्तोषैकधनाः, स्वप्नेऽपि राष्ट्रहितविरोधं कामयितुं न प्रवर्तन्ते। अत एव नेतृणां राजनयिको मार्गोऽपि संस्कृतस्य कृते संवैधानिकाधिकार-हननकृत-प्रत्यूहेन निष्प्रत्यूह एवाभवत्; संस्कृतभाषा च वैदेशिकदासतायां यथा समुत्पीडितासीत्, देशस्य स्वातन्त्र्यलाभेऽपि तथैव पदललिता समुत्पीडिता च अश्रून् विमुञ्चन्ती कोणे स्थिता।

तदनन्तरं नैकेषां संस्कृतप्रणयिनामत्याग्रहेण विभिन्नेषु क्षेत्रेषु किञ्चित् किञ्चिद् यत्संस्कृतस्य समुन्नयनं समभूत्, तदर्थं शासनं समभिनन्दन्तोऽपि वयं संस्कृतशिक्षाशिक्षकाणां वेतनादिविषये शासनकृतमद्यावधिकं निर्ममं समुपेक्षणं सर्वथा 'मनस्यन्यद् वचस्यन्यदेव' दृशोर्विषयतामगात्। सत्येवंविधौ आकाशवाणीतः पञ्चनिमिषं यावत् संस्कृतवृत्तप्रसारविषयको भारतशासनस्य निर्णयः प्रशंसनीयोऽपि न जातु संस्कृतप्रणयिनां तृप्त्याधायकः। तदैवायं तेषां तुष्टिकरः स्याद् यदा दिव्यस्य वाङ्मयस्यास्य विविधविधानां नाटक-प्रहसन-काव्य-कथाप्रभृतीनां सरलातिसरलरूपेण प्रसारणं बहुकालिकं दैनन्दिनम् आकाशवाणीतो विधीयेत। संस्कृतस्य समुपेक्षणेनैव तद्वाङ्मयमद्य दुर्बोधमभूत्। वैदेशिकशासनेन तथाकरणाय बुद्ध्या प्रयतितम्। यतो हि अस्याः सर्वसाधारणबोधगम्यत्वे भाषाया यल्लक्ष्यं सिद्धान्तितं तदशेषतः सिद्ध्येत्, तेन च भारतीयसंस्कृतेरेव परिपुष्टिर्मौलिकी जायेत, भारतविषये दुर्भाव-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भावनाभिभूतानां कूटनीतिज्ञानां कूटनीतिश्च विफला-ऽशेषतो भवेत्। सत्येवं ते कथङ्कारमेतां देवगिरं प्रोत्साहयेयुः? यदि नाम देव्या मदालसया भगवतो वेदव्यासस्य शब्देषु स्वपुत्राय यत्प्रबोधितं तत्ताहशमेव प्रसारितं स्यात्तदा राष्ट्रस्य वास्तविकदृष्ट्या कियान् अस्य प्रभावो भवेत्, कूटनीतिज्ञानां कूटनीतिः कथं विफलतां गच्छेदिति पृथक् वक्तव्यं नावशिष्यते। यतो हि संस्कृतं सर्वसमर्था आदिमा भाषा व्यवहाराय सृष्टिकर्त्रा प्रस्तोतिता। तदीय एकैकः शब्दो वक्तव्य-विषयस्य भावप्रकाशने शिष्टभाषीयशब्दान् न्यक्करोति। अस्याः शब्देषु वर्णेषु च काचन विलक्षणा दैवी मन्त्रशक्तिर्जागर्ति। सा च प्रयोगेण बलात् प्रबोध्यं वशीकरोति।

अत एव भारतराष्ट्र-मानबिन्दु-समुन्नयन-प्रयास-प्रतिपक्षिणां वैदेशिकशासकानां कृते कामं संस्कृत-भाषाया व्यवहारपथि नियोजनं क्षुद्रस्वार्थविप्र-तीपं भवतु। स्वदेशशासकानां पुनरेतदेव कर्तव्यं यत्तस्या अधिकाधिकः प्रयासो विधीयन्ताम्। स्वतन्त्र-भारतस्य कृते स्वतन्त्रा सर्वथा स्वकीया राष्ट्रभाषा भाव्या। कामं हिन्दीभाषया तत्कार्यमतिवाह्यते, परं साऽपि कृत्रिमा सर्वभाषामातृभूतायाः संस्कृत-गिरो मुखापेक्षिणी। सत्येवं संस्कृतस्य यावान् प्रचारः प्रसारो भवेत् तावान् राष्ट्रभाषायाः विकासोऽपि स्यात्। अतो भारतशासनेन योऽयं शुभोऽभिक्रमः कृतस्तस्य विस्तारणमुपर्युक्तप्रदर्शितमार्गेरवश्यं विधेय-मिति तेभ्योऽस्माकं निवेदनम्।

अत्रान्तरे संस्कृते वृत्तप्रसारणविषयं स्तुवता आर्यसमाजीय - पत्रेण 'राजधर्मेण' लिखितं यत् 'क्रमोऽयं सर्वथा समर्थनीयः। कामं संस्कृतभाषां जानतां संख्याऽद्य अल्पीयसी स्यात्। किन्तु यदा प्रतिशतदृशा केवलं द्वाभ्यां ज्ञायमानाया आंग्ल-भाषायाः कृते भारतशासनेन आकाशवाणीक्षेत्रे नित्यं भूयान् समयो व्ययीक्रियते, तदा संस्कृतस्य कृते दैनिक-पञ्चनिमिषात्मक-स्वल्पतमस्य कालस्य क्षपणं न कोऽप्यपराधः स्यात्। ··भारतीयसंस्कृतौ परम्परासु प्राचीने ज्ञानविज्ञाने च दृढमास्थावन्तो जना आकाशवाणीतः संस्कृतवृत्तप्रसारणं विशेषतो रोचि-ष्यन्ते।·· यूरोपीयाः सर्वा भाषा आर्यभाषाभ्य एव निर्गताः। किन्तु यूरोपीयानां पूर्वजा असभ्या आसन्। ते क्लिष्टमुच्चारणं कर्तुं नापारयन्। अत एव तेषां भाषा संकुचिता समभवत्' इत्यादि। 'राजधर्म'स्य टिप्पणीयं नूनं नग्नसत्यम्। न केवलं सर्वासामार्य-भाषाणाम्, निखिलानां भाषाणां जननी संस्कृत-मेवासीदिति अद्यतनीयाः भाषाशास्त्रविदोऽपि साम्प्रतं कथयन्तो दृश्यन्ते। भारोपीय-परिवारस्य इयमेव आदिमा जननीति तेषां मतम्। भाव-प्रकाशने यथेयं सर्वांशतः प्रभवति, न तथाऽन्या कापि भाषा। यदा किल सृष्टिं विरच्य व्यवहाराय ब्रह्मणा जीवेभ्यो भाषा प्रदत्ता, तदा प्राथमिकः शब्दस्तन्-मुखाद् ओमित्येव निर्गतः। तथा चोक्तम्—'ओङ्कार-श्चाथ शब्दश्च द्वावेतौ ब्रह्मणः पुरा। कण्ठं भित्त्वा विनिर्यातौ···।' ओङ्कारेण च निखिलस्य चराचरा-त्मकस्य संसारस्य ततोऽतिरिक्तस्य अखण्डसच्चिदानन्द-तत्त्वस्य बोधो विधीयते इति तु माण्डूक्याद्युपनिष-द्विदां न तिरोहितम्। किन्तु ये स्वकीयं भारतीयं भाषा - वाङ्मयेतिहास - दर्शनादिकं न जानन्ति, जानन्तोऽपि ये दीर्घदासताभिशापशप्ताः क्षुद्रस्वार्थ-साधने रताः, ते सूर्यप्रकाशवदिदं सर्वं दार्शनिकं तत्त्वं बुद्ध्वाऽवमत्य 'मुखमस्तीति वक्तव्यम्' इति न्यायेन 'दिनमाना'ख्ये पत्रे, विशेषतः सम्पादकीय-विचारप्रसङ्गे पूर्वोक्तपत्रस्य विरोधे विप्रलापं कुर्वन्ति चेत्, ते नूनं दयनीयाः। तेषां विचारणामत्र च प्रकाशनमपि वयं कालक्षेपकं पापकरञ्च मन्यामहे। सर्वमेतद्विषयकं तेषां विचारजातं सर्वथा अराष्ट्रियमेव मन्महे। स्वाभिमानि किमपि विशुद्धं राष्ट्रियं शासनं राष्ट्रमानहानिकरमेताहशं पत्रं दण्डयिष्यति। अत्र केवलमस्य सङ्केतस्य इदमेव लक्ष्यं यद् भारतीय-संस्कृतिप्रणयिभिस्तेषां जाबालिकल्पानां ताहशे कूटो-पदेशे कथमपि स्वात्मा न वञ्चनीय इति। भारत-शासनेनापि योऽयं स्तुत्योऽभिक्रमः कृतस्तस्य उत्तरोत्तर-विकासाय प्रयतनीयम्। प्रयासस्यास्य लाभस्तु अचिरादेव तेन द्रष्टुं शक्येतेति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मानस-भारती : देवगिरा गुम्फितं मानसम्

—श्री जनार्दन गङ्गाधर रटाटे, एम० ए० साहित्याचार्यः—

गायन्तीदं चरितं ये सावधानेन चेतसा।
त एवास्य तडागस्य चतुराः सन्ति रक्षकाः॥
एतत् सदा ये शृण्वन्ति नरा कार्यश्च सादरम्।
देवश्रेष्ठास्त एवास्य मानसस्याधिकारिणः॥
येऽतिदुष्टा विषयिणो बकाः काकाश्च सन्ति ये।
न यान्ति दुर्भगास्तेऽमुं निकषा मानसं सरः॥
यतः शम्बूक-वर्षाभू-शैवालसदृशा ध्रुवम्।
विषयाख्य-रसस्यात्र न सन्ति विविधा कथाः॥
अत एवात्रोपयान्तो विजता हृदि भाविताः।
वराका बक-काकाभाः सर्वे विषयलोलुपाः॥
सन्त्यत्रागमने नूनं काठिन्यानि बहून्यपि।
न सम्भवत्यागमनमत्र रामकृपां विना॥
घोरः कुसङ्गः कुपथो वर्ततेऽतिभयानकः।
कुसङ्गिनां वचश्चैव व्याघ्र-सिंह-भुजङ्गमाः॥
गैहिकानीह कर्माणि प्रपञ्चा विविधाश्च ये।
सर्वेऽतिदुर्गमाः शैलास्ते विशालतमा मताः॥
मोहो मदस्तथा मानः पर्याप्तविषयं वनम्।
बहुरूपाः कुतर्काश्च सरितः सन्ति भीषणाः॥

श्रद्धाख्य - पाथेय - विवर्जिता ये
येषां न सद्भिः सह सङ्गमश्च।
येषां प्रियो नास्ति च रामचन्द्र-
स्तेभ्योऽस्त्यगम्यं बहु मानसं तु॥३८॥

यद्येतेषु पुनः काश्चित् कष्टं सोढ्वा व्रजेदपि।
तर्हि प्राप्तावेव निद्राकम्पस्तं बाधते भृशम्॥
आयाति जडताशीतं विषमं तस्य चेतसि।
प्राप्तोऽप्येतत् सरस्तस्मात् स्नानं नाप्नोति दुर्भगः॥
न शक्येते स्नान-पाने कर्तुं तेन सरोवरे।
अभिमानेन सहितः स परावर्तते ततः॥
यदि कश्चित् सरोवार्तां प्रष्टुमायाति तं पुनः।
सरोनिन्दां तर्हि कृत्वा स तं बोधयति ध्रुवम्॥
एते विघ्ना न बाधन्ते तं मानस-निषेवणे।
रामः सुकृपया दृष्ट्या यं विलोकयते जनम्॥
स एव सादरः स्नानं करोत्यस्मिन् सरोवरे।
महाघोरैस्त्रिभिस्तापैः स कदापि न तप्यते॥
कदापि ते नरा नैव त्यजन्तीदं सरोवरम्।
येषां चित्ते मञ्जुभावो वर्तते राम-पादयोः॥
हे भ्रातरो य एतस्मिन् सरसि स्नातुमीहते।
मनः संयोज्य सत्सङ्गः स कुर्यात् प्रयतं नरः॥
विलोक्य मानसाक्षिभ्यामीदृशं मानसं सरः।
अवगाह्य च सञ्जाता मतिः सुविमला कवेः॥
आनन्दो हृदये जातस्तथैवोत्साह एव च।
प्रेम्णश्चापि प्रमोदस्य प्रवाहः प्रोद्गतः परः॥
तस्मात् सा सुभगा भव्या निर्गता कविता-नदी।
यस्यां रामस्य विमलं यशोवार्यस्ति संभृतम्॥
अस्या नामास्ति सरयूर्मूलं सन्मङ्गलस्य च।
लोकवेदमतं कूलद्वयं सर्वाङ्गमञ्जुलम्॥
इयं सुमानससुता पुनीता परमा नदी।
मूलात् कलिमलाख्यानां तृणद्रूणां निकन्दिनी॥

त्रिरूपसच्छोतृसमाज एव
कूलस्य - पूर्ग्राममहापुराणि।
सतां सभा चानुपमास्त्ययोध्या
मूलं समेषां वरमङ्गलानाम्॥३९॥

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कीर्ति-कामना

सामान्यो मनुजः कुटुम्बविषये वित्तस्य च प्राप्तये
यावज्जीव - परिश्रमं प्रकुरुते तत् तस्य लक्ष्यं परम् ।
केचित् तादृशमीषणत्रयमतिक्रम्याऽपि कीर्तेः कृते
विद्वांसः कवयोऽप्यहं कृतिजुषः श्राम्यन्ति रात्रिन्दिवम् ॥ १ ॥
कैषा कीर्तिरहो मनोऽम्बरमुपाक्रम्याऽथ मेघो यथा
जीवानाममृतं निषिञ्चति जनो लोलुभ्यते यत्कृते ।
ईदृग्भावयतः कदाचिदपि मे चित्तं प्रवृत्तौ रतं
वैराग्यं न भजेद् यशोऽर्थमसकृद् यत्नं चिकीर्षत्यहो ॥ २ ॥
कान्ता काञ्चनकामतोऽपि बलवान् कामोऽत्र कीर्तौ कृतो
मर्त्यत्वादमृतत्वलाभविषये सर्वो व्यवस्यन्निव ।
आप्राज्ञं त्वथ पामरावधि यशो लब्धुं प्रयत्ने रताः
सैषा मानुषचित्त एव हि यशोलिप्सा न जन्तौ भवेत् ॥ ३ ॥
किन्त्वेवं धिषणा कदाचिदुदयेच्चित्ते मम ध्यायतः
वैशिष्ट्यं मयि नास्ति तत् खलु कथङ्कारं यशो लभ्यते ।
नार्हश्चापि लभेत कश्चिदथ तत् यत् तद् भवेत् पुण्यतो
वित्तं किं मयि पाण्डिती किमु तथा कीर्तिस्तथा नो भवेत् ॥ ४ ॥
गम्भीरार्णवगर्भितानि कति वा रत्नानि गुप्तानि वा
गाढारण्यगता लताः कुसुमिताः कर्षन्ति केषां मनः ।
तद्वद् भूरि बुधा भवन्ति धरणौ यन्नाम न श्रूयते
कीर्त्या किं हृदय ! स्थिरं भव भवे भूयात् तवाकर्षणम् ॥ ५ ॥
ब्रह्माण्डेश्वर देवदेव भगवन् मत्प्रार्थना श्रूयताम्,
याते मे बहु जीविते विगलितो मोहोऽद्य लब्धा स्मृतिः ।
कान्ता-काञ्चनवद् यशोऽपि मनसः काचिद्रुजा कामनात्
तस्मान्मां नय सत्पथे न भवतात् कीर्तिश्च लोके मम ॥ ६ ॥
द्राक्षामम्लतया न जम्बुक इव ब्रूयादलभ्यत्वतो
देवो व्यर्थयति प्रयत्नमसकृत् तत्र स्वयं तादृशाम् ।
अध्यात्मप्रतिपत्तिदृष्टिविधये स्वल्पार्थमुद्युञ्जता-
मित्येवं कलये समस्तमपि नः क्षेमार्थमेवार्दनम् ॥ ७ ॥
किं भोश्चिन्तयसे महात्मभिरपि प्राप्तं यशो दूषितं
नैवाऽहं तदभिप्रयामि हृदये जागर्ति भावोऽन्यथा ।
निष्कामं सुगुणप्रभावकलितं या कीर्तिरातन्यते
सौरभ्यं कुसुमैर्यथा तदिव हि न्याय्यं यशो नान्यथा ॥ ८ ॥

—श्री डॉ० डी० अर्कसोमयाजी —

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रूप-दीपिका

-- श्री रामानन्द द्विवेदी --

समासः

व्यासे पृथक्-पृथक् चैव समग्रपददर्शनम् ।
समासे लाघवार्थं च ह्यंशलोपो भवेत् क्वचित् ॥
द्वन्द्वे सर्वांशप्राधान्यं समुच्चयाङ्कलोपनम् ।
रामश्च लक्ष्मणश्चेति स्तो रामलक्ष्मणौ त्विह ॥
तत्पुरुषे परो मुख्यः मध्ये विभक्त्यदर्शनम् ।
पुरुषेषूत्तमश्चेति शब्दितः पुरुषोत्तमः ॥
दशरथात्मजः प्रोक्तौ दशरथस्य चात्मजः ।
अरण्यमागतश्चेति स्यादारण्यागतः स्मृतः ॥
इच्छा च विजयाय स्यात् विजयेच्छायै प्रकीर्तिता ।
वात्सल्येनाङ्कितो वीरः स वात्सल्यजितः स्मृतः ॥
कर्मधारयवैशिष्यात् स्मितमुखं स्मितं मुखम् ।
प्रोक्तः पुरुषसिंहश्च सिंह इव हि पूरुषः ॥
भुवनानां त्रयाणां यः समाहारो द्विगुस्थितः ।
त्रिभुवनं भवत्येवं स्यात् संख्यापूर्वके द्विगुः ॥
बहुव्रीहिसमासे स्यात् चान्यार्थस्य प्रधानता ।
दीर्घौ बाहू हि यस्य स्तो दीर्घबाहु-र्हरिः स्मृतः ॥
अव्ययीभावयुक्ते च पूर्वशब्दप्रधानता ।
चक्रेण युगपद् विष्णुः सचक्रं वर्तयेदिति ॥

वाच्य-परिवर्तनम्

पूर्वस्थः पाठः (तिङन्तेन)

बालः पठति पाठं स्वं पाठः बालेन पाठ्यते ।
अहं बालमपश्यं तं बालोऽदृश्यत वै मया ॥
स्वगृहं गम्यते तेन ह्येकं फलं च खाद्यते ।
खाद्येते द्वे फले तेन खाद्यन्ते सुफलानि च ॥
श्यामो भृत्यं गृहं स्वीयं गमयतीति कर्तृके ।
भृत्यः श्यामेन च ग्रामं गम्यते कर्मवाच्यके ॥
अयाचत ऋषी रामं तेन रामो ह्ययाचते ।
विश्वामित्रेण श्रीरामं दशरथो ह्ययाच्यत ॥

विभाषया—(कृदन्तेन)

सा पठितवती पाठं पाठो वा पठितस्तया ।
प्रस्थितवानहं चैवं वाच्यं तु प्रस्थितं मया ॥
ऋषिर्याचितवान् रामं तेन रामो हि याचितः ।
नरेशो याचितो रामं विश्वामित्रेण संस्फुटम् ॥

उत्तरस्थः पाठः

कर्तृकर्म च भावश्च वाच्यास्त्रयस्तु संस्कृते ।
तत्राकर्मकधातोस्तु रूपो न कर्मवाच्यके ॥
विभक्तिः प्रथमा यस्मिन् क्रिया तदनुसारिणी ।
सा स्याद्वाच्यानुसारेण कर्तरि चैव कर्मणि ॥
कर्तृवाच्यात् क्रिया यत्र कर्मवाच्यं तु नीयते ।
तृतीया कर्तरि योज्या कर्मणि प्रथमा तथा ॥
क्रियया यत्र चाभीष्टं केवलं भावबोधनम् ।
भाववाच्ये क्रिया कार्याऽन्यपुरुषैकवाचिका ॥
भावे कर्मणि वाच्ये च रूपं स्यादात्मनेपदम् ।
पठ्यते बालकेनोच्चैरुच्चैः पठति बालकः ॥
भावे कर्मणि वाच्ये च यक् सार्वधातुके भवेत् ।
गम्यते गम्येतां गम्येहागम्यत - चतुष्टयम् ॥

प्रेरणार्थकाः

पूर्वस्थः पाठः

बालः पठति पाठं तं बालं पाठयते गुरुः ।
बालं पाठ्यते पाठं गुरुणेवाभिभावकः ॥
रमयति शिशुं दृश्यैः शत्रून् दमयते भटः ।
जनयति न कस्यापि दुःखं श्रेष्ठो कदाचन ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बुद्धिमान् पठने कालं यापयति दिने दिने ।
दापयति नृपेणैव दानं च सज्जनो मुदा ॥
पाययति शिशुं दुग्धं विश्वं पालयते हरिः ।
अध्यापयति छात्रं च वेदं वाचयते गुरुः ॥
सज्जनान् दूषयन्त्येव घातयन्ति पशून् खलाः ।
धीमद्भिः पाठ्यते बालो विज्ञैः सिद्धिश्च लभ्यते ॥

उत्तरस्थः पाठः

कार्यं तु कारयत्येव यदान्येन प्रयोजकः ।
धातो रूपं तदा योज्यं णिजन्तं प्रेरणार्थकम् ॥
णिजन्ताः धातवः सर्व उभयपदिनस्तथा ।
भवतिवत् परस्मै स्युः सेवतेवत् तथात्मने ॥
अन्त्येकश्च स्वरस्यात्र वृद्धिरयादिसंधियुत् ।
अकारस्योपधास्थस्य वृद्धिर्णिचि तथा भवेत् ॥
उपधावर्तिनः स्याद्धि गुणो ह्रस्वस्वरस्य च ।
पाठं च पाठयत्याशु लेखयति गुरुर्यथा ॥
कर्तरि मूलधातोस्तु तृतीया प्रेरणागमे ।
नृपो भृत्येन कार्याणि कारयति न संशयः ॥
गतिप्रत्यवसानार्थे द्वितीया योजयेन् मतौ ।
पुत्रमन्नं यथामाता भोजयति सुहर्षिता ॥
यथात्मने णिजन्तश्च स्यात् परस्मैपदे तथा ।
दर्शयति यथा प्रोक्तं दर्शयते तथेरितम् ॥
इकारस्यैव चान्तस्य धातोर्णिजन्तकस्य हि ।
भावे कर्मणि लोपः स्यात् पाठ्यते कार्यते यथा ॥
गम् रम् क्रम् तथा शम् रुद् जन् त्वर् घट् व्यय् पदादिषु ।
अकारस्योपधास्थस्य णिचि वृद्धिश्च बाध्यते ॥
आकारान्तस्य धातोस्तु णिच् स्यात् पकारपूर्वकः ।
स्थापयति यथा, किन्तु पाययति न तत्समम् ॥
चुरादिगणधातोस्तु रूपं णिचि भवेत् समम् ।
गणयति च सा कन्या गणयति गुरुस्तया ॥

स्त्रीप्रत्ययाः

उदाहरणमात्रं हि बालः प्राक् च पठेत् सुखम् ।
सूत्रांशस्येह निर्देशः पश्चादर्थाय केवलम् ॥
टाप् डाप् चाप् ङीप् च ङीन् ङीषूङिति स्त्रीप्रत्ययाः स्मृताः
योज्या अनित्यलिङ्ग्यां हि स्त्रीत्वार्थं च संस्कृते ॥
अजादौ च ह्यकारान्ते स्त्रीत्वार्थं टाप् नियोजयेत् ।
अजा बाला कृशा वत्सा मूषिका चटका यथा ॥
पूर्वस्यात् प्रत्ययस्थात् कात् तत्रेदप्यसुपो भवेत् ।
यथा च बालिका ज्ञेया वर्जयित्वाष्टकादिकान् ॥
जातौ जातेरन्ताङ्ङीष् नाजादेः तत्र तद् भवेत् ।
यथा हंसी कुरङ्गी च वर्जिताः कोकिलादयः ॥
स्त्रीत्वार्थमूङ् नियोज्यः स्यात्तुदन्ताच्च यथा कुरुः ।
न रज्वादेर्यथा रज्जुः जानुर्हनुः कमण्डलुः ॥

लिङ्गानुशासनम्

प्रत्ययान्तस्य शब्दस्य चान्त्यवर्णक्रमेण हि ।
लिङ्गानुशासनं स्वल्पं बालबोधाय कथ्यते ॥
सामान्याः नियमा एते शिक्षारम्भोपकारकाः ।
नोक्ता अत्रापवादाश्च तेऽग्रे योज्याः बुधैरिह ॥

स्त्रीलिङ्गाधिकारः

स्त्रियां तल्प्रत्ययान्ताश्च शुक्लता विप्रता यथा ।
टापूङन्ताः यथा विद्या शोभा मेधा कुरुश्विव ॥
क्तिन्नन्तस्तु यथा भक्तिः वर्ज्य जातिः भवेत् स्त्रियाम् ।
मिन्यन्तास्तु यथा भूमिः वर्ज्यं वह्निश्च पुंसि सः ॥
य्वन्तमेकाक्षरं चैव यथा श्रीः भूः भवेत् स्त्रियाम् ।
ईकारान्ता यथा गौरी लक्ष्मी देवी नदी यथा ॥
समाहारद्विगूक्तौ च ह्यकार इत्युतः स्त्रियाम् ।
पंचवटीत्रिलोकीवत् पात्राद्यन्ताहते भवेत् ॥
दुहिता मातरो स्त्रीत्वे स्वसृयातृननान्दरः ।
ऋकारान्ताश्च श्वैते तथा प्रतिपादादयः ॥
विद्युद्वल्लीनिशावीणादिग्भूह्रीसरिदादयः ।
आविंशति नवत्यन्ताः स्युःसंख्यावाचकाःस्त्रियाम् ॥

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रसतत्त्व-विमर्शः

—— श्री बालशास्त्री, एम० ए०, आचार्यः ——

[शोधच्छात्रः—संस्कृत-विभागस्य, काशी-हिन्दू-विश्वविद्यालयीयस्य]

द्रुहिणादिभिराचार्यैर्भरतेन महर्षिणा। निरूपितो रसः सोऽत्र सोपपत्तिर्विचार्यते ॥

इह तावत् रससम्बद्धाः संक्षेपतश्चत्वारः प्रश्नाः समुत्पद्यन्ते—१. रसः किं प्रमाणकः, २. किं प्रयोजनकः, ३. किं स्वरूपः, ४. कथं च उपलब्धव्यः? इति।

तत्र **मानाधीना मेयसिद्धिः, मानसिद्धिश्च लक्षणात्** इत्यभियुक्तोक्तदिशा रसो येन प्रमितिसितव्यस्तदीये हि स्वरूपे यथार्थज्ञानसाधनतात्मके फलतः सर्वसिद्धान्तरीत्या पर्यवसिते, तत्संख्यायां तैर्थिकानां सगोत्रकलहस्य अनपेक्षणीयत्वेन उत्थापनानर्हत्वात् प्रकृताचार्यानुमोदितानामेव प्रमाणानामुपगन्तव्यतायां रसप्रस्थानिभिराचार्यैः प्रत्यक्षानुमानागमा एव प्रमाणत्वेन उपेयन्त इति वक्तुं युज्यते। तथापि प्रमेयविशेषनिरूपणप्रवणतावशंवदेन शास्त्रकारेण 'परमताप्रतिषिद्धमनुमतं भवती'ति नयमनुरुध्य प्रकृतविषयकसर्वोक्तिव्रातस्य अनुसर्तव्यताप्रसक्तावपि स्वरनादाभिन्नतानिबन्धनसमानतन्त्रसिद्धान्तन्यायादरेण सङ्गीतशास्त्रोदितत्वप्रयुक्तं, रसप्रत्यायनधूर्वहतया अत्यादृतव्यञ्जनायां यदुपज्ञत्वमस्ति, तेषां वैयाकरणानां राद्धान्ते महाभाष्यकारादिभिः व्यवहृतत्वायत्तं चरमोपेयतया पारमार्थिकस्वरूप-प्रदर्शनपरायणानां महर्षिशाण्डिल्यादीनां सूत्राक्षरतो वा लब्धं त्रैविध्यमुक्तनिष्ठमेवेति प्रकृते निर्दिष्टा प्रमाणत्रय्येव इहानुमोद्यत इति पक्षः शक्यस्वीकरणः। परेषामत्रैव अन्तर्भावात्, एतत्त्रिकेणैव रसः प्रमातव्य इति।

यद्यपि रसस्य प्रकाशाभिन्नतया नापरेण प्रकाश्यतापेक्षा, तथापि कथमपेक्षा? इत्यादिकं निपुणतरमुपरिष्टादुपपादयिष्यते।

तत्र प्रत्यक्षं तावत् नाट्यप्रदर्शिनां सहृदयानामानुभाविकमेवेति नेह किमपि विवक्षणीयम्। अनुमानमपि पक्षीकृतात्मनि **आत्मनस्तु कामाय सर्वं प्रियम्** इत्यादिश्रुतिभगवतीभिः प्रमापितेन निरतिशयप्रेमास्पदत्वेन हेतुना खलु आनन्दात्मकत्वसाधकतया स्वभ्युपगममेव, निरतिशयानन्दस्य रसात्मकतया, आत्मनश्च रसाभिन्नतया 'तदभिन्नाभिन्नस्य तदात्मकताया औत्सर्गिकत्वात्' इत्यादिकमपि स्वरूपविवेचने विवेचनयीमास्ते। आगमस्तु **रसो वै सः** इत्यादिः किल उपक्रमोपसंहारादिभिर्निर्णीततत्परताको नैव तिरोहित इति प्रमाणत्रयसिद्धे रसतत्त्वे न काचिद् विमतिरुदेतुमर्हति।

रस-प्रयोजनम्

प्रयोजनं चेदमीये निश्चिकीर्षितव्ये अयमेव प्रयोजनात्मा इति सिद्धान्तः। तथा हि—प्रयोजनं हि फलम्। तच्च गौण-मुख्यभेदेन द्विविधम्। फलान्तरेच्छानधीनेच्छाविषयत्वं मुख्यत्वम्। फलान्तरेच्छाधीनेच्छाविषयत्वं च गौणत्वम्। एवं च मुख्यत्वं सुखे एव विश्राम्यति इत्यत्र नैव विवादः, विश्वजनीनानुभवसिद्धत्वात्।

यद्यपि लोके सुखत्वेन व्यवह्रियमाणं न वस्तुतः सुखम्, विनाशित्वेन दुःखाधायकत्वात्। तथा चोक्तं पतञ्जलिचरणैः—**परिणामतापसंस्कारदुःखै - र्गुणवृत्ति-**

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विरोधाच्च दुःखमेव सर्वं विवेकिनः। (योग सू० २.१५) इति। अत एव दुःखमिश्रितत्वेन सुखस्यापि मधुसम्पृक्तविषवत् हेयत्वात्, तदपि विध्वंसयिषितव्यमेवेति महर्षिगोतमपादा व्यवातिष्ठिपन्। तथापि वास्तविकसुखमलभमानाः संसारिणस्तदाभासेनैव कृतकृत्यं मन्यमानाः समवलोक्यन्ते।

वस्तुतः सुखं च **आनन्दं ब्रह्मणो विद्वान्, तस्यैवानन्दस्य मात्रामुपजीवन्ति** इत्यादिभि भगवतोभिः श्रुतिभिरेवाऽवगमितम्। तच्च आत्मस्वरूपघटकतया परिणामादि - दुःखकालुष्यासंपृक्तमिति आत्मस्वरूपावगत्या सुज्ञानमौपनिषदप्रस्थानाध्वनीनैः। अत एव इदं विविच्यमानं रसतत्त्वं साहित्यदर्शन-परमजीवातुरूपमात्मस्वरूपमुपजीव्यतया आश्रित्य प्रवृत्तानां चतुर्मुखादि-भरतान्तानामाचार्याणाम् आर्षप्रमाणोपबृंहितं रसशास्त्रत्वेन व्यपदेश्यं न दर्शनान्तरैर्गतार्थमाशङ्कितव्यम्।

दर्शनान्तरेषु किल लौकायतिक-सौगतानाम् आत्मनः शाश्वतिकतैव दुर्लभा, विवसन-समये कथमपि नित्यत्वेऽपि तस्य आनन्दता शशविषाणायमानैव। नैयायिक - वैशेषिकाणां मते आत्मनो नित्यत्वेऽपि निरानन्दतैवास्य स्वरूपं, सानन्दता तु दुःखवत्तावृतैवेति न सिषाधयिषितसिद्धिः। कापिल-पातञ्जलानामपि तथात्वेन साम्यमेव इति नाभीष्टसिद्धिः। अध्वरमीमांसाविदां नयेषु प्रायेणो उक्तचर्य्येवाशान्तिः। क्वचिन्मुक्तौ नित्यसुखाभिव्यक्त्यभ्युपगमेऽपि दुर्निवारा अर्थान्तरता, मुक्तेः पूर्वं तदीयव्यक्तेरसत्कल्पत्वात्। अनयैव दिशा आत्मनोऽनानन्दतावादिनाम् अवशिष्टदर्शनानां सिद्धान्तेभ्योऽपि अगतार्थता स्फुटैव।

औपनिषद - सिद्धान्तिनां तु अद्वैत - विशिष्टाद्वैत-शुद्धाद्वैत-द्वैताद्वैत-द्वैतवादिनां पञ्चानामपि प्रस्थानेषु खल्वात्मतत्त्वस्य नित्यतया आनन्दतया च महतः संवादस्य सत्त्वेऽपि न तथा आनुकूल्यं यादृशं स्वाभीष्टसंपिपादयिषया आचार्या रसशास्त्रमुपनिबिभन्तस्व एनदाविरबीभवन्। एतच्चानुपदमेव स्वरूपनिर्णयावसरे वक्ष्यते। ततश्च निरतिशयानन्दसाक्षात्कार एव प्रयोजनत्वेनावधार्यते अत्रेति आस्माकीनः समयः।

रस-स्वरूपम्

रसस्य किं स्वरूपमिति जिज्ञासायां तावद् आत्मैव रस इति रसदर्शनानां राद्धान्तः। **रसो वै सः, आनन्दं ब्रह्मणो विद्वान्, आनन्दाद्ध्येवेमानि** भूतानि इति श्रौतवचनानि स्वरूप-तटस्थलक्षणाभ्याम् आत्मानमेव लक्षयन्ति। आत्मा चात्र यद्यपि ब्रह्म-परमात्मादि-पर्यायो भगवानेव उपक्रमोपसंहारादिभिस्तात्पर्यास्पदतया अवजिगमिषितः, तथापि प्रतिबिम्बतया, परिच्छिन्नतया, वस्तुतया वा **यथाग्नेर्विस्फुलिङ्गाः, ममैवांशो जीवलोके, अंशो नानाव्यपदेशात्** इत्यादि-श्रुति-स्मृति-ब्रह्मसूत्रादिभिः व्यवस्थापितो जीवोऽपि तत्त्वदृशा सच्चिदानन्दात्मा, परन्तु सिन्धोर्बिन्दुरिव तत्स्वभावः कणकल्पः सुतरां तदुपात्तसरणितः सर्वांशे एव तादृशः, नातो जगत्कर्तृत्वाद्यापत्तिः। अर्थं चैनं तर्कोपष्टब्धानि **जगद्व्यापारवर्जम्** इत्यादिवचनानि उपोद्बलयन्ति। अत एवायं तदीयतटस्थशक्त्यात्मकतया शास्त्रेषु व्यवह्रियते। सच्चिदानन्दरूपस्य भगवतः किल तिस्रः शक्तयः शास्त्रप्रमिताः—स्वरूपा, तटस्था, बहिरङ्गाख्या च। आसु स्वरूपाख्याया अपि तिस्रो भिदाः—संधिनी, संविद्, ह्लादिनी चेति नामिकाः। तथा च तत्त्वतो भगवत्स्वरूपसजातीयः, सर्वथा तद्विजातीयबहिरङ्गतोऽपि विलक्षणः सन् जीवः, 'तटस्थः' इति गीयते। एवं चोक्तस्वरूपो जीवोऽपि रसवाच्यतां नार्हतीति नाशङ्कनीयम्। न खलु रससमुद्रस्य बिन्दू रसान्यो भवितुमर्हति। एतदेवाभिप्रेत्य रसशास्त्राचार्याः प्राकृताप्राकृतभेदतो द्वैविध्यं रसस्य सञ्गिरमाणास्तथैवोपापीपदन्। मूलं चैतदीयम् आग्नेयादिषु व्यक्तमेव !

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भरतमुनिना तु यान् उपचिकीर्षुणा न्यबन्धि नाट्यशास्त्रम्, ते किलानादिकालतो बम्भ्रम्यमाणप्रपञ्चचक्रचङ्क्रमणताचणाः, अपरिशीलितचर-परमपुमर्थप्रापकपद्धतयः सुकुमारमतयो द्विविधवासनावासितहृदयाः काव्यार्थचिन्तनालङ्कर्मणि योग्यतापरिपचेलिमचातुरीका विनेयाः, तान् एतान् **असत्ये वर्त्मनिस्थित्वा ततः सत्यं समीहते** इत्यादिस्वरूपेण गुडजिह्विका न्यायेन चरमगन्तव्यदिगुन्मुखीनीकर्तुकामेन परमरसास्वादमाधुरीसम्पल्लेशोऽपि यदवधि नानुभवगोचरीकार्यते, तदवधि कथमिवादसीयमर्मस्पृहयालवोऽमी क्रियेरन्निति विचिन्त्य, दुष्करप्रवृत्त्यास्पदानि निःश्रेयसप्रापणपटूनि श्रवणादीनि साधनानि अव्यापार्यापि निखिलानर्थनिदानाज्ञानमनुन्मूल्यापि, चिरसंचितचर-कर्मकलापान् अपरिप्लुष्यापि जनैर्यथा तादृशं वस्तु आस्वादपदवीं नीयेत, यादृशं तत् तानि व्यापार्य, तदुन्मूल्य, तान् परिप्लुष्य सूरिभिस्तथा क्रियते, स प्रकारो दिव्यज्ञानमन्दरेण निगमपयोधीन् प्रमथ्य नाट्याम्नाय-पीयूषाभवपुः आविरकारि।

सुतरां प्रथमभूमिकारूढानामधिकारिणामुपकारः प्राकृतरसपरिचयेन यथा सुकरो, न तथा अप्राकृतरसज्ञानेन इत्यधिकारानुरूपमुपदेष्टारः श्रद्धेयवचनाः फलेग्रहियत्नाश्च भवन्ति, नापरथा। अतो मुनिना प्राकृतस्यास्यैव रसस्य प्रबन्धो निबन्धेनाऽन्वबन्धि, नापरस्य। नैतावता स नास्त्येव, नानुमत एव वेत्यवगन्तव्यम्। कथमन्यथा आत्मदर्शन-साधनताभावादस्य शास्त्रस्य दर्शनता, कथं चोपक्रमे एव चतुर्वर्गाप्तिप्रयोजकत्वप्रतिश्रुतिरस्य सङ्गच्छेत, कथं च रसताऽपि जीवस्वरूपघटकानन्दस्य ? रसत्वप्रतिपादिका हि भगवती श्रुतिः उपक्रमोपसंहारादिपरिचारकवृन्दसेविता खलु स्वेष्टमाप्तुं प्रभवति ?

न च तत्सध्रीचीनश्रुतितात्पर्यविषयाभिन्नत्वात् जीवस्य नोक्तापत्तिरिति वाच्यम्; तयोरभेदस्य यथातथ्यचिन्तायामिदानीमुदस्यापि सम्प्रतिपन्नभेदकाले अभेदोक्तेरनुपयुक्तत्वात्, प्रदर्शितविधया शास्त्रप्रवृत्त्युपजीव्यविरोधाच्च।

एतेन ज्ञानकाण्डेन रसकाण्डस्य गतार्थतया काण्डान्तरारम्भचर्चा मुधैवेति प्रलपन्तो निरस्ताः। प्रयोजनपार्थक्यं हि प्रस्थानपार्थक्यं प्रयोजयति। तच्च प्रयोजनमैहिकम्; आमुष्मिकं वा, उत्कृष्टमपकृष्टं वा अंशत इत्यन्यदेतत्।

इत्थं चैष रसः प्राकृतालम्बनकतया 'प्राकृत' इति व्यवह्रियते, अप्राकृतालम्बनको हि 'अप्राकृत' इति शास्त्रविदां मर्यादा व्यवहारासङ्करार्थमादरणीयैव। द्वैविध्यं चैतद् आचार्य-भरतेनापि बहुशो ध्वनितमप्यनधिकार्यत्वेन नाभिहितम्। तदेव पुनराग्नेयादौ स्पष्टमुक्तम्, नेयता कापि क्षतिः।

यत्तु प्राकृताप्राकृतौ रसौ क्रमेण लौकिकालौकिकौ कथ्येते इति। तन्न समीचीनम्; द्वयोरप्यलौकिकत्वात्। नहि जातु लौकिको रसोऽध्यात्मविद्यानां प्रधानत्वेन प्रतिपाद्यो भवितुमर्हति। स हि तृतीयपुमर्थगृह्यः, अन्यथा प्रस्थानभेदानुपपत्त्या बाभ्रव्यादिसंहितानामानर्थक्यमापतेदित्यादि भूयानुपप्लवः स्यात्।

अलौकिकत्वं चैनयोः लौकिकमर्यादातिशायित्वाद् दर्शयिष्यते चानुपदमेतत्। प्राकृतत्वं च पादविभूतिविलासविजृम्भितत्वम्, त्रिपादवैभवं चाप्राकृतमिति वस्तुस्थितिः। अत एवायं प्राकृतो 'रस' इति कथ्यते, अप्राकृतस्तु 'भाव' इति नाट्यशास्त्रे भरतपरिभाषा। वस्तुतस्तु अप्राकृतो भक्तिरस उच्यते, रसत्वव्यपदेशजीवातोस्तादृशानन्दात्मकतया उभयत्राप्यविशेषात्।

रसोपलब्धि-प्रकारः

रसोपलब्धिप्रकारस्त्वेषः—वक्ष्यमाणस्वरूपकैर्विभावानुभावव्यभिचारिभिर्व्यक्तः स्थायी एव रसतां भजते इति सिद्धान्तस्य सकलरसदर्शिभिराचार्यैरनुमोदित-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्वेऽपि स्थायिस्वरूपे, तद्व्यक्तौ च मतभेदनिबन्धनो मार्गभेदो विद्यत एव। तथा हि—तत्र आहङ्कारिके चित्ते कारणविशेषोद्बुद्धे सत्त्वे स्वेतरगुणावभिभूय प्रकाशमाने जातुचिदनुभूत - रत्यादिस्थायिसंस्कारोऽप्युद्बुद्धीभूय प्रतीयमानः, उपचीयमानः, पुष्यमाणः, अभिन्नायमान - नेदिष्ठचिच्छक्त्या आत्मीयत्वेन भुज्यमानो रसव्यपदेशभागिति कापिली प्रक्रिया। परन्त्वसौ जडत्व-परप्रकाश्यत्व-प्राकृतत्वादिमत्त्वाद् भिन्नमेव वस्तु नास्माकीनो रसः। भौतिकचित्ते हेतुविशेषाद् द्रुतिमति उदितप्रदिमनि मुद्रितो रत्यादिस्थाय्याकारः संस्कारः स्वोद्बोधक-महिमतिरस्कृतावृत्तिकः चिद्विशिष्टो रस इत्यौपनिषदेकदेशिनां सरणिः।

अत्र पूर्वोक्तदोषासत्त्वेऽपि चितोऽङ्गत्वोक्त्या श्रुतिस्वारस्यभङ्गो वर्तत एव। तत्परिहर्तुकामैः स्थाय्यवच्छिन्नभग्नावरणचिदेव रस इत्यभिहितम्। अस्मिन् पक्षे गौणत्वभानप्रयुक्तास्वारस्यरूपदोषस्य परिहारेऽपि तदव्यवहितोत्तरवाक्यसहितैकवाक्यतास्वारस्यभङ्ग—रूपदोषस्य विद्यमानत्वेन नास्यापि युक्तिसहत्वम्। तद्वाक्यं च **रसं ह्येवायं लब्ध्वा आनन्दीभवति** इति। तथा हि—एतद्वाक्यघटकाऽयंपदार्थकर्तृक-लाभकर्मैव भवतार सत्वेन विवक्ष्येत। ततश्च स्पष्ट एव स्वारस्यभङ्गः। भग्नावरणचैतन्यस्यैव अयम्पदार्थतया कर्तृ-कर्मणोरभेदापत्तेः।

न च सावरणस्यैव अयम्पदार्थत्वेन कर्तृताऽनावरणस्य कर्मतयोपाधिकभेदेन अविरोधान्न स्वारस्यभङ्ग इति वाच्यम्; स्वप्रकाशवादे किलावरणभङ्गमन्तरेण इतरस्यानपेक्षणाद् आवरणभङ्गादेव आनन्दीभवनप्राप्तेः पूर्वांशवैयर्थ्यस्य वज्रलेपायितत्वात्। एतेन 'सावरणीयं ह्यनावरणं रसं लब्ध्वा' इत्यादिव्याख्यानं कुर्वन्तः परास्ताः। 'सावरणो निरावरणः सन्' इत्येतावतैव तदभीष्टसिद्धेः।

तस्मादखिलानि कण्टकितवर्त्मान्युत्सृज्य परिष्कृतघण्टापथेन संचरिष्णूनां रसविदामेष खलु सिद्धान्तः—'सः=प्रकृतः, स्वरूप - तटस्थलक्षणलक्षितो ब्रह्म-परमात्मपर्यायो भगवान्, वै=निश्चयेन रसः=रसपदार्थः। तमेनं=रसमेव, नापरं, लब्ध्वा, अयम्=स्वल्पानन्दी जीवः, आनन्दीभवति=प्रशस्तानन्दो भवतीति। 'रसो वै सः, रसं ह्येवायं लब्ध्वानन्दीभवती'ति वाक्ययोरेकवाक्यतया इत्थमेव व्याख्याने प्रकृतशास्त्रस्य दर्शनताऽपि परमपुमर्थप्रापकतया सङ्गच्छते।

न च आवरणभङ्गवैशिष्ट्यमपि परमपुमर्थसंपादकत्वाक्षतिरिति वाच्यम्; तथा सति उत्तरमीमांसयैव गतार्थतायां रसशास्त्रस्यानारम्भणीयत्वापत्तेः। न चेष्टापत्ति; अन्यैरपि भवदभिमतोत्तरमीमांसाशास्त्रानारम्भणे तुल्ययुक्त्या इष्टापत्तेः सुवचत्वात्। न च उत्तरमीमांसायामपि प्रस्थानान्तरे कथङ्कारं नाम रसशास्त्रारम्भणीयतानिर्वाह इति शङ्क्यम्; गुडजिह्विकान्यायेन; तथा च **उपेयप्रतिपत्त्यर्था** इत्यादिपूर्वोक्तयुक्तेः सार्थक्यसम्भवात्। न चास्माभिरपि सार्थक्यमेवं सुसम्पादमिति साम्प्रतम्; अपारमार्थिकतापिशाचीभयादेवमुपगन्तुं भवतः असामर्थ्यात्। प्रकृतशास्त्रकृदभिमतरसस्य भवन्मते चरमोपेयत्वाभावाच्च।

तथा च परमर्षिभरताचार्यस्य सूत्रम्—**विभावानुभावव्यभिचारिसंयोगाद् रसनिष्पत्तिः** इति। अत्र विभावयन्ति=उद्बोधयन्ति प्रसुप्तस्थायिनमिति विभावाः, आलम्बनानि, उद्दीपनानि च। एवं च विषयतासम्बन्धेन स्थायिविशिष्टमालम्बनम्, स्वोद्बोधजनकासम्बन्धेन स्थायिविशिष्टमुद्दीपनम्। स्थायिपोषकत्वे सति आलम्बनचेष्टारूपोऽनुभावः। आलम्बनावच्छेदेनाविर्भूष्णुतिरोभूष्णुत्वे सति स्थायिपोषकभावो व्यभिचारीति बोध्यम्। सूत्रे पञ्चमी हेत्वर्था। हेतुत्वं च कारकत्व-ज्ञापकत्वान्यतररूपम्। ज्ञापकत्वं च तद्विषयकज्ञानजनकज्ञानविषयत्वम्। ज्ञानं चात्र त्रिविधम्, प्रत्यक्षम्, अनुमितिः, शाब्दधीश्चेति। प्रत्यक्षं तु द्विविधम्—यथार्थमयथार्थं चेति। अयथार्थ-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मपि द्विधा—दोषजन्यं भ्रमत्वेन प्रसिद्धमेकम्, द्वितीयन्तु इच्छाजन्यमारोपत्वेन ख्यातम्।

एवं च दमयन्त्यादिदर्शनजनित-नलादिसमवेत-रत्याद्युद्बोधस्य तत्कार्यकटाक्षादिकस्य सहचरितोत्कण्ठादीनां चानुकार्यनलादिनैव सम्बन्धात्तत्रैव रस उत्पन्नः, नटे तु तत्तदनुकृत्या सादृश्यमूलकारोप इति भट्टलोल्लटादयोऽवादिषुः।

केचन—नाट्यादिषु प्रकटविभावादिषु व्यञ्जनया नलादौ दमयन्त्यादिरतौ ज्ञातायां भावनादोषेण कल्पितनलत्वावच्छिन्ने स्वस्मिन् समुत्पन्नोऽनिर्वचनीयो दमयन्त्यादिविषयकरत्यादिरेव रस इति समगिरपत।

अन्ये तु—व्यञ्जनाऽनिर्वचनख्यात्यनभ्युपगमाद् भावनादोषेणात्मनि नलाद्यभेदग्राही दमयन्त्यादिरतिमदभेदबोधो विषयासत्त्वेऽपि मानसो भ्रम एव रस इत्यवोचन्।

परे तु श्रीशङ्कुकानुयायिनः—नलत्वेन गृहीते नटात्मके पक्षे अकृत्रिमत्वेन गृहीतैर्विभावादिहेतुभिर्नलादिगतरत्यादिरनुमीयमानो रस इत्युपागमन्।

अपरे च भट्टनायकानुवर्तिनः—नाट्यादिना व्यक्तिविशेषवृत्तित्वनिरूपितत्वाभ्यां जनितेऽपि स्थायिज्ञाने भावनया तयोः प्रमोषाद् रतित्वादिनैव प्रतीतरत्यादेः स्ववृत्तिरत्यादिसाजात्येन अनुभूतचररत्यादिसंस्कारोद्बोधे ज्ञानस्य स्वप्रकाशत्वेन सत्त्वोद्रेकेण आनन्दरूपो रसः शब्दस्य भोगाख्यतः तार्तीयीकव्यापारेण साक्षात्क्रियत इत्यभ्युपागुः।

इत्थं स्व - स्वशेमुषीविकाससाहायकमवलम्ब्य, पारमर्षसूत्रघटकसंयोगपञ्चमी-निष्पत्तित्रिकस्य विविधार्थान् उररीकुर्वन्तोऽभियुक्ताः स्व - स्वमतानुरूपेण रसतत्त्वं प्रहेलिकान्यायेन प्राचीकशन्।

परन्तु मुनिसम्मतरहस्यानाकलनाद् रसशास्त्रसिद्धान्तमार्मिकाणामश्रद्धेयान्येव अखिलान्येव उक्तमतानि, तदनुसारीणि इतराणि चानिर्दिष्टानि एकदेशिमतानि अपि तथैव। तथाच अश्रद्धाबीजानि—

तत्र प्रथमे तावत् विप्रकृष्टत्वात्, लौकिकत्वात्, काल्पनिकारोपविषयत्वाद् अर्थान्तरता। द्वितीयस्मिन् विमतानिर्वचनीयत्वाद् भ्रमविषयत्वात् तथात्वम्। तृतीयेऽपि भ्रमास्पदत्वमेव तादृशम्। तुरीयेऽपि भेदग्रहणेन बाधात् कथमपि भेदाग्रहेऽपि नलादौ भैम्यादिरतिग्रहस्य सामाजिकप्रवृत्त्यनौपयिकत्वात्, श्रव्यस्थले पक्षताज्ञानविरहाच्च अभिमतरसपरिपन्थिता दुर्निवारा। पञ्चमे तु प्रमाणाप्रतिपन्नस्य शब्दनिष्ठक्रमिकव्यापारत्रयाभ्युपगमस्यैवा अरुन्तुदतेति।

श्रीमदभिनवगुप्ताचार्यास्तु—विभावानुभावव्यभिचारिभिः संयोगाद् व्यञ्जनाद् रसस्य स्थाय्युपहितचिदानन्दात्मनः, निष्पत्तिः=स्वरूपप्रकाश इति सूत्रार्थं सिद्धान्तयन्ति स्म। फलबलकल्पनेन विभावादीनां साधारणीकरणात्मना व्यापारेण सर्वथा हि विशेषांशप्रमोषात् सामाजिकात्मनि स्थायी व्यज्यमानो रसः। 'दशमस्त्वमसि' इत्यादिरीतितः शब्दादप्यपरोक्षज्ञानाभ्युपगमान्न पारोक्ष्यप्रयुक्तमपि वैरस्यम्। उक्तालौकिकव्यापारमहिम्ना लौकिककार्यकारणभावप्रसरावरोधाद् दुःखजनकतया क्लृप्तेभ्योऽपि सुखोत्पत्तेः सुरतक्षणवर्त्यधरदशनादाविव अनुभविकत्वाद् अन्तःकरणावृत्तित्वाच्च अलौकिकत्वं निष्प्रत्यूहमेव।

कार्यत्व-ज्ञापकत्वाभावाद् भूत-वर्तमान-भविष्यत्ववैधुर्यात्, सविकल्पक - निर्विकल्पकवेद्यत्वविरहाच्च तादृशत्वं सुवचम्। नित्यत्वा-ऽऽनन्दत्व-स्वप्रकाशकत्वादिकं च रसस्य आत्मत्वादेव निर्विवादमेव। उत्पादविनाश-कादाचित्कत्वादिव्यवहारास्तु विशेषणचर्वणाविषयका एव इत्येव निष्कर्षं तत्र भवन्तो मम्मटभट्टप्रभृतयः समाद्रियन्ते स्म। अन्येऽपि रसशास्त्रनिबन्धारः प्रायेण एनामेव दिशमनुसस्रुः।

इयांस्तु विशेषः—सर्वमप्येतद् दिग्दर्शनविषया

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारते षड्ऋतवः

— श्रीमती पूनम पाण्डेया एम० ए० —

चञ्चला प्रकृतिः सर्वतः परिवृतं प्रस्तौति। न कदाचित् प्रकृतिः स्थिरीभवति। कदाचित् विपुलाः वर्षाः भवन्ति, क्वचित् आतपातिरेकः। अपरत्र रमणीयः कालः, एवं विभिन्नरूपमाकृतिं प्रकटयति निसर्गः सर्वेषु देशेषु। अस्माकं भारतवर्षमपि ऋतूनां प्रदर्शनं करोति। किन्तु भारतवर्षे यावन्त ऋतव उपलभ्यन्ते, न तावन्तोऽन्यत्र। अत्रत्याः षड्ऋतवः यथाक्रमं नामग्राहमुल्लिख्यन्ते—वसन्तः, ग्रीष्मः वर्षाः, शरत्, हेमन्तः, शिशिरश्च। एतेषां सर्वेषां वर्णनं काव्येषु अतिरमणीयं वर्तते। गुणदोषौ च सहैव वर्तते। यः कश्चन ऋतुः वातप्रकृतिकपुरुषस्य कल्याणकरः, स एव पित्तप्रकृतिकस्य कष्टप्रदः। किन्तु सर्वेषाम् अनिवार्यता वर्तते। तथा हि वर्षा न भवन्ति चेत्, अन्नं नोत्पद्येत। वसन्तो न चेत् पुष्पाणि न प्रस्फुटेयुः। आम्रादयो वृक्षाश्च निष्फला भवेयुः। शिशिरं न भवति चेत् उष्णता वर्धेत। किन्तु सर्वत्र 'अति सर्वत्र वर्जयेत्' इति न्यायेन आधिक्यं न रोचते।

वसन्तः ऋतुराजः इति साहित्ये सर्वत्र संगीयते। चैत्र-वैशाखयोः वसन्तः। अस्मिन् काले रसालवृक्षः मञ्जरितः। नातिशीतं, नात्युष्णं च वातावरणम्। सर्वत्र प्रसन्नता भवति। शीतकालिकानि शस्यानि गृहमानीयन्ते। अस्य ऋतुराजस्य वर्णनं शिशुपालवधे (६, २) यथा—

नवपलाशपलाशवनं पुरः स्फुटपरागपरागतपङ्कजम्।
मृदुलतान्तलतामलोकयत् स सुरभिं सुरभिं सुमनोभरैः॥

ऋतुसंहारे च रमणीयं चित्रमस्य अङ्कितम्।

→विनेयोन्मुखीकरणाय श्रीभरताचार्येण प्राकृतरस-निरूपणव्याजेन प्रदर्शितम्। वास्तविकतया उद्देश्य-भूतोऽप्राकृतरसस्तु श्रीभगवदालम्बनक एव, तस्यैव अखिलशेषित्वेन चरमप्राप्यतया परमपुमर्थफलत्वेन चौपनिषत्स्मृति-पुराणादिषु व्यवस्थापिततया निखिल-शास्त्रदर्शनानां यथायथं साक्षात्परम्परासाधारण्येन तन्निरूपणौपयिकान् भूयः प्रकारानाश्रित्य तत्रैव पर्यवसानस्य अखिलतत्त्वविवेचकसार्थसम्मतत्वाद्। एवं च निसर्गतोऽलौकिके तस्मिन् यादृगलौकिकता-विविधित्सया नाट्यादिषु लोकातिगानन्दानुभवानु-गुणसाधारणीकरणोररीकरणमुपेयते, तादृशत्वस्य औत्सर्गिकतया आनन्दव्यक्तिप्रयोजकत्वांशे फलानु-पधानेऽपि परत्वोपयोगित्वेन नाप्रयोजकता। अत एव प्रकारभेदोन्नयनाय आचार्यैरेष 'भक्तिरस'नाम्ना व्यपदिश्यते। व्यतानि चायम् इतोऽपि बंहिष्ठविधाभिः कृष्णद्वैपायनादिभिराचार्यैरिति न तिरोहितं विदुषाम्।

रसमात्रस्य चास्य गौण-मुख्यादिभेदाः, तत्प्रभेदाः, विभावादीनां चातिभूमानं प्राप्ताविभेदप्रकाराः विद्वद्भिः प्रबन्धेन बहुषु निबन्धेषु निरूपिताः, तत्तत्प्रकीर्णत्वादि-रूपैस्तत्सर्वं पुनरवसरे कदाऽपि विज्ञसहृदयेभ्य उपायनीकरिष्यते।

यत्तूपहृतं तन्निजसौजन्यगरिम्णा मरालचातुरी-धुरीणाः स्वपरविवेचनविधुरा नैरपेक्ष्यपवित्रमनसा स्वीकुर्वन्तु इत्याशासानो विरमति मुधा विस्तरादिति।

गुरोः प्रसादाल्लब्धेऽस्मिन् रसतत्त्वविमर्शने। मदीयं नास्ति किञ्चित्ताः यदि स्युस्त्रुटिर्भिविना॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रघुवंशस्य नवमसर्गे अपि मधुमासः द्रुमवतीमवतीर्य वनस्थलीमाविर्भूत इति वर्णितः। किन्तु शीतलादयो रोगा अस्मिन् काले प्रादुर्भवन्ति, जनहानिश्च महती जायते इति दैवदुर्विपाक.। तथापि मार्गाणां स्वच्छता, जलस्य रमणीयता, शनैः शनैः ग्रीष्मस्य प्रभावः इति दृश्यपरम्परा चेतः प्रसादयति।

ज्येष्ठाषाढयोः ग्रीष्मः, स च 'निदाघ' इति नामान्तरेण व्यपदिश्यते। इह काले सूर्यस्य प्रखरातपः सर्वान् ज्वलयति। कदाचित् उष्णाधिक्येन स्वेदप्रवाहः कदाचित् चारवायुः (लू) चलति। रसालफलानि परिपक्वानि जायन्ते, जम्बूफलानि च सुलभानि। नद्यः क्षीणक्षीणा भवन्ति, जलस्य च महत् कष्टं भवति। वायुः रोचकः, जलञ्च प्रियं भवति। नदीषु स्नानं रोचते सर्वेभ्यः। अस्य वर्णनं कालिदासेन शाकुन्तले कृतम्—

सुभगसलिलावगाहाः पाटलसंसर्गसुरभिवनवाताः।
प्रच्छायसुलभनिद्रा दिवसाः परिणामरमणीयाः॥

भारते ग्रीष्मस्य कष्टाधिक्येन प्रवर्तमानाः अधिकारिणः विद्यालयादिषु अनध्यायमुद्घोषयन्ति। सम्पन्नाः पुरुषास्तु आधुनिकं वैज्ञानिकसौविध्यमनुसरन्ति। निदाघापावरणप्रक्रियां सम्पादयन्ति। विद्युद्व्यजनादिना तापनियन्त्रणेन वा यन्त्रेण सुखं लभन्ते। अपरे च पर्वतादिषु विश्रामं प्राप्नुवन्ति। उच्चस्थानेषु न ग्रीष्माधिक्यं भवति, यथा काश्मीरे उत्तराखण्डे च।

वर्षाः श्रावण-भाद्रयोः भवन्ति। तस्मिन् काले आकाशं सदा मेघाच्छन्नं भवति। क्वचित् प्रचुरा वृष्टिः, क्वचित् अल्पवृष्टिश्च भवति। राजमार्गा अपि पिच्छलाः, कर्दमकलुषिताः भवन्ति। नद्यः अतिवेगेन प्रवहन्ति, आर्द्रा च भूमिः सञ्जायते। येषां गृहं न सुव्यवस्थितं ते कष्टं लभन्ते। आकाशे विद्युत्प्रभा अतिरमणीया। वाल्मीकिरामायणे अतिहृदयावर्जकं वर्षावर्णनं दृश्यते—

विद्युत्पताकाः सबलाकमालाः शैलेन्द्रकूटाकृतिसन्निकाशाः।
गर्जन्ति मेघाः समुदीर्णनादा मत्ता गजेन्द्रा इव संयुगस्थाः॥

मृच्छकटिकस्य पञ्चमाङ्के तु अतिवृष्टेर्वर्णनं मर्मस्पर्शि शोभनं च दृश्यम्। वर्षाकाले कवीनां नवाः प्रेरणाः जायन्ते, इत्याहुः साहित्याचार्याः। मेघदूतं च वर्षाकालस्यैव काव्यम्। तत्र वर्षाकाले प्रकृतेः अतिरमणीयं चित्रं कालिदासेन चित्रितम्। यथा—

नीपं दृष्ट्वा हरितकपिशं केसरैरर्धरूढै-
राविर्भूतप्रथममुकुलाः कन्दलीश्चानुकच्छम्।
जग्ध्वाऽरण्येष्वधिकसुरभिं गन्धमाघ्राय चोर्व्याः,
सारङ्गास्ते जललवमुचः सूचयिष्यन्ति मार्गम्॥२१॥

वर्षासु सम्पन्नानां यथानन्दो भवति तथैव दुःखं च निर्धनानाम्।

वर्षानन्तरं शरत्कालः आश्विन-कार्तिकयोः मासयोर्भवति। अस्मिन् काले जलं प्रसन्नं जायते, आकाशं च स्वच्छं चन्द्रः अमृतमिव वर्षति। अयमपि कालः वसन्त इव आनन्दप्रदः। भट्टिर्वर्णयति—

न तज्जलं यन्न सुचारुपङ्कजं,
न पङ्कजं तत् यदलीनषट्पदम्।
न षट्पदोऽसौ न जुगुञ्ज यः कलं,
न गुञ्जितं तन्न जहार यन्मनः॥

वर्षाकालिकानि शस्यानि परिणामपीतानि जायन्ते। मार्गाश्च शुष्काः भवन्ति। दुर्गापूजादिकमस्मिन्नेव काले भवति। अवकाशश्च विद्यालयादिषु भवति। आनन्दलाभाय भिन्नानां स्थानानां यात्रामपि जनाः कुर्वन्ति। शेफालिका रात्रौ पुष्पं वितनोति। बन्धूक-पुष्पाणि च रक्तानि मध्याह्ने प्रस्फुटन्ति।

मार्गशीर्ष-पौषयोः मासयोः हेमन्तः। अस्मिन् काले सर्वं शीतायते, वायुरपि अतिशीतो भवति। जनाः बहूनि वस्त्राणि परिदधति, किन्तु स्वास्थ्यं सर्वेषां सुकरं भवति। कफादिकं वर्धते इति तु अन्यत्।←

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृत-प्रचार-तन्त्रम्

-- विद्याभूषणः गणेशरामशर्मा --

(२)

इत्थमेतत् क्षेत्रद्वयं देश-काल-पात्रत्व-परिस्थिति-प्रभृत्यनुकूलं परिष्कृत्य, तदनु प्रचार-बीजानि वपेद् विचक्षणः प्रचारकः।

रूपात्मक-प्रचारः

अथेदानीं विज्ञानसृष्टानां साधनानां नवनवानां समुपयोगबाहुल्यं विलोक्य प्रचारस्य तृतीयं क्षेत्रं रूपात्मकमपि कल्पयितुं सुशकम्। चक्षुरिन्द्रियग्राहिभिः चित्ररेखाभिः, अक्षरैः, छायाचित्रैः, वेशविन्यासैः, रङ्गैः, पदार्थैः, चित्रकलाकृतिभिः प्रदर्शिनीभिश्च यत्र परोक्षं प्रत्यक्षं वा प्रचारः सुकरः स्यात्, तत्किल रूपात्मकं क्षेत्रं प्रचारस्य वक्तुं युज्यते।

विशेषतः संस्कृत-प्रचारविषये

अथाधुनास्माकं धर्मस्य, सदाचारस्य, सभ्यतायाः, संस्कृतेर्ज्ञानस्य, विज्ञानस्य च सर्वस्वभूतायाः, वाङ्मयस्य आर्याणामादिस्रोतस्विन्याः, स्वसाहित्यप्रबन्ध-शास्त्र-ज्ञानगम्भीरतत्त्ववत्याः श्रीमत्याः सुरभारत्याः संस्कृत-जनन्याः प्रचारः कथं कर्तव्य इति विषयेऽस्मिन् पङ्क्तीनामासां लेखकेन मयात्र केचन प्रचारोपाया यथामति प्रस्तूयन्ते। अमीषां प्रस्तावानामुपयोगित्वे, सारवत्तायां, साध्यासाध्यविमर्शे चात्रभवन्तो भवन्तो बुधाः कर्मयोगिन एव प्रमाणम्। परन्तु अस्मदीयेयं द्रढीयसी धारणा यदेवंविधानां प्रचारोपायानामङ्गीकरणेन, कार्यरूपप्रदानेन च संस्कृतभाषायाः प्रसृतौ, तत्साहित्यविकाशे, तदाश्रयिणां लोकानामस्मादृशां, किं बहुना, समग्रस्य राष्ट्रस्य, देशवासिनां च सर्वेषां प्रजाजनानां हितसाधनं भवेदेव। तत्प्रकृतमनुसरामः।

संस्कृतं लोकभाषा विधेया

१. संस्कृतभाषायाः सार्वभौमं प्रचारं कामयमानैरस्माभिरिदानीं यावत् सर्वादौ भाषणात्मके प्रचारक्षेत्रे विचारबीजानि, भावबीजानि च योजनापूर्वकं निःस्रष्ट-

---

→वर्षाकालिकानि शस्यानि पक्वानि जायन्ते, येन गृहस्था अतिप्रसन्नाः भवन्ति। सूर्यः मन्दरश्मिर्जायते, आतपः प्रियो भवति। प्राचीनकाले नार्यः कुङ्कुमादीनाम् उष्णतावर्धकपदार्थानां सेवनं च कुर्वन्ति स्म।

माघफाल्गुनयोः शिशिरम्। अयमपि कालः हेमन्त इव शीतप्रधानः। कश्चित कविः कथयति—

रात्रौ जानुर्दिवा भानुः कृशानुः सन्ध्ययोर्द्वयोः।
इत्थं शीतं मया नीतं जानुभानुकृशानुभिः॥

शिशिरे वस्त्राणामाधिक्यं प्रतिकरं भवति। विशेषतः पौष-माघयोस्तु शीतं चरमामवस्थामापद्यते। कदाचित् शीततरङ्गा वान्ति, एतेन शीतमतिशयेन वर्धते। पर्वतादिषु उच्चैः स्थानेषु तु आवासः अतिकष्टकरो भवति। अग्निसाहाय्येन तत्रस्थाः कालं नयन्ति। बदरीनाथादिषु क्षेत्रेषु तु न कोऽपि तिष्ठति। संसारस्य अयमेव धर्मः। कालिदासेन सत्यमेवोक्तम्—

लोको नियम्यत इवैष दशान्तरेषु।

भारतवर्षं षण्णामृतूनां प्रधानं क्षेत्रम्। कुत्रचित् हर्षः, कुत्रचित् च दुःखं भवति। समुद्रतटादिषु एक एव समयो भवति समशीतोष्णः। तत्र वर्षाः भवन्ति, अन्यथा न किञ्चित् कालपरिवर्तनम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्यानि। देववाणीयं संस्कृता वाक् तत्त्वज्ञानसारान्तर्बलवती, सर्वार्थशक्तिसम्पन्ना, सर्वाङ्गपरिपुष्टा, सरसमधुरा, प्रसङ्गगम्भीरभावाह्लादिनी, तेजस्विनी चोजस्विनी चापि वर्तमानसंसारे स्वराष्ट्रे भारते विद्वज्जनकुटुम्बेष्वपि च न सार्वकालं सर्वविधव्यवहारेषु सर्वजनैः प्रयुज्यते; न चान्यान्यभाषा इवात्मनो लोकभाषात्वं प्रख्यापयतीति चिन्त्यम्।

पुरातत्त्वेतिवृत्तविदां, भाषाविज्ञानशास्त्रिणां, शिक्षापद्धतिविशेषज्ञानां, चैतन्मतं यद्धि संस्कृतभाषा न कदापि लोकभाषात्वमाप। अस्या ह्रासकारणेषु परश्शतेषु इदमप्येकं यन्नेयं भाषा मनुष्यजीवनस्य सर्वक्षेत्रेषु, अन्याः प्रान्तभाषा इव कोटिशो मानवानां मुखैर्भाषितुं सुसाध्या। इयमतीतेषु, कालखण्डेषु लोकभाषासीत् न वेति विषये किमपि सत्यं स्यात्। परन्त्वद्यत्वे तु वयं प्रत्यक्षमेवावलोकयामहे यदस्या भाषाया भाषणे व्यवहारः सर्वभाषापेक्षया न्यूनातिन्यूनो वर्तते। अस्मद्देशे हि इयं संस्कृतगवी केवलं शास्त्रार्थवादिनां दार्शनिकानां केषाञ्चित्पण्डितानां, कर्मकाण्डमात्ररतां वैदिकानां, ज्योतिर्विदां, वैद्यानां, सम्प्रदायाचार्याणां, मोहान्तानां, यजमानवृत्तिसाधकानां ब्राह्मणानां, शिक्षा-भिक्षार्थिनामध्यापकानामेव कुलेषु धर्मसंस्कार-विधिविधानेषु, सन्ध्या-होम-यज्ञश्राद्धकर्मस्वेव यदाकदा किञ्चित् किञ्चिद् विरलविरलं प्रयुज्यमाना विलोक्यते। तथापि च नात्मनो भास्वरं शुद्धं स्वरूपमभिरक्षितुं पारयति। अतो भाषण - व्यवहारे बताऽपक्षीयते। अतः सर्वादौ भाषाया अस्या लोकभाषात्वं साधनीयम्। लोकभाषात्वसाधनाय भाषणेऽधिकाधिकं प्रयोगोऽस्याः संस्कृतवाण्या अपेक्ष्यते। अतो भाषणात्मकप्रचारस्याधोलिखिता अन्ये चाप्येवंविधाः सदुपायाः समवलम्ब्याः स्युः।

संस्कृतमाध्यमेन जीवनव्यापाराः परिचालनीयाः

(अ) सर्वादौ संस्कृतज्ञा विद्वांसो, विशेषज्ञा, अल्पज्ञाः, संस्कृतप्रणयिनश्च स्वजीवनव्यापारेषु अधिकाधिकं संस्कृतभाषामाध्यमेनैव भाषणमाश्रयेयुः। सरल - सरलया, सर्वसाधारणोपयुक्तया, बालबोध्यया च संस्कृतभाषया यदि सन्तो महान्तो विद्वांसो भाषेरंस्तदा स्वभावतोऽनुकरणशीला बालाः, कुमाराः, कुमार्यो, योषितः, सर्वसाधारणाश्चापि जनास्तेषां भाषणपद्धतिमनुकुर्वन्तः परोक्षप्रकारेणैव संस्कृतबोधे प्रभवेयुः। स्वयमेव हि तेऽस्याः सुरगिरो निसर्गमाधुरीरससमास्वादनरसिकाः सन्तो भाषणे सरस्वतीं तामिमां विनायासं प्रयुञ्ज्युः।

अथ च विशेषज्ञैः अल्पज्ञानां बालादीनां व्याकरणसम्बन्धिन्यस्त्रुटयो वाक्यस्खलनानि वा बालभाषितामिति कृत्वा क्षन्तव्यानी। यदि च दर्शनकेसरिणो, वैयाकरणव्याघ्रा, नैयायिकभल्लूकाः, साहित्याचार्यभुजङ्गमा महाभागा भाषणोद्यतानल्पज्ञान् संस्कृतप्रणयिनो न क्षमेरंस्तेषामशुद्धिसंशोधनाय स्वभावमार्दवं च नाश्रयेयुस्तदा तद्विद्याप्रभावेण,कुशाग्रधिषणाकार्कश्येण, तेजस्वितया, तद्व्यक्तित्वगाम्भीर्यातिशयात्, स्वस्य चाल्पज्ञतया 'संस्कृतभाषणमतिकठिनम्!' इति मत्वा न हि सर्वसाधारणाः संस्कृतभाषणव्यवहारे समुत्सहेरन्, प्रत्युत नैराश्यमाश्रित्य पश्चात्पदाः पराङ्मुखा भयविगलवाः सन्तो व्यापारादस्माद् दूरं पलायेरन्।

एतत् प्रायेणानुभूयते प्राप्तावसर, यत् सर्वशास्त्रविदां, प्रखरप्रतिभावतां, समर्थानां विदुषां सभासु तेषां प्रचण्डव्यक्तित्वप्रभावोपहतात्मानः संख्यावन्तः संस्कृतप्रणयिनो जनास्तत्समक्षं संस्कृतभाषणे लज्जन्ते, हतोत्साहाश्च सन्तो विरमन्ते वाग्व्यापारात्। अतो विदुषामेतत् प्राथमिकं कर्तव्यमास्ते, यत्तेऽल्पज्ञानां स्खलनानि क्षाम्यन्तस्तेभ्यो न केवलं भाषणावसरं प्रयच्छेयुः, अपि तु तान् सततं प्रोत्साहयेयुः। एवं कृते संस्कृतस्य भाषणप्रचलनं सुकरं स्याल्लोकभाषात्वसाधनेऽपि च प्रचारः सम्भवेत्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शिक्षाया माध्यमं संस्कृतं भवेत् !

(आ) विश्वविद्यालयेषु, माध्यमिकविद्यालयेषु, सर्वविधपाठशालासु, संस्कृतशालासु च यत्र यत्र संस्कृतभाषा पाठ्यते प्राध्यापकैरध्यापकैः शिक्षकैश्च, तत्र तत्र सर्वत्र गुरुवर्यैः संस्कृतभाषया माध्यमेनैव शिक्षणकार्यं सम्पादनीयम्। सारगर्भितस्य, जटिलस्य, महतो महीयसोऽपि विषयस्य पाठने किलार्थो, भावार्थो, व्याख्या, शब्दपर्यायनिर्वचनमुदाहरणनिर्देशोऽशुद्धि-संशोधनं, सन्दर्भव्याख्यानं, विषयप्रवेशः, सिद्धान्त-स्थापनादि सर्वमपि चाध्यापनकर्मकाण्डं सरलाति-सरलया संस्कृतभाषया क्रियेत। तदा सतताभ्यास-वशाच्छनैः शनैः क्रमशो विकाशाच्च अध्यापकानां भाषणक्षमत्वं जायेत, छात्रा अपि च तत्तत्प्रकरणो-पात्तान् विविधविषयप्रसङ्गान् श्रावं श्रावं भावग्रहणेऽर्थ-बोधे च समर्थाः स्युः। स्वयं चापि ते संस्कृते भाषितुं प्रभवेयुः। प्रचारस्तु भवेदेवेत्थं संस्कृतस्य।

शिक्षासंस्थासु यदा सम्मेलनानि, दीक्षान्तसमारोह-संस्काराः, खेलकूर्दनप्रतियोगिताभियानानि भवन्ति तत्र संस्कृतज्ञैः शिक्षकैरहमहमिकया संस्कृतभाषणैः प्रगल्भता धृष्टता च प्रदर्शनीया। एवंविधे कर्मण्यादौ संस्कृते भाषणोद्यतानां संस्कृताध्यापकानामनभ्यासवशात् कदाचित् काश्चन अशुद्धयो जायेरन्। किन्तु तैरशुद्धि-मिमां परित्यज्य साहसिकैर्भाव्यम्। शुद्धमशुद्धं वा किं नु बत भवेत्, तथापि संस्कृतेनैव तैर्नूनं भाषणीयम्।

एतेन प्रचारस्तु स्यादेव, इतोऽधिकं संस्कृतद्रोहिणा-मांग्लभाषाया दासत्वमापन्नानामपि संस्कृतगिरां माधुरीपरिचयात् मनांसि परिवर्तेरन्। आंग्लशिक्षा-प्रभावितैः कैश्चिद्भारतीयैरपि संस्कृतस्य भाषणे लेखने च व्यवहारोपयोगित्वमाक्षिप्यते तत्कार्यतो विरोध्य सुरवाण्यास्तेजस्वित्वं, स्फूर्जदोजस्वित्वं, प्रचण्डप्रभावशालित्वं च प्रख्याप्य स्वोत्कर्षाद्विरोधिनां शिरसि परोक्षरूपेण पादप्रहारो विधेयः।

आकाशवाणी-माध्यमग्रहणम्

(इ) संस्कृतपण्डितैः अस्माभिः आकाशवाणी-प्रसारणकेन्द्रेषु बलीयः प्रवेशो विधेयः। यथाऽन्य-भाषाभिः समाचाराः, प्रवृत्तयश्च राष्ट्रियाः प्रसार्यन्ते तथैव संस्कृतगिरापि समाचाराः, सक्षिप्तानि भाषाणानि, मनोविनोदवार्ता, गीतयो मनोहराः, परिसंवादाः, एकाङ्कनाटकानि, सामयिकराजनीतिगत-विषयाणामालोचनाः टोका-टिप्पण्यश्च बहुभ्यः केन्द्रेभ्यः प्रसार्यन्ताम्। सरलातिसरलेन, सर्वजनहृदयग्राहिणा संस्कृतेन प्रसारिता विषया नूनमेव स्वरूपसौन्दर्येण लोकरुचिमाकर्षेयुः। संस्कृतप्रचारोऽप्यवश्यं जायेत। अत्र कर्मणि सर्वादौ सार्वकारस्य मन्त्रिमहाभागाः, तदनु निर्देशकाः, ततोऽधिकारिणश्च सम्बद्धाः प्रार्थ्याः अनुरोध्या वा। एवं कृते बहु साफल्यं व्रजेत्संस्कृतप्रचारः।

नेतॄणां संस्कृत-चरित्राणि

(ई) वर्तमानकालेऽस्मद्देशस्य सर्वेष्वपि प्रान्तेषु ये महान्तः प्रतिभावन्तः, स्वनामधन्याः, सुप्रसिद्धाः संस्कृतज्ञा विद्वांसः सन्ति तेषां कृतयो रचनाश्चोत्कृष्टा-स्तज्जीवनसम्बन्धिवृत्तजातं दैनन्दिनं, यातायातं, कार्यकलापाः, पुरुषार्थाध्यवसाया विलिख्य रेखाचित्र-रूपेण पुस्तिकाकारं च मुद्रापयित्वा प्रकाशन्ताम्। विशेषतो वाराणसीस्थानां, पञ्चाम्बुप्रान्तीयानां, दाक्षिणात्यानां, गुर्जराणां, राजस्थानीयानां, वङ्गी-यानां, सुप्रतिष्ठित-प्रतिष्ठानेषु संस्थासु च संस्कृत-साहित्यं सेवतां, पुरातत्त्वेतिवृत्तसम्बन्धे शोधान्वेषण-कार्यं कुर्वतां, महादार्शनिकानां, कवीनां, सिद्धासनानां सम्पादकानां पत्रकाराणां लेखकानां, शङ्कराचार्य-प्रभृतीनां धर्माचार्याणां, मोहान्तानां, संस्कृतोन्नतये सदा-सर्वदा प्रयतमानानां, तदभ्युदयाय च मुक्तहस्तं प्रचुरधनमुत्सृजतां, संस्कृतहितैषिणां नेतॄणां, मन्त्रि-प्रवराणामन्येषां च संस्कृतसंरक्षकाणां महानुभावानां नामसङ्कीर्तनपूर्वकं तच्चारुचरितविद्वत्तासदाचारादि-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुणगणख्यापनं संस्कृतभाषया संक्षेपतो विस्तरतो वा विलिख्य प्रकाशनीयम्। इत्थमाचरिते सति ज्ञान-विज्ञानवयोवृद्धानामसमन्मान्यानां सज्जनानां लोके परिचयवृद्धिः, सम्भावना, समादरः स्यादेव, अनेन साकं संस्कृतभाषाप्रचारोऽपि सुतरां भवेत्।

ग्राम्य-जीवनं संस्कृतं विधेयम्

(उ) संस्कृतभाषायाः प्रचारं चिकीर्षवो वयं मनोविज्ञानोक्तैर्विधिभिः लोकजीवने प्रवेशं विदध्याम। जनसाधारणा नगरेषु ग्रामेषु वा यत्र तत्र समवेताः सन्तोऽवकाशसमये गल्पगोष्ठीं कुर्वन्ति स्वभावतस्तत्र तत्र गूढाभिसन्धिना प्रचारक्षेत्रं यदृच्छया स्वयमेवोपपन्नमिति मत्वा काश्चन संस्कृतमयीः काव्यसूक्तीः सुभाषितानि चेतश्चमत्कृतिकराणि चित्रकाव्यपद्यानि चाख्यायिका हितोपदेशकात् श्लोकांश्च बहुशः श्रावयित्वा प्रचारः साध्योऽस्माभिः! यत्र कथापारायणं, हरिकीतनं, सङ्गीतमण्डली, निर्वाचनप्रतियोगिता, अतिथिसम्भावनासमितिः, रसिकयुवजनविश्रम्भालापगोष्ठी, व्रतोद्यापनतीर्थपूजादिप्रसङ्गो, नेतृस्वागतसंयोजनमित्यादिसर्वविधप्रकरणेषु तत्सामान्याचरणपरैः संस्कृतप्रचारमभिलषद्भिरस्माभिः अवश्यमेव सम्मिलितव्यम्।

किमन्यदधिकं ब्रूयाम? नटाः, विटाः, धूर्ताः, विदूषकाः, व्यभिचारिणश्चरित्रभ्रष्टाः, सुरापाः, लुण्ठकाः चौरा, व्यसनशतग्रस्ताः, प्रमादिनो, वातुला, जल्पाका, अहम्मन्या, उद्दण्डाः सर्वजनैस्तिरस्कृता, विपद्विक्लवाः, रोगिणः, श्रमजीविनो, ग्राम्याः, जडाश्चापि जनास्तद्वृत्तिसमनुकूलमाचरद्भिः मर्मज्ञैः प्रचारपात्रतां नीयन्त इत्यत्र मार्मिका एव प्रमाणम्।

संगीतं प्रचारस्य महत्तमं माध्यमम्

संगीतं तु तावत् प्रचारस्यानुत्तमं साधनमिति न विस्मर्तव्यमत्र प्रसङ्गे। सङ्गीतस्वरमाधुरीसरसाः संस्कृतगीतयो यदि प्रचारे प्रयुज्येरंस्तदा अनायासं प्रचारसिद्धिः स्यादेवेति नो द्रढीयान् विश्वासः। सङ्गीतं यथाभावोत्तेजनया लोकमनोवृत्तीः समाकृष्य सुनिश्चितोद्देश्यसाधने प्रेरयति जनान्, तथानन्यत् किमपि। सङ्गीतमुखः प्रचारो व्ययनिर्व्यपेक्षो महतोमहीयान् अल्पश्रमसाध्योऽनल्पफलप्रदश्च भवतीति ध्रुवम्। एवंविधं प्रचारं कर्तुं संस्कृते सरलातिसरला मुक्तककाव्यरूपा गीतयोऽपेक्ष्यन्ते। यावद्वयं जानीमहे, सुरभाषया गीतिकाव्यनिर्माणं हिन्द्यां छायावादपद्धत्यैव भवितुमर्हति। अयं हि सङ्गीतप्रधानप्रचारो महतो महीयान् अल्पश्रमसाध्योऽनल्पफलदो भावीति सुनिश्चितम्। आर्यसमाजस्य प्रचारकाः सङ्गीताश्रयेण महत् साफल्यमवापुरिति प्रत्यक्षमत्र प्रमाणम्।

संस्कृतप्रार्थनाः सूक्तयश्च शिक्षासंस्थानेषु प्रचारणीयाः

(ऊ) संस्कृतभाषायाः प्रचारमभिलषद्भिरस्माभिः सार्वकारं सम्प्रार्थ्य तथा प्रयतितव्यं यथाऽस्मद्देशे सर्वविधविद्यालयेषु पाठशालास्वपि च संस्थासु संस्कृतभाषानिबद्धानां प्रार्थनानां प्रचलनक्रमः प्रारभ्येत। गीतोपनिषच्छ्लोका, आचार्यकृतस्तुतिस्तोत्रपद्यानि, देशभक्तिप्रतिपादिकाः सूक्तयो, नेतॄणां तपस्त्यागकर्मण्यतोपवर्णनपराणि च्छन्दांसि, जनसङ्घटनोत्तेजका राष्ट्रस्य प्राकृतिकस्वरूपसौन्दर्ययशोवर्णनप्रधाना गीतयश्च यदा देशवासिनां कोटिकोटिकण्ठैः प्रतिप्रान्तं, प्रतिनगरं, प्रतिग्रामं, प्रतिगृहं, सर्वविधसंस्थासु च समुच्चारयिष्यन्ते, तदाऽस्याः सुरभारत्या गगनोद्भेदिभिर्निर्घोषैः स्वत एव हि प्रचारः साधीयान् भविष्यति। केवलं प्रचार एव, अपि तु सदाचारास्तिक्यप्रतिष्ठानुशासनप्रियत्वं, स्वधर्मनिष्ठा, चारित्र्यशिक्षा, पूज्यान् प्रति श्रद्धाभावो, नेतृष्वास्था, सत्संस्कारप्रवणत्वं चेति महान्तो लाभाश्छात्रेभ्यः शिक्षकेभ्यः सर्वसाधारणेभ्यश्च स्वदेशवासिभ्यः सम्पद्येरन्। कृते ह्येवं प्रचारे संस्कृतगिरां, राष्ट्रस्य,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समाजस्य, सभ्यतायाः शिष्टाचारस्य, संस्कृतेर्धर्मस्य चाभूतपूर्वो महानुपकारो जायेत् ।

गुणिनां गुणवर्णनं नितरामपेक्ष्यम्

(ऋ) संस्कृतज्ञानां शिरसि महानेवाक्षेपो नित्यमेव कर्णाकर्णि श्रूयते यत्तेऽन्यान् संस्कृतज्ञान् स्वापेक्षया अल्पज्ञानव्युत्पन्नांश्च घोषयन्तो व्यक्तिगतं स्वोत्कर्षं साधयितुमिच्छन्ति, सामाजिक्यनुदारता-परोत्कर्षाऽसहिष्णुत्वम् अखर्वगर्वादिभिर्दोषैश्च अनवसरे मिथो द्रुह्यन्ति, कुप्यन्ति वा स्ववर्गीयेभ्यश्चेति । गुण-ग्राहकतया, सहृदयतया, सहयोगप्रदानेन, सङ्घटन-भावेन वा संस्कृतज्ञा जनाः सहकर्मणां, सहधर्मिणां, स्वसमाजसदस्यानां वा जातुचिन्नो प्रशंसनं विदधती-त्यपरोऽयं महानर्थजनको विडम्बनामयो दोषः संस्कृत-पण्डितानां शिरसि कलङ्करूपो निःक्षिप्यते कैश्चित् समाजमनोविज्ञानशास्त्रविद्भिः । अत्र हि तथ्यं तु यद्वा तद्वा भवेत्, वा न भवेत्, परन्तु **अतथ्यस्तथ्यो वा हरति महिमानं जनरवः** इति संस्मृत्य नीतिवाक्य-मस्माभिः सर्वैः संस्कृतज्ञैः सुरभारतीसेवमानानां स्व-वर्गीयाणां श्लाघापरको गुणगणानुवादवर्णनानुरूपः प्रचारोऽपि विधेयः । अल्पज्ञस्यापि संस्कृतज्ञस्य गुणान् **परगुणपरमाणून् पर्वतीकृत्य नित्यं निजहृदि विकसन्तो** मुक्तकण्ठं श्लाघेमहि । अथ च येऽस्माक-माराध्यायाः सुरसरस्वत्याः प्रेयांसः पुत्रा अनुपमवाग्-वैभवा महान्तो विद्वांसो विशेषज्ञाः शास्त्राचार्याः, कवयः, कलाविदश्च सन्ति तेषां प्रशंसनं त्वस्माक-मवश्यकर्तव्यताको धर्मः । संस्कृतस्य प्रचारधिया महामहिममहीयसां प्रकृष्टप्रतिभाजुषां दार्शनिकानां, कवीनां, कलाकाराणाम्, सम्पादकप्रवराणां, लेखकानां, प्राध्यापकानामाचार्याणां, शिक्षकानां शास्त्रिणां, संस्कृतसेवकानां, सर्वविधानां पण्डितानां, तच्छात्राणां; च योग्यतामाहात्म्यमस्माभिः सर्वैरपि च यत्र तत्र सर्वत्र सर्वतोदिक् सार्वभौमः 'किलोच्चैः स्वरः समुद्घोष्यः ।

स्ववर्गीयानां सङ्घट्टनम्

अस्मद्देशे खल्वांग्लभाषावेत्तारो, हिन्दीसाहित्य-सेविनो महाशया, विश्वविद्यालयानामुच्चपदाधि-कारिणो, विशेषज्ञा डाक्टरा, एम० ए० महोदया, बी० ए० मान्यमण्डिताः स्नातकाश्च परस्परं प्रशंसन्तो बहु मोदन्ते, स्वविद्यायाः, स्वसम्प्रदायस्य, तत्तदध्ये-तव्यविषयाणां काठिन्यस्य, शिक्षालाभाय कृतस्य धनव्ययस्य, परीक्षासरित्तरणे कृतस्य महाप्रयासस्य चातिशयोक्त्या महान्तं महिमानं प्रचारयन्तो विश्व-विद्यालयान्तर्गतासु बह्वीषु संस्थासु, शिक्षाप्रतिष्ठानेषु, पुरातत्त्वेतिवृत्तान्वेषणकार्यालयेषु, शिक्षाविभागानां कार्यालयेषु च प्रशासनिकविभागेषु च स्वजीविको-पार्जने सक्षमा जायन्ते । क्वचित् क्वचित्विमे विश्व-विद्यालयोपाधिमुद्राङ्किता बलीवर्दाः केवलं दासत्व-मेवाश्रयन्तः परस्परं श्लाघावाद-घटाटोपाडम्बरैरेव भूरिभोगान् भुञ्जते, सम्मानोपाधीन् द्रव्यराशींश्च लभन्ते । वस्तुतस्तु ते साक्षरा अपि निरक्षरभट्टाचार्याः, निर्विषा भुजङ्गमाः, निर्गन्धाः किं शुका इव विद्यान्त-स्तत्त्वशून्या निरुपयोगाः प्रमाद्यन्तो दरिद्राः कार्य-सम्पादने सर्वथैवाक्षमाः स्वोदरदरीपूरणमात्र एव क्षपि-तातमपौरुषसर्वस्वाश्च उपलभ्यन्ते । सत्यपीदमित्थं ते सर्वे स्वसम्प्रदायान्तर्गतानां सहकर्मणां सङ्घटनमात्र-बलादेव मिथो भावयन्तो भुञ्जते भूरिभोगात्, महत्सु पदाधिकारेषु सुखं चिरं तिष्ठन्ति, स्वकीयानुपाधिभि-र्मण्डयन्ति श्लाघावादैश्च पुष्णन्तीति प्रत्यक्षमेवास्ति तथ्यम् ।

एवमेवोपर्युक्तदिशा स्वसमाजसददस्यानां सङ्घटनं विधित्सया संस्कृतैः सर्वैरप्यस्माभिः संस्कृतसेविनां विदुषां ज्ञानविज्ञानयोग्यताप्रशंसनैः उपाधिदानैः अभि-नन्दनग्रन्थ-मानपत्र-सम्मानोपायनवस्तु - समर्पणैश्चित्र-प्रकाशनैः तत्पत्रलेखप्रतिलिपिमुद्रणैः जीवनचरित्रवार्ता-विनोदगोष्ठी-चातुर्यकथासम्भाषण-चर्चा- हस्ताक्षर-परि-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पूर्णाहुतिः—महाभारतीयं दृश्यकाव्यम्

—कविवरः श्री कृष्णप्रसाद घिमिरे—

५.

प्रथमोऽङ्कः

राजदूतः (सहर्षं सोद्गारं विनिवेदयन्)—ते भगवन्तं भवन्तं विज्ञापयन्ति मन्मुखतो यद् "भगवन्, सच्चिदानन्दघन! जगदुद्धारकस्य भगवतो भवतः श्रीचरणारविन्दमाश्रिताः प्राणिनो विनिर्भया भवन्तीति निश्चप्रचमेवैतत्। तत् त्रायस्व नाथ! वयमपि तादृशा एव स्मः। ब्रह्माण्डमेव संग्रसनशीलो विकरालोऽपि कालो भवतः स्वरूपमेव। एतेनैव भगवान् कुशलकर्मसु विमुखानां प्राणिमात्राणां विनाशयति सर्वानपि हृदयगतानभिलाषान् मनोरथांश्च। जगदीश! वस्तुतो भवता दुष्टसंहरणार्थं सत्योद्धारणार्थञ्च विभुना निहन्यन्ते विभ्रियन्ते च बहवोऽवताराः। तत्रैकतमोऽपि विराजत एवाऽस्माकं समक्षम्। तदित्थं वर्तमानायामवस्थायां भवच्चरण-शरणमागता अपि वयं सेवकास्त्वच्चरणारविन्दमक-रन्दाऽऽस्वादनलुब्धा भृङ्गप्रायाः किमर्थमित्थं निरन्तरं क्लिश्यामः स्वकृतकर्मभिरेभिरित्यपि न विजानीमो भृशं विमूढा अज्ञानिनश्च। तत्राऽपीयं भगवतो जगन्मोहिनी भवन्माया विनर्तयति नो निरन्तरम्।

तस्मान्नाथ! जरासन्धाभिधेयात् स्वकर्मरूपा-दस्माद्बन्धनान्मोचय शीघ्रं विमोचयाऽस्मान् प्रभो!

चर्चादिभिः सम्भाव्यैरन्यैश्च तैस्तैः प्रकारैर्विधिभि-र्विधानैः साधनैश्च संस्कृतज्ञाः प्रशंसनीयाः, स्वकुलव्रत-मिव मत्वा सार्वकारस्य शासनकार्याणां विभिन्न-विभागानामुत्तरदायित्वपूर्णेषु पदेषु महत्सु प्रतिष्ठाप्याः। अहह, हा! हन्त!! हन्त!!! एतत् संस्कृतज्ञाना-मस्माकं हतभाग्यानामद्यत्वेऽनैक्यदोषदुर्विजृम्भितं यदार्यावर्ते स्वदेशे भारतवर्ष एव यथा कश्चिन्मूर्खा-धिराजोऽपि सन् एम० ए० महाशयः प्रभवति पुरुषार्थ-सिद्धये स्वजीवकोपार्जनवृत्तये, न तथा निखिलशास्त्र-तत्त्वरहस्यविदप्याचार्यः संस्कृतवाङ्मये कृतभूरिपरि-श्रमो व्युत्पन्नो महान् सदाचारः कुलीनश्चापि! अत्र हि संस्कृतपण्डितानामस्माकं सङ्घटनाभावः स्वसमा-जस्य कल्याणमङ्गलचिन्तनस्य चेतनाराहित्यमनैक्यं, स्वकीयानामुपेक्षा, देशकालानभिज्ञतादिदोषा एव निदानम्! अतः परस्परं जघन्यमीर्ष्याभावं द्रोहं वैरं पामरत्वमित्येवंविधान् आत्मघातकान् दोषानेकपदे-ऽपहाय वयं सर्वे संस्कृतोपजीव्याः संस्कृतसाहित्यस्य, संस्कृताश्रयिसमाजस्य, संस्कृतसेविनो विद्वद्वृन्दस्य, स्वसम्प्रदायान्तर्गतानां प्रत्येकं व्यक्तीनां सम्मानभावं प्रयत्नाद् रक्षन्तः स्वसमाजस्याधिकारान् संरक्षितुं जागरूकं चेष्टेमहि। 'अविद्यो वा सविद्यो वा संस्कृतज्ञोऽधिकारभुग्!' इति सिद्धान्तीकृत्य सपक्षपातं कथमपि पोष्या एवास्माभिरात्मीयाः! एवमाचरिते अद्यत्वे संस्कृत-विद्यायास्तद्विदुषां च संरक्षणं, सामाजिकाधिकार-रक्षा, सम्मानवृद्धिश्च साधीयसी स्यात्, प्रचारमार्गश्चैवं परिष्कृतो भवेत्, नान्यथेति युगधर्मः समाश्रीयतां सर्वैः।

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संनिरुद्धा वयमेतेन गिरिगुहासु सिंहेन मेषगणा इव। विभो! अजित! वयं भगवद्भक्ता इति विज्ञाततत्त्वः सोऽयं पुनर्नो भृशं क्लेशयिष्यति।

तदत्र स्वामिन्! यत् कर्तव्यं विद्दश्येत या च भवतः सदिच्छा विद्योतते विषयेऽस्मिन्, यच्च प्रभवति सर्वतो भद्रकृत् तदनुकूलमेव आचरणीयमित्यस्माकमभ्यर्थना। सैषा च जगदभदयोः श्रीचरणारविन्दयुगयोर्विलसितात्। इदमेवाऽस्माकं ह्यसह्ययातना-ज्वालासंतापित-हृदयानां विनिवेदनम्।

भगवन् द्वारकाधीश्वर! अयमेव राज्ञा जरासन्धेन सन्निरुद्धानां तेषां सन्देशः। इत्थं ते बन्दिनो राजगणा भवच्चरणशरणमागताः। तदत्र भगवान् भवानेव प्रमाणम्। (इति विरमति)

भगवान् (सदयं राजदूतं विलोक्य ईषद्विहसन्)—प्रिय राजदूत! विश्रुतो मया मदनुरागिणां मदर्पित-स्वमनोवचनवपुषां तेषां महाराजानामार्तिमत्सन्देशः, श्रुतिमार्गतो भृशं कष्टतः प्रविष्टश्च हृदयाभ्यन्तरम्। तदस्मिन् विषये जरासन्धवैषयिकानां तत्र भवतां तत्रत्यानामन्येषां चातुर्वर्ण्यप्रधानानां जनानाञ्च कोऽस्त्यभिप्रायः?

राजदूतः (साञ्जलिबन्धमासनादुत्तिष्ठन्)—प्रभो! सर्वोऽपि तत्रत्यो जनः समुद्विग्नतरो विदृश्यतेऽस्माकं महाराजशासनतः। कामयते चाहर्निशमीदृशस्य महाब्राह्मण्यस्याऽपि लोकान्तरगमनमेव।

[एतस्मिन्नन्तरा द्वारपालः ससभ्रमं समागृह्याभ्यन्तरं प्रविशति।]

द्वारपालः (साञ्जलिबन्धं शिरो नमयन्)—भगवन् जगदीश्वर! सभागृहद्वारमभिलक्ष्यीकृत्य दुर्निरीक्ष्य-तेजोराशिः अवतरत्याकाशतः। अहं तु विभो! तेजसां चयो भगवान् भास्कर एव परतत्त्वं भगवन्तं भवन्तं द्रष्टुमागच्छतीति मन्ये।

भगवान् (गवाक्षादाकाशं प्रति दत्तदृष्टिः ससंभ्रमं स्वासनादुत्तिष्ठन्)—तत्र भवान् देवर्षिः समगच्छति। (स्वगतम्) मया तु पूर्वमेव संस्मृत आसीदसौ महात्मा। (सम्यान् समीक्ष्य) त्वर्यन्तां त्वर्यन्तां तत्र भवन्तोऽपि देवर्षये तदुचितपाद्यार्घ्यादिपूजासम्भार-सम्पादनार्थम्।

[इत्युक्त्वा भगवान् स्वयमेव देवर्षेः स्वागतार्थं सभागृहद्वारं यावदुपसर्पति, सर्वेऽपि सभ्या भगवन्तमनुगच्छन्ति। भगवतो वासुदेवस्य श्रीकृष्णस्य पुरत एव आकाशादवरुह्य स्वमहत्याख्याया वीणायास्तन्त्रीषु स्वाङ्गुलीर्विनिवेश्य ताः सुमधुरं वादयन् नारदः 'नारायण! नारायण!!' इति जपन् तस्थौ। सर्वेऽपि समासदः साञ्जलिबन्धं विनम्रीभूत-स्वस्वशिरस्का भक्तिश्रद्धापुरस्कृतात्मानो वितिष्ठन्ते।]

नारद—भगवन्! अमोघलीलाविहार! विनोद-प्राचुर्यासु स्वेप्सितलीलासु कश्चिदाघातस्तु नापतति किम्? प्रभो! विहाय भवन्तं भवन्तमेकं भवेऽस्मिन् निःसारे सारस्वरूपोऽन्योऽपि जनो वर्तते न वा, यः स्यादाप्तकामः सत्यकर्मा सत्यस्वरूपः सत्यानुरागिणां त्रिकालाबाधितं सत्यञ्च।

भगवान् (मयूरपिच्छाश्रितकर्णकुन्तलाढ्यं स्वं शिरोऽवनमन्)—एवमेव भगवन्! भवतां शुभाशीर्वादो विजृम्भतेतरामित्थमेव। समागम्यतां तावद्, गच्छामः सभागृहान्तरमेव। (ऋषेर्वामबाहुं स्वदक्षिण-बाहुना समालम्ब्य भद्रासनमुपसंगम्य सुमधुरवाण्याम्) आस्यतां प्रभो! आस्यतामिदमासनम्!

[देवर्षिः नारायण! नारायण!! इति वदन् स्वं पिङ्गल-प्रभं जटाभारं यथास्थानं विनिवेशयन् संतिष्ठते तदस्मिन्नेव तत्रभवतो भगवतो भद्रासन एव। तदैव समासद्भिरुपनीतैः पाद्यार्घ्यादिभिः स्वयमेव भगवान् श्रीकृष्णो देवर्षिं पूजयति तच्चरणप्रक्षालनपूर्वकं तिष्ठति च तच्चरणसमीप एव तदादेशान् प्राप्तुकाम इव। इत्थं स्वब्रह्मण्यतां सम्प्रदर्श्य स्वया श्रद्धया मुनिं प्रीणयन्नित्थं पृच्छति जगद्विमोहिन्या सुमधुरया वाण्या।)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भगवान्—देवर्षे ! किमधुना सचराचरं त्रैलोक्यं सानन्दं वरीवर्ति न वा ? प्रभो ! अप्रतिहार्यया त्वया मत्या गत्या च त्रैलोक्यं चङ्क्रममाणो भवानस्मादृशानां चर्मचक्षुषां सुमहज्ज्ञानसाधनं किल । नाऽत्र विचिकित्सालेशो यदेकासनमाश्रिता अपि वयं भवत्कृपया सम्पृक्तास्त्रैलोक्यगतं वृत्तान्तमपि सुखेनैव विजानीमः । पुनर्विभो ! तदीश्वरकर्तृकेषु सचराचरेषु ब्रह्माण्डनिवहेष्वपि संभूतं भावि चोदन्तजातं तादृशं किमपि नास्त्यज्ञातं भवता सदा सुगृहीत-नारायणेति सन्नामधेयेन ।

तस्मात् प्रभो ! सुदृढस्नेहसम्बन्धबन्धिता वयं विवशीभूतेन स्वहृदयेन भगवन्तं भवन्तं पृच्छामो देवर्षे ! तदद्य पाण्डवानां युधिष्ठिरादीनां किमस्ति व्यवसितम् ? किञ्चास्ति चैतर्हि तेषां स्वेक्षितं कर्तव्यम् ? कीदृशी अवस्था विद्यते च पुनस्तेषाम् ? इति च विजिज्ञास्यामो वयम् ।

देवर्षिः (नेत्रे निमील्य सगद्गदं 'नारायण, नारायण !' इति सलयं गायन् महत्यां मिलिते श्रुतिमधुरे स्वात्मानन्दाह्लादप्रदायिनि स्वरे चोद्गायति ।)—

असो ! मायाविनो माया विदृष्टाः सर्वतो भान्ति ।
नामरूपात्मके ह्यस्मिन् धरायां गन्धवन्मान्ति ॥
अनन्तं ब्रह्म तच्छुद्धं विनोदार्थं विहारेऽस्मिन् ।
मायया‌ऽनेकवद् भूत्वा स्वयं क्रीड्त्यहोः भ्रान्तिः ॥
यथा दारुस्थितो वह्निरव्यक्तो व्यक्ततामेति ।
मथनाद् ब्रह्म तच्चापि दृश्यते क्वाऽत्र सा भ्रान्तिः ॥
ममैते विषयाः सोऽहं मन्यमाना इदं मत्ताः ।
नाधिगच्छन्ति तत्सौख्यं सुदुष्टास्तेऽत्र नो भान्ति ॥
गृहीत्वा तत्पदाऽम्भोजं साध्यं प्राप्तुं रता येऽत्र ।
लभन्ते तत्स्वध्येयं तु महात्मानो हि ते मान्ति ॥

[इत्थं प्रगाय सुमधुरं विरते भगवति देवर्षौ सर्वेऽपि समासदस्तत्सङ्गीतमयं सदुपदेशं विश्रुत्य मन्त्रविमुग्धीकृतेषु सर्वेष्विव तदाकृष्टमनोदेहेषु शान्तं साह्लादं संस्थितेषु चापातयन्ति तेषां नेत्रवृन्दानि अश्रूणि मे अद्य वर्षाधारा यथा । तदैव महत्याः समुद्गतो 'नारायण, नारायण !' इति समागुञ्जितो विश्रूयते मधुरो रवः ।)

देवर्षिः—(सर्वां विलोक्यैतां समासदपरिस्थितिमात्मन्यनुभूय च सविमत्सरम् ।) अलमलं वासुदेव ! कृतं त्वयाऽप्यतिकृतम् । इत्थं स्थाणुरिव भवंस्त्वं न विशोभसे सभासु ! अहो कोऽपि मा भूद् हर्षदग्धृदय । पश्य विभो ! त्वदर्थमेवेत्थं सकलं स्वजीवनं समर्प्य विकलञ्च कृत्वा तद्भूत्वा च त्वदीयाः संस्थितानामस्माकमिमानि जन्मजरामरणान्तानि संकष्टान्यपि त्वां न पीडयन्ति यदा कदाऽपि ! अहो भगवन् ! सत्यं त्वं निर्दयोऽसि पाषाणप्रकृतिः ः यद्वा—मर्षयसे सदन्तशब्दं तानि सर्वाण्यपि । मन्यसे वाऽकिञ्चित्कराणीति ? संपश्यैतान् विध्वस्तस्वस्वमनोवृत्तीन् महात्मनस्त्वदर्थमेवात्मिकविरहेण स्वयं सुभृशं रुदित्वा रावयित्वा चान्यानस्मादृशान् असह्यां यातनामपि स्वसुखं विस्मृतप्रायानात्मनि रममाणान् स्वायुषः खण्डान् क्षणनिमेषादीनपि कल्पपरिमाणेनैव प्रमापितान् ।

एतत्तु सुदूरं स्यात् मुरारे ! एते महात्मानस्तु नित्यमेव वितिष्ठन्ते त्वच्चरणाधारमवलम्ब्य, तेष्वेव नित्यसुखदेषु सांसारिकविविधतापादिविनाशनशीलेषु तत्रापि त्वमित्थमेव भूत्वा साधारणः कश्चित् प्राकृतो जन इव उदासीनीभवत् विहरसि तेषां मध्य एव । क्व गता तव सा दयालुता ? कैषां कथा ? परं विलोकय प्रभो ! तदितराणां सांसारिकाणां संस्थितिमेकवारमेव स्वनेत्रपुटे समुन्मील्येतस्ततो विश्वचक्रेषु चङ्क्रममाणाम् । तदैव त्वं भविष्यसि विज्ञाततत्त्वः । ध्यानदृष्ट्या पश्य प्रभो ! तावत् पेशस्कृता स्वनीडमानाय्य संरुद्धः कीटविशेषोऽपि स्वपुरोवर्तिनं तत्स्वरूपं दर्शंदर्शं स्मारंस्मारञ्च कियत्कालानन्तरमेव सोऽपि तदेव सम्भवति चेदस्माकं पुनः विगतानि भवेयुः जन्मानि द्वित्रिचतुराणि त्वच्चरणारविन्दसञ्चिन्तनेन तदात्मपर-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मात्मनोरैक्यमाप्तुं तत्समं विहितैरन्यै साधनैः सत्कर्मभिश्च । इदमेव त्वदीप्सितं चेत् किमर्थं न संहरति स्वयमेकपदे एव ‥।

भगवान् (मध्य एव स्वगतम्)—एवमस्तु ! संहरामि तावदिमां त्वदीयामित्थं प्रवृद्धां प्रज्ञाम् ।

देवर्षिः (स्ववक्तृतया अनुपरमन्)—अन्यथा नैतदुपयुक्तं त्वत्कृते । किमर्थमित्थमुदासीनो भवसि सर्वस्मिन् ?

भगवान् (स्वगतम्)–अद्य यावदनुद्घाटितं मदीयमिदं परं रहस्यमप्युद्घाटयन्निवाऽयं विहरश्यते मध्येसभम् । तदमुष्य ज्ञानधारामिमां विमोहिन्या स्वशक्त्या स्वात्मन्येव संहरामीति विचार्य तथा कृत्य च । (प्रकाशम् ।) यदाज्ञादपयति देवर्षिः ।

देवर्षिः (अकस्माद्विलुप्तमणिरहिरिव दीनो हीनो भूत्वा)–नारायण ! नारायण ! (इदेव भगवान् भगवन्तं नारदं प्रेममय्या सुदृष्ट्या निरीक्ष्यते ।)

भगवान् (सस्मितम्)—को विचारस्तत्रभवताम् । आज्ञाप्यतां तावदेष जनः ।

देवर्षिः—प्राकृत एव प्रभो !

भगवान्—तन्निर्दिश्यताम् !

देवर्षिः (आत्मना स्वात्मानं संस्तभ्य)—मुरलीविमोहन मोहन ! आनीतोऽहमस्म्यत्र यावत्समाकृष्य भवल्लीलाविहारचातुर्येण कश्चिदात्मज्ञानिना आत्मयोगप्रभावेण स्वेप्सितं व्यक्तिविशेषमभिमततमं प्रदेशं यथा । (मध्य एवाऽन्ततः स्फुरितसंज्ञानः) नहि नहि भगवन् ! यथा नहि तथा, तथा ! नोपमानमपेक्षतेऽत्र प्रमाणम् ।

भगवान् (स्वगतम्)–कतिशीघ्रं विज्ञानधारामवगाहतेऽसौ मुनिवरः । यद्वा युक्तमेवैतत्, नित्यमेव तुर्यावस्थायां संस्थितवतोर्व्यक्तिविशेषस्य विषये मयाऽपि किमनर्थकरं विचिन्तितमेतद् । आः !

देवर्षिः—प्रभो ! त्वं साक्षात् परं ब्रह्म असि । विज्ञानघनोऽसि, सच्चिदानन्दघनस्त्रिकालाबाधितसत्तत्त्वश्चासि । तस्मात् सर्वं वेत्स्येव विभुत्वाद्भगवन् ! किमहं विज्ञापयामि त्वामतः । तथापि साधारणमनुष्यस्थितिमनुसरता तत्र भवता भगवता पृच्छ्यते पाण्डवानां स्थितिः । एतेनैव सञ्ज्ञायतेऽस्माकं प्रबुद्धतमानामपि बौद्धिकी कुस्थितिः । काऽन्येषां कथा ?

नारायण ! नारायण !! युक्तं प्रभो ! निवेदयामि तद्भवता परिपृष्ठानां भवत्पितृस्वसुःपुत्राणां युधिष्ठिरादीनां चेष्टितम्, यदस्त्यधुना तच्चिकीर्षितञ्च । दयानिधे ! ब्रह्मलोकपर्यन्तानां नामरूपोपकल्पितानां भोग्यादिवस्तुमात्राणामन्येषां तत्सुसाधनानाञ्च नास्ति तेषां कृते कोऽप्यभावः । नास्ति च तेषां विशुद्धतमानां हृदयकोणाऽभ्यन्तरेष्वपि प्राप्तव्यवस्तुमात्राभिलाषः तथापि भगवन् ! नारायण नारायण ! भवत्पितृस्वसुः पुत्रोऽसौ ज्येष्ठो भवद्भ्राता युधिष्ठिरो धर्मराजो महाराज एतर्हि सर्वश्रेष्ठेन यज्ञराजराजरूपेण भवच्चरणशरणप्राप्त्यर्थं भवन्तमेव पूजयितुकामो विचेष्टमानश्च वरीवर्ति । तदेतस्य सैषा स्थितिः । यदस्त्यधुना तच्चिकीर्षितञ्च प्रेरयत्येतदर्थमेव मां भगवन्तं सर्वसिद्धिप्रदातारं भवन्तमिन्द्रप्रस्थमानेतुं प्रत्यधुनैवातः ।

तन्नाथ ! भवताऽनुमोदितव्योऽसौ विषयः । पुनः सम्पन्नस्य राजसूयस्योद्देशोऽपि केवलं केशवस्य भवतः प्रकारान्तरेण विधीयमाना श्रीचरणसेवात्मिका सुपूजैव वरीवर्ति । तस्मात् प्रभो ! भवतस्तत्र गमनं नितरामावश्यकं दृश्यते । पुनरन्यदपि वरीवर्ति नाथ ! यज्ञराजेऽस्मिन् भवद्दर्शनार्थं सम्मिलिता भविष्यन्ति विशेषतः सर्वेऽपि देवा महान्तो महात्मानो राजानः, अन्ये च भवच्छ्रीचरणानुरागिणो भक्तप्रवरा विशिष्टा विद्वद्वराश्च ।

मधुकैटभारे ! विज्ञानानन्दघन ! सकृत्कृतमात्रैः भवद्रूपगुणरूपलीलादीनां श्रवणस्मरणमननसंकीर्तनादिभिरन्त्यजडजास्तुच्छाः प्राणिनश्चाप्नुवन्ति महतीमात्मविशुद्धिम् । पुनः कथैव का तेषां महत्त्ववर्णनस्य यैः सम्प्राप्तमीदृशं भवद्दर्शनस्पर्शनसंभाषणादिकम् ? त्रिभुवनैकमङ्गलप्रभो ! सुपवित्रिता भवत्कीर्तिस्तु दशसु दिक्ष्वपि सन्ततवितानं यथाऽनन्तब्रह्माण्डान्यभिव्याप्य संस्थिता तथैव भवच्चरणनिःसृताऽमृतधारादेवी मन्दाकिनी स्वर्गे मन्दाकिनी पातालेऽधोलोके भोगवती पृथिव्यां मर्त्यलोके भगवती भागीरथी नाम्ना ख्यातिमिता च प्रवाहिता च भगीरथेन राज्ञा भगीरथप्रयत्नेन पवित्रयति ब्रह्माण्डवृन्दान्येव । (भगवतो मुखं विलोक्य क्षण विरमति ।)

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विक्रेयाणि बहुमूल्यानि पुस्तकरत्नानि

गृहं स्वर्गीकर्तुं मानवजीवनञ्च सफलयितुं वाणीपुस्तकमालातः महापरिषदः महामण्डलसंस्थानतश्च प्रकाशितानि निम्नलिखितपुस्तकानि विक्रयार्थं प्रस्तुतानि। विशेषविवरणाय सूचीपत्रं नियमाश्च पत्रप्रेषणेन समासादनीयाः।

१. भारतधर्म-समन्वय ...	१–५०
२. परलोक-तत्त्व ...	२–५०
३. कठोपनिषद् ...	३–००
४. धर्मतत्त्व ...	२–५०
५. वेदान्तदर्शन ...	१–५०
६. हिन्दूधर्मका स्वरूप ...	०–३७
७. तत्त्वबोध, सजिल्द ...	१–००
बिना जिल्दका ...	०–७५
८. आदर्श देवियाँ प्रथम भाग ...	२–२५
,, ,, द्वितीय भाग ...	२–५०
९. सती सदाचार ...	१–५०
१०. कर्म-रहस्य ...	२–५०
११. केनोपनिषद् ...	१–५०
१२. ईशावास्योपनिषद् ...	१–००
१३. सप्तशती (दुर्गा) गीता, सजिल्द ...	३–००
,, दफ्ती जिल्द ...	२–२५
१४. सदाचार-प्रश्नोत्तरी ...	०–३७
१५. व्रतोत्सव-कौमुदी ...	१–३७
१६. हिन्दू-संस्कृति-समीक्षा ...	०–५०
१७. धर्म-प्रवेशिका ...	०–७५
१८. पूजा-प्रार्थना ...	०–६२
१९. गायत्रीमन्त्र-टीका ...	०–२५
२०. आचार-चन्द्रिका ...	१–००
२१. कन्या-शिक्षा-सोपान ...	०–२५
२२. गजेन्द्र-मोक्ष ...	०–३७
२३. महिला-प्रश्नोत्तरी ...	०–५०
२४. व्रतोत्सव-चन्द्रिका ...	५–००
२५. धर्माधर्म-प्रश्नोत्तरी ...	०–२५
२६. सुलोचना ...	०–६२

२७. तीर्थ और देवपूजन-प्रश्नोत्तरी ...	०–२५
२८. स्मरणी ...	०–६२
२९. स्त्री-पुरुष-विज्ञान ...	०–३७
३०. श्राद्ध और परलोक-विचार ...	०–३७
३१. धर्म-विज्ञान प्रथम, द्वितीय, तृतीय, ५) ४)	४–००
३२. श्रीमद्भागवत, एकादश स्कन्ध ...	३–५०
३३. सती धर्म और योगशक्ति ...	०–३७
३४. अन्तःकरण-विज्ञान ...	०–७५
३५. निर्मूल आक्षेपोंका उत्तर ...	०–३७
३६. परलोक-प्रश्नोत्तरी ...	०–२५
३७. श्रीमद्भगवद्गीता प्रथम भाग ...	४–००
,, ,, द्वितीय भाग ...	३–५०
३८. मनुष्य-धर्म ...	०–३७
३९. धर्मकल्पद्रुम प्रथम खण्ड ...	६–००
,, द्वितीय खण्ड ...	३–००
,, तृतीय ,, ...	३–५०
,, चतुर्थ ,, ...	५–००
,, पञ्चम ,, ...	३–५०
,, षष्ठ ,, ...	४–००
,, सप्तम ,, ...	३–५०
,, अष्टम ,, ...	४–००
४०. प्रवीण दृष्टिमें नवीन भारत (प्रथम खण्ड)	२–००
,, ,, (द्वितीय खण्ड)	२–००
४१. नवीन दृष्टिमें प्रवीण भारत ...	१–२५
४२. साधन-चन्द्रिका ...	१–७५
४३. शास्त्र-चन्द्रिका ...	१–७५
४४. धर्म-चन्द्रिका ...	१–६५
४५ पातञ्जल-योगदर्शन (हिन्दी भाष्य) ...	३–००
४६. कर्ममीमांसा-दर्शन (सम्पूर्ण) ...	१२–००

व्यवस्थापक : वाणी-पुस्तकमाला, आर्यमहिला हितकारिणी महापरिषद्, जगतगंज, वाराणसी

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पञ्जीकृत-संख्या—एल० १८९७

सूर्योदयस्य नियमाः

पत्र-संहिता

१. 'सूर्योदय'-मासिकपत्रस्य वार्षिकं शुल्कं रूप्यकपञ्चकं वर्तते। धनादेश (मनीआर्डर) द्वारा तत्प्रेषणीयम् । वी० पी० द्वारा प्रेषणे ५० पणाः पृथक् प्रदेयाः स्युः ।

२. आवर्षं गम्भीरसाहित्यसमन्विताः १२ अङ्काः प्रकाश्यन्ते। नवीनग्राहकत्वं प्रथमाङ्कतः (जनवरी-अङ्कतः) एव स्वीक्रियते । माध्यमिकेन केनापि अङ्केन ग्राहकत्वं न स्वीक्रियेत ।

३. आंग्लमासस्य २६ दिनाङ्के 'सूर्योदयः' प्रकाशितो भवति । वारद्वयं संशोध्य ग्राहकेभ्यः सः प्रेष्यते । अतस्तदलाभे पूर्वं स्वकीय-पत्रालयतस्तदनागमनस्य निर्णयं कृत्वैव १० दिनाङ्कानन्तरं वयं सूचनीयाः ।

४. लेख-कवितादीनां भाषा संयता, सरला, शुद्धा च भाव्या। प्रकाशनीय-लेखादीनां स्पष्टाक्षरैः कर्गजस्यैकपृष्ठे एव लेखनमावश्यकम् । अस्वीकृता लेखादयः पोस्टविभागीय-चिटिका (टिकट) प्राप्त्यनन्तरं परावर्तयितुं शक्ष्यन्ते ।

५. सम्पादकीय-विषयसम्बद्धे पत्र-व्यवहारे 'सम्पादकः' इति, व्यवस्थाविभागीय-पत्रव्यवहारे च 'व्यवस्थापकः' इति च स्पष्टं लेखनीयम् । तेन उत्तरलाभे मुधा विलम्बो न भवेत् ।

विज्ञापन-शुल्कम्

सूर्योदये सुरुचिपूर्णं विज्ञापनं प्रकाश्यते। एकवारं तस्य प्रकाशनस्य शुल्कक्रमश्च अधोलिखितोऽस्ति । सार्वकालिकस्य दीर्घकालिकस्य च विज्ञापनस्य कृते विशेष-सौविध्याय पत्र-व्यवहारः कार्यः ।

साधारणस्य प्रतिपृष्ठस्य	१००) रु०	साधारणस्य प्रत्यर्धपृष्ठस्य	६०) रु०
साधारणस्य चतुर्थांशपृष्ठस्य	३५) रु०	आवरण-चतुर्थपृष्ठस्य	२००) रु०
आवरण-द्वितीय-तृतीयपृष्ठयोः	१५०) रु०	प्रथमावरणपृष्ठे विज्ञापनं न स्वीक्रियेत ।	

—सङ्केतः—

'सूर्योदय'-कार्यालयः, भारतधर्म-महामण्डलम्, जगतगंज, वाराणसी ।

सम्पादकः, प्रकाशकः, मुद्रकश्च—गोविन्द नरहरि वैजापुरकरः,
श्रीभारतधर्ममहामण्डलम्, जगतगंज, वाराणसी कैण्ट ।
मुद्रण-स्थलम्—आनन्दकानन प्रेस, सी-के० ३६/२०, वाराणसी ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूर्योदयः

भारतधर्ममहामण्डलस्य
मासिकं मुखपत्रम्

वर्षम् ५०

अङ्कः ११

सम्पादकः
गो० न० वैजापुरकरः

नवम्बर
१९७४

वार्षिक-मूल्यम्
५) रूप्यकाणि

प्रत्यङ्क-मूल्यम्
अर्धरूप्यकम्

12-3-75

दीपावलीयम् !

ज्वालिता दीपावलीयम् !
किं रजन्या ननु मुदितया ज्वालिता दीपावलीयम् ॥

१.

व्रजति पति-परिभावके नलिनीपतौ चण्डप्रतापे,
दूरतरदेशं सवेगं जलजचेतसि लब्धतापे।
कैरविण्यामपि भगिन्यामाप्तमोदायामभीक्ष्णं,
यामनेके कल्पयन्ति प्रकृति-गल मुक्तावलीयम् ॥

२.

विद्युतस्त्रसरेणवो नीलाऽऽतते गगने विकीर्णाः,
वियदमर-तटिनीतटे सिकताकणा ननु रजतवर्णाः।
कल्पयन्ति मनीषिणोऽन्ये द्युस्फुरत्खद्योतवृन्द-
श्चन्द्रपथि विष्याङ्गनाजन-करगललाजावलीयम् ॥
ज्वालिता दीपावलीयम् !

—कविवरः श्री आनन्द झा, न्यायाचार्यः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनुक्रमः

प्रपाठकः	पत्रपुटम्	परिवेषकः
पुनर्भूतले भातु कविकालिदासः ।	२४१	श्री रामनाथ पाठकः 'प्रणयी'
श्री महर्षि-ज्ञानानन्दचरितं महाकाव्यम्	२४२	स्वर्गीयाः श्री विन्ध्येश्वरीप्रसाद शास्त्रिणः
क्षिप्रं नियन्त्रणीयोऽयं राष्ट्रविप्रतीप क्रिष्टीयो दुरभिसन्धिः ।	२४३	सम्पादकीयम्
चकारस्य चत्वारोऽर्थाः—एकमध्ययनम्	२४५	श्री बालशास्त्री
पूर्णाहुतिः—महाभारतीयमभिनवं नाटकम्	२५०	कविवरः श्री कृष्णप्रसाद घिमिरे
संस्कृत-प्रचार-तन्त्रम्	२५४	श्री गणेशराम शर्मा
मानस-भारती । देवगिरा गुम्फितं मानसम्	२५८	श्री जनार्दन गङ्गाधर रटाटे
वैदिक-कर्माधिकार-मीमांसा	२५९	स्वर्गीयाः श्री हरिशङ्कर ओमकारजी शास्त्रिणः
भारतीय-बालोद्घोषः	२६३	श्री भुवनेशः
शुभाभिनन्दन-प्रसूनोपहारः	(आवरण तृतीयपृष्ठे)	उत्तरप्रदेश राज्यपालानाम्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूर्योदयः

रागद्वेषनिशाटनं विधुरयन् मोहं तमो नाशयन्,
तामिस्रं जडवादकैरवकुलं ज्ञानत्विषा ग्लापयन्।
विद्वत्कोकमशोकयन् नयसुधीरोलम्बमुन्मीलयन्,
सञ्जातः सुमनोमनो मधुरयन् सर्वत्र सूर्योदयः॥

५० वर्षं] वाराणसी, कार्तिकः २०३१ वै० नवम्बर : १९७४ ई० [११ अङ्कः

पुनर्भूतले भातु कविकालिदासः !

अजनि मानसाद् यस्य वीरः कुमारः, कृतो येन गन्धर्व - विरहावतारः।
मधौ पारिजातस्य यः पुष्पवासः, पुनर्भूतले भातु कविकालिदासः॥ १॥
प्रियो भूपतिर्यस्य जातो दिलीपः, वने दीपितो येन रघुवंश - दीपः।
कृतौ शोभते यस्य कैलासहासः, पुनर्भूतले........ ॥ २॥
क्व तद्देवदारुः क्व सा कामधेनुः, क्व सुरबालिका - कलि - सौवर्णरेणुः।
क्व दोग्धुं धरां दक्षमेरोः प्रयासः, पुनर्भूतले.......... ॥ ३॥
विधायर्तुशृङ्गार—लीलां नवीनां, पुराऽवादयद् योऽद्भुतां काव्यवीणाम्।
अभिज्ञानशाकुन्तलं यद्विलासः, पुनर्भूतले........ ॥ ४॥
तपःसाधने यस्य चेतः प्रतीतं सदा त्यागवृत्तौ श्रुतौ यस्य गीतम्।
श्रितो यस्य वाणीं तपोवन-विकाशः, पुनर्भूतले......... ॥ ५॥
अमरभारती - संस्कृतेर्गायको यो, गुरूणां गुरुः राष्ट्रसन्नायको यः।
चिरं राजते यस्य लालित्यरासः, पुनर्भूतले........ ॥ ६॥
क्व धारापुरी क्वाद्य विक्रमनरेशः, क्व साहित्य - सङ्गीत - विद्या - दिनेशः।
कला - कुङ्कुमानां क्व जीवन - पलाशः, पुनर्भूतले........ ॥ ७॥
यशः श्रूयते दिक्षु यस्योपमायाः, क्व सौभाग्यसिन्धुः स विद्योत्तमायाः।
अपूर्वः प्रसादेन यत्सूक्तिभासः, पुनर्भूतले........ ॥ ८॥

— श्री रामनाथ पाठकः 'प्रणयी' —

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीमहर्षि-ज्ञानानन्दचरितं महाकाव्यम्

— स्वर्गीयाः श्री विन्ध्येश्वरीप्रसाद शास्त्रिणः —

(एकविंशे सर्गे)

६१. आकल्पमद्य समयावधिकस्तदन्यो धन्यो भुवीह मुनिपुङ्गव आविरास ।
यः सर्वदर्शन - समन्वयमाचरिष्णु - र्ज्ञानप्रयत्नवरमीदृमन्वतिष्ठत् ।।

६२. शान्तिप्रदा कुटिचरी च बहूदकी च हंसाभिधा परमहंसपदेति शास्त्रे ।
श्रेण्यो लसन्ति विमलाशयदाश्चतस्रः संन्यासितां विरतिमार्गजुषां प्रसिद्धाः ।।

६३. शास्त्राब्धिमन्थनपटु - र्मुनिपुङ्गवोऽसौ तत्पद्धतीः सुविरचय्य पुनर्जगत्याम् ।
अन्त्याश्रमेऽभिलषतां स्थितिमात्मनीनां प्राचारयद् विमलबोधवतां हिताय ।।

६४. तत्तत्पुराण - शुभदाध्ययन - प्रवृत्त - विद्वत्समाजहृदयाश्रित - संशयानाम् ।
उच्छेदनाय रचितो मुनिसिंहकेन ध्वान्तापहारिसदृशः सुनिबन्ध एकः ।।

६५. योगी पतञ्जलिमुनिर्नितरां गरीयश्चेतोनिरोध - विनियोग - विधौ पटीयः ।
यद् योगदर्शनभिदोऽरचयच्च तत्र कृत्वाऽपि भाष्यवरमेष न सन्तुतोष ।।

६६. मन्त्रो हठोऽपि च लयस्त्वथ राजसंज्ञो योगा इमे सकलसाधक - कल्पवृक्षाः ।
तत्संहिताश्च विविधागमलब्धरूपा आविश्चकार स मुनिः स्वसमाधिशक्त्या ।।

६७. मन्त्रेण चापि हि हठेन लयेन चैव राजाभिधेन च चतुर्भिरुपायवर्गैः ।
यद्युक्तिमेति परमात्मनि नित्यरूपे जीवः स एव भुवने गदितोऽस्ति योगः ।।

६८. सृष्टिप्रपञ्च इह सर्वविधोऽपि नामरूपात्मकश्च परिदृश्यत इत्यवेत्य ।
यन्नामरूपमवलम्ब्य बुधाग्रगण्य संयुज्यते भगवता स हि मन्त्रयोगः ।।

६९. यस्यां पतन्ति मनुजा बत पिच्छिलायां दुःखानि हन्त बहुधाऽनुभवन्ति चापि ।
तामेव भूमिमवलम्ब्य पुनः प्रयत्नादुत्थानकर्मणि सदा सफला भवन्ति ।।

७०. मायामयं समधिगत्य समस्तनामरूपात्मकं जगदिदं निपतन्ति जीवाः ।
उत्थानहेतुरपि संभविता तदेव कस्यापि नैव हि मनागपि संशयोऽत्र ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकीयम्

क्षिप्रं नियन्त्रणीयोऽयं राष्ट्रविप्रतीपः ख्रिष्टीयो दुरभिसन्धिः !

धर्मः किल प्राणिमात्रस्य सखा। नायमत्रैव जगति, परलोकयानेऽपि प्राणिनः सखित्वमाचरति। अत एव भारतीयसंस्कृतिर्घण्टाघोषमुद्घोषयति यद् 'गृहीत इव केशेषु मृत्युना धर्ममाचरेत्' इति। सोऽयं धर्मो मानवमात्रस्य स्थिति-गति-देश-काल-जाति-संवादी सहजस्फूर्तश्चैव भवति। बलाद् विषमः कोऽप्याचारो यस्मिन् कस्मिन् लौकिक-कोप-लोभ-दृष्ट्या समारोप्यते चेत् जातुचित् न स यथार्थतो 'धर्म'-संज्ञां लभते। तथापि जगति कूटनीतिज्ञः एतादृश स्वार्थसाधनैकलक्ष्यस्तथाकथितो धर्मस्तत्र तत्र प्रचार्य स्वार्थसाधनाय अहरहः प्रयत्यत एव। यदा किल भारतीयसंस्कृत्या सुस्पष्टमुद्घोष्यते यद् 'न जातु कामान्न भयान्न लोभाद् धर्मं जह्यात् जीवितस्यापि हेतोः', तदा किं तदीयो धर्मो लोभमूलको भयमूलको वा कदापि संभवी ?

किन्तु पाश्चात्यानामेष एव पन्थाः। तैः प्रायो धर्मशब्दं पुरस्कृत्यैव मूढानशिक्षितान् विमोह्य निर्मर्यादं स्वार्थः संसाध्यते। मोहम्मदीय-ख्रिष्टीय-धर्मयोः पुनरिदमेव सुप्रथितमितिवृत्तम्। आभ्यां धर्माभ्यां भयं लोभञ्च पुरस्कृत्यैव तत्र तत्र न केवलं स्वीयो धार्मिकः साम्राज्यवाद प्रस्थाप्यते, प्रत्युत सामाजिकाऽऽर्थिक-भौगोलिकमपि साम्राज्यं नैकेषु देशेषु प्रस्थापयितुं तैः यथा प्रयतितं तस्य वृत्तं नूनं रोमहर्षणमेव। भारतेऽपि एतयोरियं कूटनीतिः प्रसृतपूर्वा अद्यापि च प्रसरति।

तत्र मोहम्मदीय-धर्मधुरीणाः विशेषतो भयं पुरस्कृत्य स्वधर्मप्रचाराय प्रयतन्ते चेत् ख्रिष्टीयाः लोभमेव शस्त्रीकृत्य परधर्मान् विजयन्ते। वैदेशिकराज्याश्रितेन बलाद् धर्मपरिवर्तनकारिणा धर्मप्रचारेणानेन साम्राज्यवादिभिर्वैदेशिकै विगतेषु सार्धशतवर्षेषु स्वर्णविहगोऽस्माकं भारतो देशो यथा सर्वतो लुण्ठितस्तद्धि इतिहासविदां न परोक्षम्। सौभाग्यात् लोकमान्यतिलकसदृशैः भारतीपुत्रैरत्र जनिं लब्ध्वा कूटनीतिज्ञानामेतेषां दुरभिसन्धिममुं खण्डयितुं भारतीया नितरां प्रोद्बोधिताः। देशस्य च सौभाग्यात् चिरं स्वातन्त्र्यसमरं कृत्वा अस्माभिस्तेषामिमां कूटनीतिं पारेसमुद्रं प्रत्यावर्तयितुं साफल्यं समासादितम्।

किन्तु स्वातन्त्र्यलाभस्य सप्तविंशतिवर्षानन्तरमपि ख्रिष्टीयानामियं दुर्भावना अद्यापि न शान्तिमाप। प्रत्युत प्रच्छन्नमप्रच्छन्नं ते स्वीयस्यास्य दुष्कृत्यस्य प्रवर्तने प्रयतन्त एव। एतादृशेषु प्रयत्नेषु नूत्न एकः प्रयत्नस्तेषां प्रयागतः प्रकाशमानस्य 'भारत'पत्रस्य विगत-नवम्बरमासीय-सप्तविंशतिदिनाङ्के प्रकाशितेन वृत्तेनैकेन स्फुटीभवति। तत्र समुट्टङ्कितं यत् 'ईशवीयाः बलाद्धर्मपरिवर्तनकारिणः सङ्घर्षगाल-शिक्षितजनजातीयानां यूनाञ्च वर्गविशेषो भारते समद्भुतासम्पन्नं ख्रिष्टीयराज्यं संस्थापयितुं सविशेषं प्रवर्तमानो दृश्यते। एते किल असम-मेघालय-मणिपुर-नागालैण्ड-मिजोरम-त्रिपुरा-अरुणाचलप्रदेश-स्थितानि जनजातीय-क्षेत्राणि सम्मेल्य ख्रिष्टीयराज्य-स्थापनाय प्रयतन्ते। धर्मपरिवर्तकाः जनजातीया एते युवानः त्रिपुरा-राज्यान्तर्गते ग्रामे ग्रामे परिभ्रम्य शिबिराणामायोजनं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कुर्वन्ति । यत्र किल ईशवीय - समाजवादसिद्धान्ताः प्रचार्यन्ते प्रसार्यन्ते च । शिबिरेष्वेतेषु खिष्टानां 'बाईबिल' - नाम्नो धर्मग्रन्थस्य सहस्रशः प्रतयो वितरिताः सन्ति । सर्वेषु भारतीयवस्तुषु तै घृणाभावः प्रसार्यते, अभारतीय - भाषा-लिपिरूपेण आंग्लभाषा, रोमनलिपिश्च सविशेषं प्रोत्साह्यते । नैतावदेव, एतैः एतादृशा विद्यालया अपि स्थापिताः, यत्र रोमनलिपि-माध्यमेन शिक्षा-दीक्षा दीयते । धर्मपरिवर्तकानां नेतृत्वे कार्यरतानां त्रिपुरा-जनजातीयानां युवासमिते-र्नेतृणां प्रोत्साहनेन संघर्षशील-जनजातीय-युवकानां वर्गविशेषेण निर्णयोऽयं घोषितो यत् ते वर्षेऽस्मिन् जनजातीयेतराणां सस्यस्य कर्तनं निरोद्ध्य तेषां भूमिं स्वायत्तीकरिष्यन्ति' इति ।

वृत्तमिदं भारतीयताप्रतीपभूतं बृहत्तरं सङ्कुचित-दुश्चक्रं परिपुष्णाति । दुश्चक्रस्यास्य सुस्पष्टं लक्ष्य-त्रयम्—१. ईशवीय-राज्यस्थापनम्, २. रोमनलिप्याः प्रचारः, ३. नवकल्पितराज्यतो जनजातीयेतरेषां बहिष्कारश्च । नूनं त्रयोऽप्येते विषयाः सुगूढं भीषणतमाः !

लोकतान्त्रिकं युगमिदम् । अस्माकमुत्तरपूर्व-सीम्नोः ईशवीयं राज्यमनेन कुचक्रेण प्रतिष्ठितं भवेत् । तत्र बहुमतं खिष्टीयजनजातीनामेव स्यात् । ते हि शक्तिसञ्चयेन सीमवर्ति-स्वतन्त्रविरोधिराज्येभ्या गूढं दुरभिसन्धिं विधाय कतिपयैर्दिवसैः स्वातन्त्र्याभियानं करिष्यन्ति, यद्धि स्वतन्त्रभारतराष्ट्रस्य कृते महद्भयं वज्रमुपस्थितं स्यात् ।

लिपिदृष्ट्या विचार्यमाणे भाषाविज्ञानानुरोधेन सुस्पष्टमिदं यद् देवनागरी - लिपिवत् जगति नान्या काचन वैज्ञानिकी लिपिः, यन्माध्येन उच्चरिताः शब्दा यथावत् वर्णरूपेण लिपिबद्धा जायेरन् । देव-नागरीलिप्यामद्य समस्तभारतीय - संस्कृतेः संवाहकं साहित्यं समुपलभ्यते । अस्माकं वेदाः, शास्त्राणि, स्मृतयः, पुराणानि, काव्येतिहासविषयकाश्च ग्रन्थाः समुपनिबद्धाः । इयमेव लिपिः मूलभूतायाः ब्राह्मीलिप्या उत्तराधिकारिणी सुविकसिता लिपिः, यस्याः स्वरत-रङ्गेषु अस्माकं भाषा तरङ्गायते, अस्माकं भावना मुखरिता जायते, अस्माकं विचाराः स्फूर्जन्ति, अस्माकं साहित्यञ्च यद्वशात् समाजहृदयेषु नवरसं सृजति, मस्तिष्कस्थान् चेतनातन्तूंश्च सञ्चालयति ।

रोमनलिपि - प्रचारात्मकस्य दुश्चक्रस्यास्य घातकोऽयं परिणामो भवेद् यदेता जनजातयो भारतीयतातः, भारतीयता-संवाहकभावातः ऋषि-प्रणीत-साहित्यामृततश्च वञ्चिता भूत्वा बाइबिलस्य वचनावलिजाले बद्ध्यमानाः परधर्मासहिष्णु-खिष्टी-यतासुलभघृणाभावैः परिपूरिताः चिराय भारतीयता-विमुखा भवेयुः ।

जनजातीयेतरजनानां भूमिस्वायत्तीकरणस्य, तेषां पक्वसस्य कर्तन-निषेधस्य च यः सङ्कल्प उद्घोष्यते, नूनं स दुश्चक्रममुं सफलयितुं भयदोहननीतेः प्रमुख-मङ्गम् । तेन सङ्घर्षाः स्युः, प्रचारश्च भवेत् । खिष्टीय-धर्मपरिवर्तकाः किल प्रचुरधनाः । अतस्तद्बलेन तेषां देश-विदेशेषु भूयान् प्रचारो भवेत् । राष्ट्रिया-ऽन्ताराष्ट्रियप्रभावैश्च प्रभाविताः क्रियेरन् सर्वाणि राष्ट्राणि । तेन च लोकतन्त्रनाम्ना परिचाल्यमाना भारतीयकेन्द्रीयशासनस्य अस्थिर-दुर्बल-क्लैब्यमयी नीतिर्नूनं पराजिता भवेत्, भारतमातुश्च शिरसि कलङ्कस्यापरस्तिलकः सार्वकालिको भवन्नितरा-मरुन्तुदः स्यात् ।

भयानकस्यास्य दुरभिसन्धेर्यावान् विरोधः स्यात् तावान् नितान्तं समुचित एव । अस्माकं भूयांसो धर्माचार्याः बलाद्धर्मपरिवर्तकानां खिष्टीयधर्म-प्रचारकाणामेषां दुश्चक्रमिदं सर्वथा प्रकटयितुं प्रदे-शेष्वेतेषु कार्यरताः वरीवर्तन्ते । तेभ्य आर्थिक-साहाय्यं विधाय नैतिकं समर्थनञ्च प्रदाय कुचक्रमिदं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चकारस्य चत्वारोऽर्थाः—एकमध्ययनम्

-- श्री बालशास्त्री --

[व्याकरणविभागाध्यक्षः–राजस्थान-संस्कृत-कालेज, वाराणसी]

[श्रीबालशास्त्रिणां साहित्यविषयको रसविमर्शनपर एको लेखः 'सूर्योदय'-पाठकैः पठितपूर्वः । चकारस्य चतुर्विधसङ्केतितार्थविषयको व्याकरणशास्त्रीयो लेखोऽप्ययं समुदायमानस्य पारम्परीणवैदुष्यलामालङ्कृतस्य नव्यविदुषः प्राचीनपाण्डित्यप्रौढिमां स्फुटममिव्यनक्ति । अतो वयं तानमिनन्दयन्तो लेखममुमत्र प्रकाशयामः । लेखकस्य अग्रिमो लेखः "समुच्चयान्वाचययोर्न द्वन्द्वः" इत्याख्यो यथावसरं प्रकाशयिष्यत इति ।—सम्पादक]

चान्वाचय-समाहारेतरेतरसमुच्चये इत्यमरकोषात् समुच्चयः, अन्वाचयः, इतरेतरयोगः, समाहारश्चेति चत्वारश्चार्थाः–'च'पदवाच्याः । निपातानां द्योतकत्वनये तु इमे 'च'पदद्योत्या इत्यभिप्रायः । तथा च भाष्यम्—**कः पुनश्चेन कृतोऽर्थः । समुच्चयोऽन्वाचय इतरेतरयोगः समाहारः** इति ।

समुच्चयः

परस्परनिरपेक्षाणामनेकेषां यत्र एकधर्मावच्छिन्ने एकसम्बन्धेन विशेष्यतया विशेषणतया वा अन्वयः, तत्र समुच्चयः चशब्दद्योत्यः । यथा—'ईश्वरं गुरुं च भजस्व', 'देवदत्तः पचति, हसति च' इति । अत्र प्रथमोदाहरणे भजनत्वरूपैकधर्मावच्छिन्नायां भजनक्रियायाम् ईश्वर-गुरुरूपयोर्द्रव्ययोः स्वकर्मकत्वसम्बन्धेन विशेषणतया अन्वयेन, अन्त्योदाहरणे च पाक-हसनक्रिययोः कर्मत्वसम्बन्धेन देवदत्तरूपे द्रव्ये विशेष्यतया अन्वयेन उभयत्र समुच्चयः चशब्दद्योत्यः । एवं 'छात्रस्य कमण्डलुः पुस्तकं च' इत्यत्र द्रव्ये द्रव्ययोः, 'घटो नीलो रक्तश्च' इत्यत्र द्रव्ये गुणयोः, 'पीतो

विफलयितुं तीव्रतरः प्रयासः प्रवारश्च अतितरामावश्यकः । भारतीयैर्धनिकैरत्र विषये भामाशाहादिप्रमुख - राष्ट्ररक्षकधनिकानामनुकरणं कार्यमिति साग्रहं तेऽनुरुद्ध्यन्ते । एवमेव धार्मिकसंघटनानां समिति-सभा-मण्डलादीनामपि महत्तरं कर्तव्य यत्ते धनसंग्रहं कृत्वा राष्ट्रियसंस्कृतिसङ्कटग्रस्तेषु एतत्प्रदेशीयक्षेत्रेषु भारतीयधर्म - संस्कृतिगौरवप्रदर्शकाः लघुकाया ग्रन्था वितरन्तु, तत्र च धार्मिक-सम्मेलनसभादीनामायोजनं कृत्वा जनसाधारणान् वास्तविकं हितं प्रबोधयन्तु । हिन्दी-विद्यालयास्तत्र तत्र समुद्घाट्याः यत्र जनजातीयजनेषु सद्भावनाप्रदर्शनमुखेन किशोरेषु भारतीयताबीजानां सुदृढं वपनं क्रियेत । इत्थं तेषां हृदि आविभूर्तान् भारतीयता-प्रतीपभूतान् घृणाङ्कुरान् प्रारम्भत एव समुत्पाट्य भारतराष्ट्रस्य धर्म-संस्कृते राष्ट्रियस्वातन्त्र्यस्य च संरक्षकैः सर्वैः भारतीयसंस्कृतिनिष्ठैः सर्वप्रकारै प्रयतितव्यम् ।

अन्ते भारतीय - केन्द्रीयशासनप्रमुखाधिकारिणोऽपि साग्रहं प्रार्थ्यन्ते यत्ते समयात्पूर्वमेव राष्ट्रियताघातका एते बलाद्धर्मपरिवर्तकानां कूटप्रयासाः स्वीयया सर्वोच्चवशक्त्या विफलीकुर्वन्तुः । यतो हि भारतराष्ट्रं वैश्विकराष्ट्रेषु सर्वधर्मसहिष्णु सर्वेभ्यः स्व-स्वमान्यतानुसारं जीवनयापनस्य स्वातन्त्र्य-प्रदायकमद्वितीयं राष्ट्रम् । अस्य आधारभूतासंस्कृति-घण्टाघोषमुद्घोषयति यत्—

सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः ।
सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग् भवेत् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

घटः पटश्च' इत्यत्र च गुणे द्रव्ययोः समुच्चयोऽपि बोध्यः ।

अत्र एकस्य गुर्वादिनिरपेक्षस्य ईश्वरादेः भजनादि-क्रियान्वयोत्तरमपरस्य चपदसमभिव्याहृतस्य गुर्वादेः आवृत्त - भजतिपदोपस्थापित - भजनक्रियायामन्वयः । चपदसमभिव्याहृतत्वेन गुर्वादेः ईश्वरादिपदार्थ-सापेक्षत्वेऽपि ईश्वरादेः गुर्वादिपदार्थनिरपेक्षतया उभयोर्न परस्परं सापेक्षत्वमिति परस्परनिरपेक्षत्वम् ।

'न्यग्रोधो दृश्यताम्' इत्युपक्रम्य यदा प्लक्षश्चे-त्युच्यते, तदा न्यग्रोधश्चेति गम्यते । 'न्यग्रोधो दृश्यतामि'त्युपक्रमोक्तौ तु 'न प्लक्षश्चे'ति गम्यते इत्यभिप्रायकात् 'प्लक्षश्चेत्युक्ते गम्यत एतद् न्यग्रोध-श्चेति' समुच्चयाकारप्रदर्शनपरभाष्यात् समुच्चये एकः चपदसन्निहितः परसाहित्यमपेक्षते, न पर इतर साहित्यमिति प्रतीयते । न्यग्रोधसहितः प्लक्षो दृश्यता-मिति शाब्दबोधोदयात् । अस्मादेव भाष्यात् समुच्चये साहित्यस्य विशेषणताऽपि सिद्ध्यति । समुच्चये उभयोः परस्परं निरपेक्षत्वादेवात्र 'प्लक्षश्च न्यग्रोधश्च प्लक्ष-न्यग्रोधौ' इति इतरेतरयोगवन्न च-द्वयप्रयोगः । तत्र उभयोः परस्परसापेक्षत्वम्, अत्र च उभयोः परस्परं निरपेक्षत्वमिति तयोः परस्परं भेदोऽवगन्तव्यः । अत एव इतरेतरयोगे अनेक-चशब्दप्रयोगो दृश्यते । तथा च समुच्चये 'ईश्वरं भजस्व, गुरुं भजस्व' इति वाक्यद्वयप्रतिपाद्योऽर्थः ईश्वरं गुरुं च भजस्व' इत्येके-नैव वाक्येन 'ईश्वरसहितं गुरुं भजस्वे'त्येवरूपेण चशब्द-माहात्म्यादवबुद्ध्यते । समुच्चये चपदसमभि-व्याहृतस्य इतरापेक्षया किञ्चिदप्राधान्यं गम्यते । अत एव समकक्षयोर्मध्ये एकस्य समुच्चयत्वे अपमाना-नुभवेन दुःखादि दृश्यते । तथा चाह कैयटः—**यदा परस्परनिरपेक्षाः पदार्थाः क्रियायां समुच्चीयन्ते तदा समुच्चयश्चार्थः । यथा गामश्व पुरुषमित्यादौ । वाक्ये परस्परानपेक्षा गवादयो नयनक्रियायां सम्बद्ध्यन्ते** इति । अत्रैव कैयटग्रन्थ-व्याख्यानावसरे उद्योते भट्ट-नागेशः—"परस्परनिरपेक्षा इति । 'न्यग्रोधश्छिद्यतां प्लक्षश्चे'त्युक्ते न्यग्रोधस्य च्छेदनान्वये प्लक्षापेक्षाया अभावमात्रेण परस्परनिरपेक्षत्वमित्यर्थः" इति ।

दीक्षितास्तु—'परस्परनिरपेक्षस्य अनेकस्य एक-स्मिन्नन्वय' इति प्राहुः । अत्र 'यत्र'-तत्र' इति शेषः । तथा च यत्र परस्परनिरपेक्षस्य अनेकस्य एक-स्मिन्नन्वयः, तत्र समुच्चयश्चार्थ इति भावः । न तु अन्वय एव चार्थः । एकस्मिन्नित्यस्य च एकधर्मा-वच्छिन्ने इत्यर्थः । तेन ईश्वरकर्मकभजनस्य गुरु-कर्मकभजनाद्वस्तुतो भिन्नत्वेऽपि न दोषः, भजनत्वरूपै-कधर्मावच्छिन्नत्वस्य उभयत्र सत्त्वात् ।

तदुक्तं भट्टनागेशैः लघुशेखरे—'यत्रैवमन्वयः तत्र समुच्चयः चशब्दार्थ इत्यन्वयः । न तु अन्वय एव समुच्चय इति भ्रमितव्यम्' इति ।

"यदा परस्परनिरपेक्षाः पदार्था एकस्मिन् प्रति-सम्बन्धिनि समुच्चीयन्ते तदा समुच्चयः । यथा—'अहरहर्नयमानो गामश्वं पुरुषं पशुम् । वैवस्वतो न तृप्यति सुराया इव दुर्मदी' इति । यथा दुर्मदी सुराया न तृप्यति तथा यमो गवादीन्नयमान इत्यर्थः । अत्र नयति-क्रियायामेकस्यां गवादीनां समुच्चयः । गम्य-मानत्वाच्च चशब्दस्याप्रयोगः । एवं 'राज्ञो गौश्चाश्व-श्चे'ति द्रव्ये द्रव्ययोः, 'रक्तः शुक्लश्चे'ति द्रव्ये गुणयोः, 'रक्तः पटः कुण्डलं चे'ति गुणे द्रव्ययोः समुच्चय इत्यपि द्रष्टव्यमिति" पदमञ्जर्यां हरदत्ता प्राहुः ।

न्यासकारा अपि इत्थमत्र सङ्गिरन्ते–"समुच्चितिः समुच्चयः । साधनमेकं क्रियां वा प्रति क्रियासाधनाना-मात्मरूपभेदेन चीयमानता—अनेकत्वमिति यावत् । स पुनः तुल्यबलानामनियतक्रमयौगपद्यानामेव भवति । यथा गामश्वं पुरुषं पशुं चाहरहर्नयमानो वैवस्वत-स्तृप्तिं नोपयाति' इति ।

"तत्र तेषु चार्थेषु मध्ये ईश्वरं गुरुं च भजस्वेति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रकाराणां द्विप्रभृतीनामनेकेषां साधनानामनियतक्रमयौगपद्यानां तुल्यबलानां प्रत्येकमेकया भजस्वे'त्यादिकया क्रियया सम्बन्धी यः स समुच्चयः। आत्मरूपभेदेन चीयमानता हि समुच्चयः। स च सम्बन्धेनैव भवतीति सम्बन्धः समुच्चय इत्युक्तम्। अनेकेषामनियतक्रमयौगपद्यानां' तुल्यबलानामेकक्रियां द्रव्यं गुणं वा प्रति आत्मरूपभेदेन अनेकत्वं 'समुच्चय इति यावत्" इत्येवं विट्ठलाचार्याः तत्र। ईश्वरं गुरुं च भजस्वेति प्रत्येकमेकक्रियासम्बन्धः समुच्चयः", इति प्रक्रियाकौमुदीग्रन्थं व्याचख्युः।

अन्वाचयः

परस्परनिरपेक्षस्य अन्यतरस्य यत्र एकस्यां क्रियायामानुषङ्गिकत्वेन अनुद्देश्यत्वेन अन्वयः, इतरस्य तु अन्यस्यां क्रियायां प्राधान्ये उद्देश्यत्वेन अन्वयः, तत्र अन्वाचयश्चार्थः। यथा 'भिक्षामट गां चानय' इति। अटनेन प्राप्तिरत्र अट्धात्वर्थः। अटनेन भिक्षामाप्नुहि, तस्मिन् काले गौश्चेत् लब्धा, तर्हि तामप्यानय, नो चेन्न गवानयनाय त्वया प्रयतितव्यमिति भावः। अत्र भिक्षोद्देश्यिकाया अटनक्रियाया अवश्यकर्तव्यतया प्राधान्येन तत्सम्बन्धाद् भिक्षाया अपि प्राधान्यम्। गवानयनक्रियायाश्च आनुषङ्गिकत्वेन तत्सम्बन्धाद् गौरप्यनुद्देश्यत्वम्। यदा यदा गवानयनम्, तदा तदा भिक्षाटनम्। न तु यदा यदा भिक्षाटनं तदा तदा गवानयम्, इति स्थित्या गवानयनक्रियायां व्याप्यत्वमपि निश्चीयते। तथा च गवानयनरूपक्रियायां यद्व्याप्यत्वम् आनुषङ्गिकत्वं च तदेव चशब्दार्थः।

तथा हि—"इतरस्य आनुषङ्गिकत्वे अन्वाचयः" इति सिद्धान्तकौमुदीग्रन्थव्याख्यानावसरे भट्टनागेशाः—'आनुषङ्गिकत्व इति। तच्च अनुद्देश्यत्वम्। **अन्वाचये प्लक्षश्चेत्युक्तं गम्यत एतत्—सापेक्षोऽयमि'ति भाष्याद् 'एकस्य प्राधान्यम्, अपरस्य तदनुरोधेन क्रियासम्बन्ध'** इति कैयटाच्च। अत्र प्राधान्यं तत्सम्बन्धिक्रियाया अवश्यकर्तव्यत्वरूपम्। अत्र च व्याप्यत्वादिकमधिकं भासते, आनुषङ्गिकत्वम् इदं च चशब्दद्योत्यम्। तथा हि—अदर्शनादनाप्नुवन्नपि गामटत्येव भिक्षाम्। अनटंस्तु भिक्षां न गामानयति अटन्नपि नान्विष्यानयति। एवं च आनुषङ्गिकं भिक्षाटनव्याप्यं गवानयनमिति बोधः" इति प्रावोचन्।

पदमञ्जरीकारास्तु—'यदा अनेकस्य प्राधान्यात् तदनुरोधेन त्वितरादन्वाचीयते तदा अन्वाचयः। यथा–भिक्षामट गां चानय इति। अत्र हि अदर्शनाद् अनानयन्नपि गाम् अटत्येव भिक्षाम्। अनटंस्तु भिक्षां न गामानयति, अनटनपि नान्विष्य गामानयति' इत्येवम् अन्वाचयं परामृशन्।

न्यासकारा अपि इत्थमेव व्याख्यातवन्तः। तथा हि—'अन्वाचयोऽपि यत्रैकस्य प्राधान्यम्, इतरदप्रधानम्, तदनुरोधेन अन्वाचीयमानता। यथा—भो बटो! भिक्षामट, गां चानयेति।'

'क्रमेण क्रियाद्वयसम्बन्धे अन्वाचयः' इति प्रक्रियाकौमुदीव्याख्यानावसरे विट्ठलाचार्यस्त्वित्थमाह—'यदा त्वेकस्य प्राधान्यात् तदनुरोधेन इतरदन्वाचीयते तदा अन्वाचयः। यथा बटो! भिक्षामट गां चानयेति। अत्र भिक्षाटनं मुख्यं, गवानयनं तु तदनुरोधेन पश्चादन्वाचीयते। अत एवोक्तं क्रमेणेति' इति।

कर्तुः क्यङ् सलोपश्च (३.१.११) इति सूत्रमपि अन्वाचयस्योदाहरणम्। यतोऽत्र चार्थः अन्वाचय एव, न तु **स्थाध्वोरिच्च** (१.२.१७) इत्यत्रेव समुच्चयः। अत एव 'उपमानभूतं यत् कर्तृकारकं तद्वाचकात् सुबन्तादाचारार्थे क्यङ्प्रत्ययो भवति, चेत् स उपमानभूतः कर्तृवाचकः शब्दः सान्तः, तदा तदवयवस्य अन्त्यस्याल सकारस्य लोपोऽपि भवति इति वाक्यभेदेन अर्थः सम्पद्यते। तेन 'कृष्ण इवाचरति कृष्णायते' इत्यत्र असान्तत्वेऽपि क्यङ् सिद्ध्यति,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ओजशब्दस्य वृत्तिविषये तद्वति वर्तमानत्वेन ओजस्वीव आचरतीत्यर्थे 'ओजायते' इत्यत्र क्यङ्-सलोपौ च सम्पन्नौ भवतः। चशब्दस्य समुनुच्चयार्थकत्वे तु सलोपसन्नियोगेनैव क्यङ्विधानापत्त्या ओजायते इत्यादिसिद्धावपि 'कृष्णायते' इत्यादिर्न सिद्ध्येत्। तथा चात्र भाष्यम्—'सलोपसन्नियोगेनायं क्यङ् विधीयते। तेन यत्रैव सलोपः, तत्रैव क्यङ् स्यात्—पयायते। इह न स्यात्-अपि काकः श्येनायते। नैतदस्ति। प्रधानशिष्ट क्यङ्, अन्वाचयशिष्टः सलोपः, यत्र च सकारं पश्यतीति। तद्यथा कश्चिदुक्तो ग्रामे भिक्षां चर देवदत्तं चानय। स ग्रामे भिक्षां चरति, यदि देवदत्तं पश्यति तमप्यानयति इति। एतद्व्याख्याने कैयटोऽप्याह 'एकवाक्यतां सन्नियोगार्थं च चशब्दं मत्वा चोद्यते। वाक्यभेदम्, अन्वाचये चशब्दमाश्रित्य परिहारः' इति। 'अत्र चकारोऽन्वाचये' इत्युद्योते नागोजिभट्टा अपि ब्रुवन्ति।

इतरेतरयोगः

परस्परनिरूपितसाहित्यवतां उद्भूतावयवभेदसमूहरूपाणाम् एकधर्मावच्छिन्ने एकसम्बन्धेनान्वयो यत्र, तत्र इतरेतरयोगः परस्परसाहचर्यं परस्परसाहित्यं चार्थः। इतरेतरयोगे प्लक्षश्च न्यग्रोधश्चेत्युक्ते गम्यत एतद्—प्लक्षोऽपि न्यग्रोधसहायो, न्यग्रोधोऽपि प्लक्षसहायः' इति भाष्यात्, इतरेतरयोः परस्परं योग इति व्युत्पत्तेश्च। अत एवात्र इतरेतरयोः परस्परं योगस्य बोधकोऽनेकचकारपदप्रयोगः।

तथा च कैयटः—'इतरेतरयोगः परस्परापेक्षाणामनेकेषामेकस्मिन्नर्थे समन्वये सति भवति इति परस्परसहितता चशब्देन द्योत्यते' इति।

पदमञ्जरीकाराश्च—'इतरेतरयोगस्तु परस्परापेक्षाणामवयवभेदानुपगमेन समुदायरूपतामापन्नानामेकस्मिन्नर्थे अन्वये सति भवति। यथा देवदत्तयज्ञदत्ताभ्यामिदं कार्यमिति। तत्रैकापायेऽपि न तद् भवति। उद्भूतावयवभेदत्वाच्च द्विवचन-बहुवचने भवतः। तादृशानामेवावयवतिरोधानं संहतिरूपेणान्वये तत्समाहारः। यथा छत्रोपानहम् इति। संहतिप्रधानत्वात्तु एकवचनम्' इति प्रोचुः।

अन्योन्यापेक्षया एकक्रियासम्बन्ध इतरेतरयोग' इति रामचन्द्राचार्यग्रन्थविवरणावसरे विठ्ठलाचार्योऽपि—"परस्परापेक्षाणां साधनानामवयवभेदानुगत एकक्रियासम्बन्ध इतरेतरयोग इति यावत्। यथा 'हरिहरौ कुरुत' इत्यत्रैककार्ये उभावपि परस्पर सापेक्षौ। तथा हि—तदेकस्याप्यभावे न क्रियते। अवयवप्रधानश्चायमिति द्वित्वाद् द्विवचनम्" इति लिलेख।

जिनेन्द्रबुद्धिस्तु इत्थमुचे—"इतरेतरयोगः समाहारश्च समुच्चयस्यैव प्रभेदः। स एव हि परस्परापेक्षाणामवयवभेदानुगत इतरेतरयोगः, यथा देवदत्तयज्ञदत्ताभ्यामिदं कार्यं कर्तव्यम्। उभावपि तत्कार्यं प्रति परस्परापेक्षौ। तथा हि—तदेकस्याप्यभावो न क्रियते। अवयवप्रधानश्चायमिति द्वित्वाद् द्विवचनं भवति" इति।

समाहारः

परस्परसापेक्षाणां तिरोहितावयवभेदसमूहतया एकधर्मावच्छिन्ने एकसम्बन्धेन यत्रान्वयस्तत्र तिरोहितावयवभेदः समूहःसमाहारश्चशब्दार्थः। समूहश्च साहित्यम्, समाहारशब्देन अनुद्भूतावयवभेदसाहित्यस्यैवाभिधानात्। स च साहित्यापरपर्यायः चार्थः समूहः समासे अत्र विशेष्यः, द्रव्यं विशेषणम्। किन्तु मिलितानामेवान्वयो वाच्यः। मेलनं च समुदायः। स च वर्तिपदार्थं प्रति विशेषणं विशेष्यं चेति द्वैधम्। तत्राद्ये इतरेतरयोगद्वन्द्वः, द्वितीये समाहारद्वन्द्वः। उभयथापि समुदायस्य द्वन्द्वेनोक्तत्वात् चशब्दाप्रयोगः' इति मनोरमाग्रन्थात् 'इतरेतरयोगे साहित्यं विशेषणम्, द्रव्यं विशेष्यम्। समाहारे तु साहित्यं प्रधानम्, द्रव्यं विशेषणम्' इति तत्वबोधिनीग्रन्थाच्च।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नागेशभट्टास्तु—'प्लक्षश्च न्यग्रोधश्चेत्युक्ते गम्यत एतत्—'प्लक्षोऽपि न्यग्रोधसहायो, न्यग्रोधोऽपि प्लक्ष-सहायः' इत्येवमितरेतरयोगस्वरूपप्रदर्शनपरभाष्याद् इतरेतयोगेऽपि उद्भूतावयवभेदसाहित्यस्यैव, न तु द्रव्यस्य विशेष्यत्वेन प्रतीतौ—समाहारे इतरेतरयोगे चेत्युभयत्रापि द्वन्द्वे चार्थसाहित्यस्य विशेष्यत्वमेवाऽऽमनन्ति। अत्र मते समुच्चयान्वाचययोरर्थयोश्चकारो द्योतकः, इतरेतरसमाहारयोस्तु वाचकः, उभयत्र द्वन्द्वे चार्थस्य विशेष्यतया भानात्।

तथा चोक्तं श्रीनागेशेन—

(१) मञ्जूषायाम्—'धवखदिरावि'त्यादौ इतरेतरयोगद्वन्द्वे उद्भूतावयवभेदः समूहः समासार्थः। अत एव **'चार्थे द्वन्द्वः'** इति सूत्रे भाष्ये चार्थे विधीयमानस्य द्वन्द्वस्य तद्वदेवालिङ्गसंख्यतामाशङ्क्य शब्दशक्तिस्वभावेन, गुणवचनानामिवाश्रयतो लिङ्गवचनानीत्यनेन वा परिहृतम्। बहुव्रीहौ अन्यपदार्थस्येव अत्रापि चार्थस्यैव प्राधान्यौचित्यात्'। 'एवं च इतरेतरयोगे साहित्यं विशेषणमिति सूत्र-भाष्याद्यसम्मतम्।' 'तत्र नेतद् भाष्यं समाहारविषयं, तस्य वाचनिकलिङ्गैकवचनयोः सत्वात्।' "पाणिपादमित्यादिसमाहारे त्वनुद्भूतावयवभेदः समूहो विशेष्य इति बोध्यम्। उद्भूतावयवभेदत्वं च अवयवगतसंख्याद्यारोपवत्त्वम्, तद्विपरीतमनुद्भूतावयवभेदत्वम्। उभयत्रापि द्वन्द्वे समूहो नावयवव्यतिरिक्तः, धवखदिरं, धवखदिरौ, इति स्वशब्दैरेवाभिधानात्। अवयवातिरिक्तस्तु 'यूथं' 'वन' मिति शब्दान्तरेणैवोच्यते। एतेन इतरेतरयोगे तदनतिरेकेण भानम्, समाहारे तु तदतिरेकेणेति परास्तम्' इति।

(२) लघुशब्दरत्ने च—"द्वैधमिति प्रौढमनोरमाप्रतीकमादाय—'यथा तु चार्थं इतिसूत्रे भाष्ये तथा उभयत्रापि समुदायस्य विशेष्यत्वम्। आद्ये उद्भूतावयवभेदः, अन्त्ये तिरोहितावयवभेद' इति। अन्यपदार्थप्राधान्ये बहुव्रीहेरिव चार्थप्राधान्यं द्वन्द्वस्येति सत्त्वाच्च। उद्भूतावयवभेदत्वमारोपितावयवगतसंख्यावत्त्वम्। एतदनारोपे तिरोहितावयवभेदत्वम्। अन्यथा स्वपदैस्तेषामुभयत्रापि तत्तद्रूपेण-बोधात्तत्त्वं दुरुपपादम्। आरोपानारोपयोश्च शब्दस्वभाव एव बीजम्। अत एव आद्ये घटश्च पटश्चेति विग्रहः, अन्त्ये तयोः समाहार इति तत्त्वम्" इति।

न्यासकर्तॄणां मते तु "समुच्चयान्वाचयौ इति द्वावेव प्रधानतया चार्थौ। इतरेतरयोगसमाहारौ च समुच्चयप्रभेदावेव। तथा हि—परस्परनिरपेक्षाणामेकत्रान्वये समुच्चयः परस्परसापेक्षायाम् उद्भूतावयवभेदसमूहरूपाणामेकत्रा वये इतरेतरयोगः, तेषामेव तिरोहितावयभेदसमूहत्वेनान्वये समाहार इति एकत्र एकसम्बन्धेन अन्वयित्वरूपसमुच्चयत्वस्य सर्वत्र विद्यमानत्वात्। तथा च न्यासग्रन्थः—'इतरेतरयोगः समाहारश्च समुच्चयस्यैव प्रभेदः। स एव हि परस्परापेक्षाणामवयवभेदानुगत इतरेतरयोगः। परस्परापेक्षाणामेव तिरोहितावयवभेदः संहतिप्रधानः समाहारः इति।

'ईश्वरं गुरुं च भजस्वे'ति समुच्चये अतिव्याप्तिवारणाय परस्परसाहित्यवतामिति। एकधर्मावच्छिन्नेऽन्वय इति विशेषणनिवेशाद् उत्तरदेशसंयोगानुकूल-व्यापारानुकूल-व्यापारवाचकतया 'नी'धातोः द्विकर्मकत्वेन अजां ग्रामं नयतीत्यादौ नयत्यर्थे परस्परापेक्षयो अजाग्रामयोः स्वकर्मकत्वरूपैकसम्बन्धेनान्वयेऽपि नातिव्याप्तिः। ग्रामस्य उत्तरदेशसंयोगरूपे, प्रथमव्यापारजन्यफले, अजायाश्च द्वितीयव्यापारजन्ये प्रथमव्यापाररूपे फले अन्वयेन एकधर्मावच्छिन्नेऽन्वयाभावात्। अत एव अत्र न चकारपदप्रयोगः। इतरेतरयोगे तु तद्घटकपदार्थानां परस्परं सम्बन्धसत्त्वेन तद्बोधनाय प्रतिशब्दं चशब्दप्रयोगस्य आवश्यकता भवत्येव, धवश्च खदिरश्चेतिवत्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पूर्णाहुतिः—महाभारतीयमभिनवं नाटकम्

-- कविवरः श्री कृष्णप्रसाद घिमिरे --

(...)

(ततः प्रविशतो वृष्णिवंशोद्भवौ सुबल - चारुवर्ण-नामानौ द्वौ युवानौ परस्परं स्कन्धावसक्तभुजयुगलौ ।)

सुबलः (द्वारकास्थिताऽन्धक - कुकुरकुल - प्रासाद-पङ्क्त्यन्तर्गतं राजमार्गं समाश्रित्य सखायं प्रति)—प्रिय चारुवर्ण ! कथं विशोभन्ते इमाः कुकुरा-ऽन्धकवंश्यानां सुरम्या भवनपङ्क्तयः । विदृश्यन्ते च स्वरूपावलोकन-शीलानां महात्मनां विशुद्धेन्द्रियवृत्तयो यथा । इतः पुरः पश्य महाबाहो ! ऊर्ध्वशिखस्य गृहस्य ऊर्ध्व-भागं यस्मिन् सर्वैरपि गृहपरिजनैर्मिलित्वा भगवतो वासुदेवस्य कालयवनवधानन्तरं गिरिगुहासु सुशो-भितां महायोगिना महाराजेन मुचुकुन्देन समं संकृत-संलापां प्रभोः प्रतिकृतिम्, तत्रैव विन्यस्य तामेव सुविभूषयितुं कृतप्रयत्नांश्चेमान् उदारात्मनः । सैव चैकमात्रं ध्येयवस्तु प्रियतरा च अमीषाम् । धन्याः खल्विमे ।

चारुवर्णः (स्निग्धया स्वदृष्ट्या स्वसखमवलोक्य)—प्रिय सुबल ! किमर्थं न तस्मात् प्रिया ? भगवतो वासुदेवस्याऽनन्यप्रेमिणां सर्वेषामपि प्रियतमा खल्वेषा, न तु तेषामेव । (किञ्चिद्विहस्य) इतः पश्य इमान् ईदृशिक मंण्यपि विहितप्रयत्नान् स्वकर्मणैव सुप्रशंस्यात् । ये नामासम्भवमपि सम्भवीकर्तुं प्रयतन्ते । धन्य एतेषां सुप्रयत्नोऽपि । ये नाम कञ्चिद् दृश्यविशेषं प्रतिमूर्ति-गतं विधाय समये तमेव जीवत्वमाप्तं कर्तुं द्रष्टुञ्च तादृशमेव पुरातनसत्यसम्बद्धं व्यवसिता विदृश्यन्ते । तद्धन्यास्तेऽपि महामहान्तो हि ।

सुबलः—किं चिकीर्षन्ति चैते महानुभावा-श्चारुवर्ण ! कः प्रयत्नश्चैतेषाम् ?

चारुवर्णः—यत्तस्यैव व्रजपतेर्नन्दनन्दनस्य संश्रुत-स्वजनाऽऽक्रन्दस्य अलौकिकया शक्त्याऽनुकम्पया च विना तथाभवितुमेव न पार्यते ।

सुबलः—किं किं तद् ?

चारुवर्णः—संश्रृणु सुबल ! कालियदमनानन्तरं तत्पत्नीभिः सुपूजितेन तद्ध्रदाद्बहिरागतेन भगवता वासुदेवेन स्वया सुधामय्या सुदृष्ट्या कालिन्दीतटे विषकलुषितजलपानेन उद्गतजीवनानां स्वप्रियसखानां गोपालबालकानां गोवत्सानां गवाञ्च पुनरुज्जीवनेन निदेशितायाः स्वदयालुताया निदानभूतं सुदृश्यं समुट्टङ्कयितुं व्यवसिता इमे । यच्चित्रगतमपि प्रभोर्वासु-

---

→अत एवात्र एकार्थीभावः स्वीकृतः, बहुव्रीहिसमास-घटकपदानां कर्मान्यन्तभविणेव द्वन्द्वसमासघटकपदाना-मपि चार्थान्तरभावेण एकार्थीभावस्यावश्यकत्वात्, **समर्थः पदविधिः** इति परिभाषितत्वात्, **चार्थे द्वन्द्वः** इत्युक्तेश्च । इतरेतरयोगे चार्थः = साहित्यं, विशेषणम्, द्रव्यं च विशेष्यम्, समाहारे तु चार्थो विशेष्यः द्रव्यं विशेषणम् मिति कयट-हरदत्त-दीक्षित-ज्ञानेन्द्रभिक्षवः । धवसहितखदिरकर्मकं छेदनमिति च तेषां मते बोधः । समूहे उद्भूतावयवभेदत्वं च तद्घटकावयवगतसंख्या-रोपत्वम्, प्रत्यवयव समूहत्वारोपो वा । अत एव अत्र द्विवचन-बहुवचने भवतः, प्लक्षन्यग्रोधौ, घटपट-मठा इति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

देवस्य, इन्द्रप्रस्थप्रस्थानसमारोहे अत्राऽऽगतवति प्राक्तनसत्यस्वरूपं लब्धमुज्जीवितं सत् पूर्ववत्सचैतन्यं विहिततत्सर्वकार्यञ्च विहरयेत तत्रत्यैनरनारीभिः अन्यैश्च दर्शकैर्जनैः सुवीक्षितं सदिति। तदर्थमेवेत्थं व्यवसिताः।

सुबलः—प्रिय ! किमत्र सफला भविष्यन्ति इमे ?

चारुवर्णः—इदमित्थं वक्तुं कथं शक्यम् ? विचिकित्सैव विराजते मदीये हृत्पटेऽपि। किन्तु तस्यैव-अमोघशक्तेः पुरत एतत्सर्वं न किमपि, इत्यपि विचारयाम्येव।

सुबलः—पश्याम एवैतत्सर्वमपि। परं कथय, कुत्र स्थिताः समीक्ष्यावहे दृश्यमेतत्, भगवतः प्रस्थान-महोत्सवञ्च ?

चारुवर्णः—प्रिय ! तत्रैव संस्थिताः पश्यामः। एतेषामुदारात्मना सुकृतप्रयत्नचमत्कारेण सार्धमेव विश्वेशस्य सुदर्शनं कुर्मः।

सुबलः—युक्तमभिहितं त्वया। परन्तु सखे ! भगवत समारोहागमनात् पूर्वमितस्ततो भ्रामं भ्रामं संपश्यामस्तुभ्यं रोचते यदि पुनरन्या अपि प्रस्तुताना-मेतेषां द्वारकाभवानां चेतनाऽचेतनात्मकानां वस्तुमात्राणां वार्तमानिकाः परिस्थितीः।

चारुवर्णः—युक्तम्, तद् गच्छामः।

(इत्युभयो राजमार्गयोस्तटेषु विनिर्मितानां हर्म्याणां मधोभागेषु संस्थिताः पण्यवीथिकाः, तत्रत्यसुसज्जितवस्तुजालानि च दर्शं दर्शं परस्परं तेषामेव सुवर्णनं कारं कारं युवानौ उभावपि दूरं व्रजतः।)

सुबलः (तदन्तरा)—चारुवर्ण ! पश्यैतो द्वारिका-निवासिनः पौराः स्वहस्तपद्मेषु समादाय पुष्पलाजा-क्षताङ्कुरादीनि फलानि उपहारवस्तूनि चागुरु-धूपादिभिः सुगन्धिता भगवतो नन्दनन्दनस्य शुभा-गमनमेव प्रतीक्ष्यन्ते।

चारुवर्णः—किमर्थं न कुर्युः ? शुभागमनवेलाऽपि तु सञ्जातैव। किं न शृणोषि त्वं प्रभोर्गगनचुम्बिनि प्रासादे संस्थितानां द्वारिकापुरन्ध्रीणां सुमाङ्गलिकाभिः गीतिकाभिः समं गुञ्जितानां शङ्खभेर्यादिकानां वाद्यानां सुतुमलं रवमपि ?

सुबलः (कर्णौ दत्वा)—श्रुतं चारुवर्ण ! गच्छाव आवां पूर्वनिर्दिष्टस्थानमेव।

चारुवर्णः (जिगमिषन्तं सखायं बाहौ समाकृष्य)—इतः समागच्छ ! समयोऽवशिष्यते तावत् (किञ्चि-दग्रे गत्वा) संपश्येमाम् एभिर्वृष्णिवंशिभिः यादवैश्च स्वस्वावाससीम्नि निर्मिते प्रस्थानोत्सवप्रदर्शनैमित्तिके प्रधानद्वारे चित्रितां विचित्रां भगवतो भूतनाथस्य भवानीपतेर्भव्यां मूर्तिम्। एनामभितः संश्रिताः क एते महानुभावाः परिचिताः किम् ? बहुवर्णमिश्रित-ज्योतिःपुञ्जाः खल्विमे भूतवर्गा सुमनोहरस्वरूपिणो ध्यानदृष्टयैव अवगन्तव्याः सुशोभनं चित्रिताः।

(सप्रसन्नम्) अहो ! विचित्रं चित्रिता खलु विचित्रा जगन्नियन्तुर्भगवतो भूतनाथस्याऽप्यलौकिकी शक्तिः। धन्यो भगवान् भवः सर्वदा इत्थमेव विजयतां स्वभक्तरक्षणव्रती स्वप्रियजनचित्ताकर्षण-संलग्नवृत्तिः तत्परित्राणविवृद्धस्फूर्तिः। परमहो ! भगवता वासुदेवेन यः प्रभुरासीत् मायाविनामपि मायावी जृम्भणास्त्रप्रयोगेण विधाय विजृम्भमाणं भगवन्तं भवानीपतिमपि हा अपवारिता सकललोक-संग्रसनसमर्था तच्छक्तिरत्र। तदेतेनैव सुविनाशिता भगवता नन्दनन्दनेन सर्वलोकाभयदेन तम इव ज्योतिषा तदलौकिकीचातुर्यपि।

(दक्षिणतर्जन्या निर्दिष्य) पश्य ! पश्याऽत्र वृक्षच्छेदकेन, परशुना विनिकृन्तास्तत्स्कन्धा इव विनि-पातिता महाशैवस्याऽस्य सुपवित्रकीर्तेर्महाराजबाण-स्याऽपि गजशुण्डनिभाः परिघाकारा बाहवः। तदास्तां तावत्। इत आगच्छ द्रुतम् ! (जनसंमर्दमभिसरन्) अहो ! सुबल ! गोपालबालकानां वृन्दावनभवं पुरा-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तनवृत्तस्मारकं सुन्दरमभिमयं कुर्वन्तो निदर्शयन्तश्च भगवतो वासुदेवस्य वृन्दावनीयाः परिस्थितीः समागता इमे नागरिकाः शिशवः कीदृशः सुशोभन्ते।

(साश्चर्यम्) पश्य ! पश्य ! धन्योऽसौ नवनीरदनीलशरीराभो विहितश्यामसुन्दराभिनयो बालकैर्गोपालबालकानामिव कृतानुकृतिभिः संवृतः शिशुरपि येनाऽभिनीतो भगवतो गोविन्दस्यैव अभिनयोऽपि विशोभतेतराम्। सुकोमलस्निग्धचिकुरैः सुशोभमानं तच्छिरोरत्नभूतं मयूरपिच्छमपि भगवतो भास्करस्य प्रभापूरितं प्रक्षिप्तबहुविधवर्णदीप्तज्योतिश्चयं विदृश्यते कीदृशं सुमनोहरम्। (उभौ किञ्चिदग्रे गच्छतः, शिशवोऽपि तावेवाऽभिसरन्ति।) धन्येयं वंशी अपि या तद्धस्तौ अभिशोभयते।

(इतो मध्येमार्गं कृतश्रीकृष्णाभिनयो बालको वंशी स्वनिःश्वासग्राहिणीं विधाय सुमधुरं विस्पष्टञ्च वादयति। तद्वादनं विश्रुत्य सर्वे तत्रत्या दर्शका नागरिकाश्च चित्रलिखिता चित्राणीव मन्त्रमुग्धा भुजगा इव विस्मृतसर्वलोकव्यवहारा वितिष्ठते। सुबल-चारुवर्णावपि तद्वादनं संप्रदत्तसर्वेन्द्रियं निशम्य तथैव भवतः।)

सुबलः (किञ्चित् क्षणान्तरम्)—कीदृशो मधुरश्चित्ताकर्षकश्च अस्या रवः सुस्पष्टं विश्रूयते ! सोऽपि कर्णगोचरीभूतः।

चारुवर्णः (सजिज्ञासम्)—कथय किं विश्रुतं त्वयाऽस्मिन् रवे ?

सुबलः (सुप्रसन्नो भूत्वा)—शृणु ! (तदनुकरणं कुर्वन्नुच्चैर्गायति।)

शृणुत शृणुत बाला वत्ससङ्घानिमान् स्वान्
दिनकरतनयायास्तीरदेशे विसृज्य।
जलममृतसमानं स्वच्छमापीय तस्या-
स्तरुतलमधिवस्तुं तूर्णमायात यूयम्॥

किं न वेतद् अक्षरशः सत्यं सखे चारुवर्ण।

चारुवर्णः (सुप्रसन्नो भूत्वा)—सत्यं सर्वथैव सत्यं प्रिय ! भगवद्गतात्मभावेषु त्वादृशेषु परहृद्भयभावविज्ञानं सहजमेव विराजतेतराम्। का कथा चान्यैरुच्चारितशब्दज्ञानस्य। परं धन्यवादपात्रं विशेषतस्त्वं येन स्वसंस्कारवशात् स्वस्मिन्नेव अवगता भगवल्लीलाऽप्येतादृशी।

[उभौ बालगोपाल-श्रीकृष्णानुकारिणं तं बालकमेव एकदृष्ट्या पश्यतः।]

सुबलः—प्रियसखे चारुवर्ण ! (शिशुना स्वात्मवेषेणैव विमुग्धीकृतवर्णो विवर्णश्चारुवर्णः स्थिरवृत्तितया किमपि न ब्रवीति। सुबलोऽमुष्य दक्षिणबाहुं विधृत्यादधूय पुनरेनमाकारयति—)

चारुवर्ण !

[चारुवर्णस्तथापि तथैव संतिष्ठते चित्रगतो यथा भवति च। इत एतौ ईदृशौ दृष्ट्वा विमुग्धात्मानो दर्शकाः स्वनेत्रपुटानि विस्फार्य तदिमौ पश्यन्ति।]

चारुवर्णः (किञ्चित्कालान्तरम्)—सुबल ! इत आगच्छ।

[चारुवर्णः सशीघ्रपादं बालकममुमभ्येति। सुबलस्तमनुसरति।]

सुबलः (उद्विग्नेन मनसा)—कथय, कथय चारुवर्ण ! किं विदृष्टं त्वया ?

[इतश्चारुवर्णो निश्चलदृष्ट्या तमेव बालकं निरीक्ष्यमाणस्तिष्ठति। क्षणात्तदैव तद्बालकहृत्पटले श्यामसुन्दरस्य भगवतो वासुदेवस्य शिशुभिस्तदनुकृताया लीलायाः सत्यस्वरूपमेवाविर्भवति। सुस्पष्टं विदृश्यते च तथैव तदैव साग्रजोऽर्भकैः परिवृतो मुरलीविमोहनो मोहनो भगवान्। तद्बिम्बाधरसुशोभिता सैषा वंशी सुबलगीतमुपरितनं तदेव गीतं सुमधुरं प्रकटयति विशुद्धशब्दब्रह्मस्वरूपेण। क्षणादेव पूर्वोक्तानि इमानि दृश्यजालानि तत्रैव तथैव समीक्ष्य प्रेमावेशविह्वलोऽसौ चारुवर्ण आत्मानमेव धारयितुमसमर्थो भूत्वा झटिति सशब्दं भूमौ निपतति। दर्शकास्तत्रैव समायान्ति। क्षणादेव जनसंमर्दो जरीजृम्भते। इतः सुबलश्चारुवर्णं धारयते।]

प्रथमो दर्शकः (सुबलं प्रति)—किमेतत् ?

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्वितीयो दर्शकः—किं किम् ?

सुबलः (सोद्विग्नम्)—किं किम्! किं किम्! (स्वोत्तरोयेण चारुवर्णमभिवीजयते)

प्रथमो दर्शकः (सजिज्ञासम्)—तत्र भवत इदृश्यवस्था भूतपूर्वाऽऽसीन्न वा ?

सुबलः—नासीत्। सर्वंप्रथमेयम्।

द्वितीयो दर्शकः—तद्रोगविशेषोऽयम्।

दर्शकः—एवमेव, अपस्मारः खल्वेषः। आकारणीयोऽसौ वैद्यवरो जगदीश्वरश्रीकृष्णप्रियः कृष्णप्रसादशर्मा घिमिरे" इत्युपाह्यः। सैष ईदृशान् रोगान् मन्त्रमयैः श्लोकैरेव मनोहरं सुपठितैर्भस्मीकरिष्यति।

[इतः कृतवासुदेवाभिनयो बालकः स्वहस्तविद्योमितां वंशीं पुनर्वादयते। विश्रुत्यैतस्या रवं सर्वे श्रोतारो विमुग्धीभूता वितिष्ठन्ते। तदैव चारुवर्णः स्वहृद्गतभावं निगूह्य समुत्तिष्ठति।]

दर्शकाः (चारुवर्णं लक्ष्यीकृत्य)—अकस्मात् कथं व्यामोहः समजनि ?

चारुवर्णः—इत्थं सञ्जात इति वक्तुं नाहमीशः।

[तदैवाऽस्य दृष्टिर्भूयोऽपि तद्बालस्हृत्पटल एव परिपतति। परं तत्र तेन दृष्टपूर्वो हृश्यविशेषो न दृश्यते येनाऽसौ चारुवर्णः पुनर्विवर्णः सञ्जायते।]

वंशीवादकः (चारुवर्णं प्रति)—आगम्यतां गच्छामस्तावत्।

चारुवर्णः (दर्शकानां दृष्टौ स्वामुदासीनतां निदर्शयन्)—अयमहमागतः (सुबलं निरीक्ष्य) प्रिय सुबल! द्रुतमागच्छ, गच्छाव आवामपि। (उभौ पूर्वनिर्दिष्टं स्थानं प्रति सद्रुतं गच्छतः। मार्गेऽन्तरा) सखे! कोऽर्थोऽवगतस्त्वया ?

सुबलः—विरम विरम चारुवर्ण! पश्येमं ढक्कावादकं समागतं पुरस्तात् वादयंस्तां किमपि श्रावयति नः पौरान् हेतुमद्वाक्यम्। शृण्वस्तावद् आवामपि।

(तदैव ढक्कावादकमुखात् निःसृतमघस्तनवाक्यं विश्रूयते सुविस्पष्टम्।)

सुविशुद्धब्राह्मणचरणरजःस्नापितशिरस्को विश्वेश्वरो भगवान् वासुदेवः समाज्ञापयति साभिनन्दनं सप्रहर्षं स्वान् प्रियान् वः पौरानिदम्। तत्सर्वैः दत्तावधानैर्भाव्यम्? शृणुत शृणुत सर्वे पौराः! द्वारकानिवासिनो मदीया प्रियतरा आबालवृद्धवनितादिसंयुता नागरिका जानपदाश्च! अहमधुना किञ्चिदग्र एव महाराजयुधिष्ठिरस्य भविष्यति भाविनि यज्ञराजे राजसूये निमन्त्रितो भूत्वा किञ्चित्कार्यवशेनैव तद्राजधानीमिन्द्रप्रस्थपुरीं प्रत्यभियामि। एते हि मत्सार्धमेव तत्र गच्छन्ति लौकिकपारलौकिकस्वस्वकार्येभ्यः संप्राप्तावकाशा द्वारकानिवासिनो मत्परिजनाः, अन्ये च तदुत्सुका महात्मानो महानुभावाः श्रेष्ठिनश्च।

तस्माद् यूयमपि तत्र जिगमिषथ वरीवर्ति चेदवकाशः अद्यैव मया साकं सज्जीभूय आगच्छत। कार्यातिपातादवकाशाभावाच्च असमर्था न शक्नुत चेत्तत्र गन्तुं साम्प्रतं समुपयुक्तसमयेऽहं तत एव युष्मान् साग्रहं सादरं तत्रागमनार्थं सन्निमन्त्र्य आकारयिष्यामि। अवश्यमेव आगन्तव्यं तदाऽस्मिन् महावरे भवद्भिः। किमिति चेत्पार्थस्य राज्ञोऽस्मासु महान् सदाग्रहो दृढानुरागसिञ्चितोऽन्वहं विजृम्भतेतराम्। यद्भवद्भिरपि नित्यमनुभूतमेव वरीवर्ति। तदनन्यप्रेम्णा सदाग्रहेण च समाकृष्टचित्तैर्युष्मद्भिरपि तत्र आगन्तव्यमवश्यमेवेति पुनःपुनरनुरुन्धामहे। (इति ढक्कावादकोऽग्रेऽभिसरति।)

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृत-प्रचार-तन्त्रम्

--श्री गणेशराम शर्मा--

(५)

मित्रगोष्ठी-वृत्तवर्णनानि

(१०) संस्कृतप्रचाराय संस्कृतज्ञानां विदुषां समायोजितासु सुहृद्गोष्ठिषु मित्रमण्डलीषु वा सहृदयतया विद्वत्तया चोन्मुक्तकण्ठं ये हासपरिहास-गर्भा वैदग्ध्यपेशला मार्मिका मिथो मनोविनोद-पराः सम्भाषणचातुर्योत्कृष्टा वार्तालापाः, शास्त्रार्थ-प्रसङ्गाः, काव्यकलाविलासाश्च जायेरंस्तेषां वर्णनं पत्र-पत्रिकासु गद्यरूपेणावश्यं विधेयम्। यान् विषयान् बहून् वर्षानधीत्यापि यथार्थतोऽवगन्तुं न पारयन्ति जनास्तान् रसिकशिरोमणीनां बहुश्रुतानां सभाचतुराणां सचेतसां भावप्रवणानां पारस्परिक-वार्ताश्रवणेन पठनेन चानायासं बोद्धुं प्रभवेयुः पाठकाः, व्युत्पत्तिं चाश्रयेयुश्छात्राः। संस्कृतभारत्याः भास्वरता च पुनः साक्षाद्भवेदेव। साधूक्तम्।—

सदा सन्तोऽनुगन्तव्या यद्यप्युपदिशन्ति न।
या हि स्वैरकथास्तेषामुपदेशा भवन्ति ता.॥

विद्वज्जनानां सुहृद्गोष्ठीवर्णनात् सहृदयाः पाठकाः प्रसुप्तामपि स्वप्रतिभां सत्संस्कारैः सम्पन्नां साधयितुं प्रभवन्ति। फलतस्तेषां बुद्धिविकाशोन्मुखी प्रस्फुरेत्, संसदि सभ्यतानियमानां परिपालने प्रवृत्तिः जागृयात् जनानाम्। रुचिपरिष्कारेणैव साकं संस्कृत-शिक्षादाक्षा - शिष्टाचारोपलब्धिश्च भवेत्। संस्कृत-भाषायाः प्रसृतिर्वाक्चातुरी च साकर्षणं सम्पद्येत।

नव्यं भव्यं गद्यवाङ्मयं विरचयत

(११) संस्कृते प्रबन्धकाव्यान्तर्भुक्तं पद्यकाव्यं मुक्तककाव्यं च छन्दोबद्धं सर्वोत्कृष्टंलोकातिशायि-चमत्कारजुष्टमुपलभ्यते। दण्डिकवि-बाणभट्ट-त्रिविक्रम-भट्टाऽम्बिकादतव्यासादीनां गद्यग्रन्थाः स्वमहिम्ना विजयन्ते, संस्कृतनाटकानि मनोहारीणि चारूणि चापूर्वाण्येव सन्ति विश्वसाहित्ये, नात्र कोऽपि सन्देहः। किन्तु यावद् गद्यशैलीनां वैविध्यसम्बन्धस्तावदि-दानीन्तने गद्ये लोकहृदयग्राहिणीनां नवनवानां गद्य-शैलीनां तत्प्रकाराणां च विचित्र एव कोऽपि सार्व-भौमो विकाशो जायमानो विलोक्यते सर्वभाषा-साहित्याकाश - क्षितिजे। अतो वयं संस्कृतभारतीं सेवन्तो जना विविधाभिरभिनवाभिर्गद्यशैलीरीति-भङ्गीभिः सामयिकं साहित्यं सृष्ट्वा संस्कृतप्रचारणे सोद्योगा भवेम। संस्कृते लोकजीवनचित्रणपराः समाजे-तिवृत्तधर्मराजनीतिगार्हस्थ्योपयोगिन उपन्यासाः, गल्पकथाः, प्रहसनानि, लघुकथाः, संवादाः, गद्य-काव्यानि, गद्यगीतानि, गद्यसूक्तयो, नाटकान्ये-काङ्कानि, रोमाञ्चकारिण्यो विज्ञानयन्त्राविष्कार-कथा विज्ञानास्त्रयुद्धवर्णनवृत्तानि, यात्रावर्णनानि, साहसकर्मकथा, गुप्तचरानुसन्धानकौशलानि, समुद्र-सन्तरण-पर्वतारोहणादिसंकथा लेखकैर्लेख्या। ताश्च पत्रपत्रिकासु प्रकाश्य सचित्रा विचित्राश्च प्रचार्याः। इत्थं कृतेऽपि संस्कृतप्रचारः सुकरः स्यात्।

संस्कृत-पत्रकारिता परिष्कार्या

(१२) प्रथमं तु तावदियमेव महती विडम्बना, यन्नाद्यावधि संस्कृतपत्रकारितायाः क्रमविकासो-ऽधुनातनजीवनसङ्घर्षसक्षमां स्थितिमाससाद। तत्रापि नवलेखकनिर्माणे तु न कोऽपि सम्पादकप्रवरोऽवद-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

धातीत्यपरा क्षतिः। सिद्धासनैः सिद्धहस्तैः सिद्ध-लेखनीकैः प्रसिद्धैः संस्कृतभाषायाः पत्रकारैर्विषयेऽत्र सावधानैः सयत्नैश्च भाव्यम्। अथ च संस्कृते ये केऽपि च लेखकाः काव्यानि गद्यलेखांश्च लिखितु-मुत्सहन्ते, लिखन्ति च, तत्तत्पत्रपत्रिकासु प्रकाशनाय प्रहिण्वन्ति, तेषां रचनाः सावधानं, सपरिश्रमं, सदयं, सप्रणयं च भूयोभूयः संशोध्य, सक्षिप्य, संवर्ध्य, परिवर्त्य वा तेभ्यो दिग्दर्शनं कुर्वाणैः सम्पादकप्रवरैः प्रकाश्याः। विधिनानेन, पुरस्कारप्रदानेन, पत्रव्यव-हारसम्बन्धेन तैः सह सम्पर्कघनिष्ठतास्थापननेन च समभ्युदीयमानाः प्रतिभावन्तो लेखकाः संस्कृत-साहित्यसेवार्थं नवसाहित्यनिर्माणार्थं च प्रयोज्याः प्रेरणीया नियोज्याश्च।

ततः स्वपत्रपत्रिकाणां कृते केचन समाचारप्रदा-तारश्चापि नियोज्याः, ये हि स्वदेशस्य सर्वप्रान्तेभ्यो विदेशेभ्यश्च समाज - राजनीति - साहित्य - व्यापार-सम्बन्धिनीनां घटनापराणां समाचारान् सचित्रान्वि-चित्रांश्चापि वा संगृह्य संगृह्य, सद्योजातान् नाना-विधान् संवादान् रोचकान् जनजीवने विज्ञाप-नयोग्यान् समाहृत्य, संस्कृतभाषाया सुविलिख्य सम्पादकेभ्यः प्रकाशनाय प्रयच्छेयुर्द्रुततरम्। इत्थं कृते संस्कृतपत्रसम्पादका अनायासं बहून् समाचारानभिन-वान् प्राप्नुयुः। स्वपत्रस्याकारप्रकारपुष्टये लोकप्रियता-पादनाय च प्रचुरामुपयोगिनीं सामग्रीमवाप्य तत्कलेवरं शृङ्गारयितुं प्रभवेयुः। संस्कृतभाषायाः प्रचारस्तु स्वत एव हि भवेदेव।

अधुना संस्कृतपत्राण्येवाङ्गुलिपर्वगण्यानि विरल-विरलान्येव प्रकाशन्ते। तान्यपि चापुष्टाङ्गानि, दुर्बलानि, प्रभावशून्यानि, म्रियमाणान्येवावलोक्यन्ते। तत्रापि च सम्पादकप्रवरा अखिलभारतवर्षीयस्य संस्कृतसेविसमाजस्य प्रतिनिधित्वमुत्तरदायित्वं नेतृत्वं वात्मनि दधानास्तथाविधान् समाचारान् सटिप्पणान् न प्रकाशयन्ति यैः संस्कृतहिताय किमपि क्रान्तिकरं महदभियानं गतिशीलं प्रभविष्णु च जायेत। अतो हिन्दीभाषादीनामन्यान्यपत्राणीव संस्कृतपत्राण्यपि नवनवान् समाकर्षकान् समाचारान् प्रकाश्य तामिमां क्षतिमापूरयेयुः।

अद्यत्वे पत्रकाराणां केचित्सङ्घाः परिषदः सभाः समाजाः सङ्घटनानि च देशे विदेशेषु च सञ्चलन्ति। सर्वासां भाषाणां पत्रकाराश्च तत्र तत्र स्वसङ्घटनस्य प्रातिनिध्यं विदधानाः सदस्यत्वं कुर्वन्ति, स्ववर्गस्य पत्राणां हितं सम्पादयन्ति च। एवंविधानां संस्थानां सदस्यत्वं संस्कृतस्य पत्रकारैः स्वीकर्तव्यमेव। संस्कृत-सेविभिः सर्वैस्तत्र प्राप्तावसरं स्वकीयाः प्रतिनिधयः प्रेष्याः। महतीनां पत्रकारपरिषदां कार्यविवरणानि, संवादा अन्ताराष्ट्रियपत्राणां गतिविधयः, अन्येऽपि चोपयोगिनः समाचाराः संवाददातृभ्यो गृहीत्वा वाऽन्यभाषभ्योऽनुवाद्य च संस्कृतपत्रेषु प्रकाश्या एव। अनेन संस्कृतप्रचारस्तरोन्नतिश्च नूनं भाविनी।

विज्ञापनकलया संस्कृतं प्रचार्यताम्

अथ प्रचारे विज्ञापनविभागस्यापरं माहात्म्यं विद्यते। अद्यत्वे विज्ञापनं नामैका महती कला, विज्ञापनकाराश्च महान्तः कलाकाराः सम्भाव्यन्ते च। संख्या अनन्ताः पद्धतयो रीतयः शैल्यः प्रणाल्यः प्रकाराश्च वर्तन्ते। आंग्लभाषासाहित्ये विज्ञापनकला-सम्बन्धिनो मार्गनिर्देशकाः केचनोत्तमोत्तमा ग्रन्था-श्चापि सन्ति व्यवसायिनां पाठकानां कृते। अहो प्रभावो महान् विजृम्भते विज्ञापनकलायाः! विज्ञापन-कलाप्रवीणा जनाः स्वाभिमतप्रचारे सफलतामासा-दयन्तः परां सिद्धिमाश्रयन्तीत्यत्र न स्यादेव कस्य-चिदपि सचेतसश्चक्षुष्मतो विप्रतिपत्तिर्विसंवादो वा। विज्ञापनबलात् सर्वाणि राष्ट्राणि राजनीतिगतान् स्वाभिप्रायान् प्रचारयन्ति जनेषु। विज्ञापनैरेव संयुक्तराष्ट्रामेरिकादयो देशा वाणिज्यव्यवसायोद्योगानां

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विवृद्धिं कुर्वन्तो धनकुबेरा बभूवुः। अयं विज्ञापनस्यैव महिमा यदप्यश्रमसिद्धमल्पमूल्यमपि वस्तु दशगुणेन मूल्येन विपणौ विक्रीयते। यो हि विज्ञापयितुं सम्यग् जानाति, स समीहितमनायासं साधयति। साहित्य-विज्ञापनं, धर्मसम्प्रदायसिद्धान्तविज्ञापनम्, वाणिज्य-व्यवसायोद्योगविज्ञापनं, पुस्तकानामुपयोगिताविज्ञापनं तथा चौषधीनां, रसानां, फलानां, पत्राणां, पुष्पाणां, सुगन्धद्रव्याणां, यन्त्राणां, चित्राणां, धातूनां, मणि-माणिक्यादीनां रत्नानां, पाषाणादीनां, वस्त्राणा-मन्नानाम्, शस्त्रास्त्रायुधानां, किं बहुना, मानव-जीवनोपयोगिनां नानाविचाराणां, भावानां, पदार्थानां चादानं प्रदानं प्रसारणं च विज्ञापनकलाकौशलाधीन-मेवाद्यत्वे जायमानं प्रत्यक्षमेव दरीदृश्यते! तदस्माभि-रपि संस्कृतप्रचाराभिलाषिभिः विज्ञापनप्रकारै-र्विविधैः संस्कृतप्रचारः प्रकर्तव्यः। एतत्कृते सर्वादौ यावत्सुलभं विज्ञापनसाहित्यमध्येतव्यम्। ततो विज्ञापन-संसारे प्रवेशो विधेयः। विशेषज्ञतां सम्पाद्य विज्ञापन-कलायां प्रावीण्यं च समासाद्य संस्कृतप्रचाराय सम्भवन्तः सदुपायाः समाश्रयणीयाः। अत्र केचित् प्रारम्भिका विज्ञापनोपायाः संस्कृतस्य कृते यथामति प्रस्तूयन्ते—

प्रारंभिका विज्ञापनोपायाः

(१) संस्कृतस्य विज्ञापनद्वारा प्रचारं कर्तुं सर्वादौ हिन्दीभाषायास्ततः प्रादेशिकीनां भाषाणां पर्यन्ते चांग्लभाषाया पत्रकारैः सम्पादकैः प्रकाशकै-र्लेखकैः पुस्तकविक्रेतृभिः कविभिश्चित्रकारैश्च साकं सम्पर्कं साधयित्वा तान् संस्कृतस्य प्रचारे सहयोगं कर्तुममान्त्रयेम समनुरुन्ध्याम च। यदि हिन्दीप्रमुखानां भाषाणां पत्र-पत्रिकासु संस्कृतस्य कृते केचन स्तम्भाः सुनिश्चितरूपाः समुद्घाटयेरन्, तदा संस्कृतप्रचारस्य पन्थाः प्रायोऽर्धाधिकं परिष्कृतो भवेन्नाम नूनम्। हिन्दीभाषा अस्मद्राष्ट्रभाषा, तत्पत्राणां व्याप्तिश्च राष्ट्रं सर्वतोऽव्याहतगतिः, तस्याश्च गद्यविकाशक्रमो-न्नतिः शोभनीया स्पृहणीया चास्ते। अन्यभाषापेक्षया संस्कृतभाषया साकं हिन्द्या मेल एव सुसाध्यो भवति, यतः सा राष्ट्रभाषापि सती स्वसाहित्योन्नतये संस्कृत-वाङ्मयकोषाच्छब्दरत्नानि गृहीत्वैवाग्रे सर्तुं प्रभवति। प्रतिशतमष्टाशीतिः शब्दा हिन्द्यां संस्कृतस्यैव उप-लभ्यन्ते। हिन्द्यां प्रयुज्यमाणानां शब्दानां रूपाणि केवल सुप्-तिङन्तप्रत्यययोगे कृते हि वाक्यसङ्घटन-योग्यानि शुद्धसंस्कृतमयानि जायन्ते। एवमेव उच्च-स्तरीयां तथाकथितां संस्कृतनिष्ठां हिन्दीं जानन्तो जनाः स्वल्पाभ्यासेनैव संस्कृतज्ञाः संस्कृतलेखकाश्च निर्मातुं शक्याः। हिन्दीमनु संस्कृतं विज्ञापनसंसारे प्रयुञ्जाना वयं प्रान्तीयभाषाभिश्च मेलस्थापने सक्षमाः सफलाश्च भविष्यामः।

अथ च हिन्दीभाषापत्रेषु संस्कृतवाक्यैर्विभिन्ना-भिप्रायव्यञ्जकानि नानाक्षररूपाकृतीनि विज्ञापनानि प्रकाश्यानि। विज्ञापनयोग्यानि वाक्यानि तु संस्कृतज्ञैः स्वयमेव नवनवान्याविष्करणीयानि। विज्ञापनकला-ऽसाधारणी वर्तते जगतीति जानन्तो वयमत्र प्रवृत्तिं विदध्याम, प्रयोगांश्च कांश्चिदारभेमहि तदा संस्कृत-प्रचारे कस्याञ्चिद्योग्यायामेव दिशि पदं निधास्याम इति निश्चप्रचम्।

(२) अस्माकमत्र भारतवर्षदेशे, विदेशेषु च केचिदौषधिविक्रेतारो, जीवनोपयोगिनां नानावस्तूनां व्यापारिणो, वाणिज्यकर्मसु कौशलमावहन्तो जना-धनार्जने भूयसीं सफलतामासादयन्ति। एवं विधान् जनान् साग्रहं सानुरोधं च सम्प्रार्थ्य तेषां व्यापारोप-योगिषु वस्तुषु संस्कृतवाक्यैर्विज्ञापनानि चौषधिपथ्य-सेवनोपयोगीनि विधिदिग्दर्शनानि निदर्शनानि (Directions and Instructions) च प्रकाश्यानि। इत्थंविधैर्व्यवसायिभिर्वाणिज्यसंस्थाभिश्च सार्धं पत्र-व्यवहारे कृते तेऽवश्यमनुमतिं प्रदद्युः। प्रकारेणानेन कोटिशो जनानां समक्षं संस्कृतभाषायाः सरलतमानि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुबोध्यानि वाक्यानि समुपस्थितानि भवेयुः, तानि च पठतां संख्यातीतानां मनुष्याणां मनोभावाः संस्कृतं प्रत्याकृष्टाः स्युः। श्रमं विनैव प्रचारश्चापि संसिध्येत्।

विषयेऽत्र रक्ताङ्कसभा (Red cross society) स्वयंसेवक-बालचरसभा (Scout Association) नगरपालिका (City Corporations and Municipal Boards) पुस्तकालयाः, प्रामाणिकाः सङ्घाः, प्रतिष्ठानानि, संस्थाः, सभाः, समाजाः, शिक्षाविभागादयोऽन्यान्यानि सार्वजनीनानि संघटनानि, समितयश्च स्वाभिमतप्रचारसिद्धये प्राथ्याः। सति सम्भवे सर्वकारोऽपि विषयेऽत्र कामपि कृपां विधातुं समर्थनीयः। यदि च सर्वकारः संस्कृतस्य प्रचाराय साहाय्यं कर्तुं प्रसीदेत्तदा मन्त्रिमण्डलान्तर्गतेषु सर्वेष्वपि शासनविभागेषु तत्तत्कार्यालयेषु च कार्यालयानां नामाङ्कणं संस्कृतभाषाक्षरैर्विधेयतामर्हति। विषमिमं स्पष्टीकर्तुमधस्तात् कानिचिदुदाहरणानि वर्णिकारूपेण लिख्यन्ते—

(अ)	संस्कृते	= मन्त्रिमण्डलम्
	हिन्द्याम्	= मन्त्रिमण्डल
	आंग्लभाषायाम्	= Secretariate
(आ)	संस्कृतम्	= प्रवेशो निषिद्ध्यते।
	हिन्दीभाषा	= भीतर मत घुसिये !
	आंग्लभाषा	= No Admission
(इ)	संस्कृतम्	= जिज्ञासा-विभागः
	हिन्दी	= पूछताछ-विभाग
	आंग्लभाषा	= Enquiry Department
(ई)	संस्कृतम्	= वामतो गम्यताम् !
	हिन्दीभाषा	= बायीं ओर चलिये !
	आंग्लभाषा	= Keep Left !

इत्थं सर्वत्र संस्कृतवाक्यानां वर्णमयैः स्थूलाक्षरैः संस्थित्या स्वयमेव हि प्रचारः स्यात्। यानि पुनर्वाक्यानि विज्ञापनोचितानि, वाक्यांशाः, शब्दाश्चाद्यावधि हिन्दीभाषायां प्रयुज्यमाना अपि घुणाक्षरन्यायात् स्वत एव हि संस्कृतव्याकरणसम्मता जनसाधारणैः परिचिताः सन्ति तेषां तु पृथङ् लेखनमात्रेणैव संस्कृतत्वस्य सङ्केतमात्रेणैव प्रचारसिद्धिः। यथा राज्यसभा, लोकसभा, नगरपालिका, गोशाला, पाठशाला, इत्यादिवत्। यत्र च वाक्यांश-शब्दाक्षरस्वरूपस्य हिन्द्यां प्रचलितस्य किञ्चित्परिवर्तनमात्रेण संस्कृतत्वं सिद्ध्यति तत्र तत्स्वाभाविकतामक्षुण्णां परिरक्ष्य निःशङ्कं परिवर्तनं विधाय तद्विज्ञापनयोग्यत्वं च सम्पादनीयम्। यथा—पत्रकारसङ्घः, विद्यालयः, साहित्यसमितिः, भूदानयज्ञः, श्रमदानमित्यादि।

सति सम्भवे, शासनं सम्प्रार्थ्यानुरोध्य च यातायातविभागे (Department of Cammunicatious) पत्रकार्यालये (Poetal Department) च संस्कृतस्य प्रचाराय विज्ञापनाश्रयो याच्यः। बाष्पयानचिटिकासु (Railway Tikes) पत्रचिटिकासु (Postal stamps or tickets) मुद्रामानपत्रेषु (Currency Notes) तोलमानेषु च संस्कृताक्षरैः किमपि मुद्रितमक्षरशब्दवाक्याङ्करूपं विज्ञापनं संस्थाप्य मुद्रणीयम्। अर्थविभागे (Finance Department) चेक (Chegue) इत्यादिषु पत्रेषु संस्कृते किमपि मुद्रितं तिष्ठेत्। यदा प्रादेशिकीष्वन्यान्यभाषासु तत्र मुद्रामानमङ्कैर्वर्णैश्च किमपि मुद्रितं भवति, तदा संस्कृते किमर्थं तन्न भवेत्? संस्कृतस्याभ्युदयाय सर्वकारो यदि चाज्ञां प्रयच्छेत्तदा कस्य बत का वाऽऽपत्तिः? एवमेव मृत्तरयानेषु, वायुशकलेषु, वायुयानेषु तथान्येषु सर्वविधयानेषु सर्वकारस्याज्ञासूचकपत्रेषु (Permits Passss Passports) संस्कृतशब्दैः किमपि लिखितं प्रयुज्येत तदा विज्ञापनं प्रचारश्चानायासं संस्कृतस्य साधीयान् स्यात्।

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मानस-भारती : देवगिरा गुम्फितं मानसम्

--श्री जनार्दन गङ्गाधर रटाटे, एम० ए०, साहित्याचार्यः--

त्रेतायुगे प्रवृत्ते च पूर्वस्मिन् काल एकदा ।
अगस्त्यस्य ऋषेः पार्श्वमाजगाम सदाशिवः ॥
तेन साकं जगन्माता भवान्यपि गताऽभवत् ।
सर्वस्यैवेश्वरं ज्ञात्वा पूजयामास तं मुनिः ॥
मुनिवर्यस्ततो रामकथां विस्तरतोऽब्रवीत् ।
प्रसन्नतामनुभवन् शिवः शुश्राव यां कथाम् ॥
ततो मुनिर्हरेर्भक्तिं पप्रच्छ गिरिशं प्रति ।
लब्धाधिकारिणं तं तां सरहस्यां शिवोऽब्रवीत् ॥
गाथा गुणानां रामस्य वदन् शृण्वन्ननेकधा ।
दिनानि कतिचिद्यावत् तत्रोवास सदाशिवः ॥
ततस्त्रिपुरसंहर्ता मुनिमापृच्छ्य सादरम् ।
स्वधाम प्रस्थितो दक्षकुमार्या साकमीश्वरः ॥
तस्मिन्नेव शुभे काले भारं भञ्जयितुं भुवः ।
अवतारं रघोर्वंशे जग्राह श्रीपतिर्हरिः ॥
पितुर्वाक्यात् परित्यज्य राज्यं तापसवेषधृक् ।
व्यचरद् दण्डकारण्ये विनाशरहितः प्रभुः ॥

ध्यायन् ययौ शम्भुरपि स्वचित्ते
प्राप्यं कथं दर्शनमीश्वरस्य ।
ईशोऽवतीर्णोऽस्ति सुगुप्तमेव
ज्ञास्यन्ति सर्वेऽपि मयि प्रयाते ॥ ४८ ॥ (क)
महान् क्षोभ एषोऽस्ति चित्ते शिवस्य
न तन्मर्म जानाति नूनं सती च ।
तुलस्याह चित्ते भयं शङ्करस्य
परं लोचने दृष्टिलोपेन लुब्धे ॥४८॥ (ख)

अयाचद् रावणो मृत्युं विधिं मानवहस्ततः ।
सत्यं विधातुं वचनं विधेरिच्छति चेश्वरः ॥
न यास्यामि समीपे चेत् पश्चात्तापो भविष्यति ।
इति व्यचारयच्छम्भुः किन्तु युक्तिर्न सङ्गता ॥
रीत्याऽनया महादेवस्तदा चिन्तावशोऽभवत् ।
तस्मिन्नेवोक्त समये दण्डकाद् रावणो गतः ॥
मारीचं पापकरणे स नीचो जगृहे सह ।
तत्क्षणादेव मारीचः सञ्जातः कपटी मृगः ॥
वैदेहीं हृतवान् मूढः कृत्वा कपटमीदृशम् ।
प्रभावो विदितो नासीत् तस्मै वास्तविकः प्रभोः ॥
मृगं हत्वा परावर्तद् बन्धुना सहितो हरिः ।
दृष्ट्वा स्वमाश्रमं रिक्तं तद्दृशोर्जलमागतम् ॥
विरहेण व्याकुलोऽस्ति मनुष्य इव राघवः ।
उभावेव भ्रातरौ तौ सीतामन्विष्यतो वने ॥
कदापि न स्तः संयोग-वियोगौ यस्य केनचित् ।
दृष्टं तस्मिन्नपि स्पष्टं रामे दुःखं वियोगजम् ॥

श्रीरामवृत्तं त्विति चित्रमेव
जानन्ति तत् तत्त्वविदां वरिष्ठाः ।
वशा विमोहस्य च बुद्धिमन्दा-
श्चित्तेऽन्यथैव प्रविधारयन्ति ॥

शम्भुस्तस्मिन्नेव काले वने रामं व्यलोकयत् ।
अतीव मुद्विशेषश्च तस्य चित्ते व्यजायत ॥
स्वनेत्रतृप्तिपर्यन्तं शोभासिन्धुं ददर्श सः ।
किन्तु ज्ञात्वा कुसमयं प्रादात् परिचयं न सः ॥
जय हे सच्चिदानन्द जय त्रैलोक्यपावन ।
इत्युक्त्वा प्राचलद् देवः शम्भुः कामविनाशकः ॥
सतीदेव्या सह शिवः शश्वद् रोमाञ्चितोऽभवत् ।
अपश्यत्तां दशां शम्भोस्तस्मिन्नवसरे सती ।
ततः शङ्काविशेषश्च तस्याश्चित्ते व्यजायत ॥
शङ्करोऽस्ति जगद्वन्द्यो जगदीशश्च सर्वथा ।
सुरा नराश्च मुनयः सर्वे शीर्ष्णा नमन्त्यमुम् ॥
सोऽयं कथं नृपसुतं प्राणमद् विपिनेऽधुना ।
उक्त्वा च सच्चिदानन्द परधामेति सादरम् ॥
तस्य शोभाश्च दृष्ट्वैव प्रेममग्नोऽभवत् त्वियान् ।
यदस्य हृदये प्रीतिरधुनापि न रुध्यते ॥

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वैदिक-कर्माधिकार-मीमांसा

– स्वर्गीयाः श्री हरिशङ्कर ओमकारजी शास्त्रिणः –

तत्र तावत्—वेदाधिकाररहितानां श्रेयसे ब्राह्मणद्वारा कृतं कर्म वैदिकं चेत् प्रत्यवायाय कल्पते, यजमानस्य वेदरहिततया पौराणिकेषु कर्मस्वधिकारादित्येकः पक्षः।

वेदाधिकाररहितानां श्रेयसे ब्राह्मणद्वारा कार्यं कर्म, ब्राह्मणेन स्वशाखोक्तेन विधिना कर्तव्यम्, यजमानप्रतिनिधिरूपत्वाभावात्। यथा यजमानस्य वेदोच्चारणेऽनधिकारस्तथैव पौराणमन्त्रेष्वपीति शास्त्रसम्मतम्। तत्प्रतिनिधितया वृतेन ऋत्विजा तु नमोऽन्तेन नाममन्त्रेण कर्तव्यम्। तस्य तत्रैवाधिकारादिति परः पक्षः।

तदत्र विचारपदमारूढा विषयाश्चेमे—(१) अनुपनीतानां काम्यकर्माधिकारः। (२) अनुपनीतानां मन्त्रोच्चारणाधिकारः। (३) अनुपनीतानां श्रेयसे गुर्वादिना कर्मकरणम्। (४) अनुपनीतानां प्रतिनिधितया ब्राह्मणस्य वैदिककर्मकरणनिषेधः। (५) गुर्वाचार्यादि-निर्वचनम्। (६) अनुपनीतानां कृते क्रियमाणं कर्म गुर्वाचार्यादिद्वारा वैदिकं भवति।

एतादृशेषु विविक्तेषु विचारपदमारूढेषु सर्वथैव शास्त्रं, तद्विचारकाश्च शिष्टा एव प्रमाणम्, अल्पधियामिदमित्थतया धर्मशास्त्रेषु वक्तुमनधिकारात्। मनुष्यबुद्धेः पूर्वग्रहपरवशतया, स्वाग्रहाद्वा, परप्रेरणया वा, शास्त्रविवेचनाशक्तेर्वा, स्वार्थहानि-परोत्कर्षासहत्वाद्यनेकदोषदूषिततया प्रामाण्यानर्हत्वाच्च।

अथेत्थं विचार्यते—नित्य-नैमित्तिक-काम्य प्रायश्चित्तोपासनात्मकेषु कर्मसु, अनुपनीतानामकरणे प्रत्यवायजनकेषु पञ्चयज्ञादिनित्यकर्मसु 'नमस्कारेण मन्त्रेण पञ्चयज्ञान्न हापयेत्' इत्यादिस्मृतिवचननिचयैः स्वतन्त्रतया नमोन्तेन नाममन्त्रेण कर्मकरणाधिकारनिर्णयाम्नात् तादृशैर्वेदाधिकाररहितैः स्वयमेव नमोन्तेन नाममन्त्रेण कर्म कर्तव्यम्। अन्यत्र तु 'तूष्णीमेताः क्रियाः कुर्याद्' इत्यादिप्रमाणजातेन तूष्णींभावमामाद्य पुरोहितप्रेरितेन नमोऽन्तैरेव नाममन्त्रैः (पुरोधसाच्चारितेन पौराणमन्त्रेण वा, श्रवण एवाधिकाराद् उच्चारणानधिकाराच्च) कर्मानुष्ठानमात्रम्, अनुपनीतानां तथैवाधिकारप्रतिपादनात्। प्रायश्चित्तादौ पर्षत्प्रेरणयानुवादक-पुरोहितादिसाहाय्येन। जपहोमादौ ब्राह्मणद्वारा कर्तुः ब्राह्मणस्य कलानुरोधेन। केवलदेवतोपासने स्वयं विशेषः—गुर्वाचार्याद्युपदिष्टेन मार्गेण तदुपदिष्टमन्त्रजपादावेव अधिकारः। काम्येषु पुरोहितादि-गुर्वाचार्यादिद्वारा तत्तच्छाखानुरोधेन वा कर्म कार्यम्, न तु स्वयं कुर्यादिति शास्त्रीया मर्यादा। दृश्यते च तथैव सम्प्रदायविदां शिष्टाचारः।

उपासनकर्मसु तु पुनः स्त्री-शूद्राणां काम्यमन्त्रोच्चारणाधिकाराभावात् शिवलिङ्ग-शालग्रामशिलादिस्पर्शानधिकारात्, प्रतिष्ठादिकर्मानर्हत्वाच्च गुर्वाचार्यादिद्वारैव कर्मकरणस्याम्नानात्, न स्वातन्त्र्येण आधिकारः।

तथा च, दीक्षाशिक्षादिभेदेन गुर्वाचार्यादयो ब्राह्मणा एवाधिकारिणः, न तु शूद्राद्यनुपनीतस्य यजमानस्याधिकारः। एवं चाधिकाराद्दतेऽनुपनीतानां काम्यकर्मकरणासम्भवात् तादृशानां कृते ब्राह्मणैरेव शिष्यश्रेयसे जपहोमाद्यनुष्ठानं विधेयम्। तदुक्तं प्राणतोषिण्यां योगिनीतन्त्र-पूर्वखण्डवाक्यमुपन्यस्य—'प्रेरकः सूचकश्चैव वाचको दर्शकस्तथा। शिक्षको बोधकश्चैव षडेते गुरवः स्मृताः। पञ्चैते कार्यभूताः स्युः कारणं बोधको भवेत्॥' इति। तथा तत्रैव

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पिच्छिलातन्त्रवचनम्—'आदौ दीक्षागुरुः प्रोक्तः शेषे शिक्षागुरुर्मतः। यन्मुखात्तु महामन्त्रः श्रूयतेऽभ्यस्यतेऽपि वा। स गुरुः परमो ज्ञेयस्तदाज्ञासिद्धिदायिनी॥' इत्यादि। तेन उपासनाकाण्डप्रोक्तेषु काम्येषु गुरुरेव शरणम्। तेनैव शिष्यश्रेयसे जपहोमानुष्ठानं स्वकल्पोक्तेन विधिना विधेयम्। ब्राह्मणानामपि उपासनाकाण्डप्रोक्तेषु काम्यकर्मसु गुरुरेव शरणम्। तैरपि तदुपदिष्टेन मार्गेण कर्म विधेयम्, तेषां कर्मस्वधिकारात्। अनुपनीतानां कर्मसु स्वातन्त्र्येणाधिकाराभावात् गुर्वादिद्वारा कर्मकरणम्, गुरोरेव सर्वाधिकारत्वात्। तदुक्तं योगिनीतन्त्रे पूर्वखण्डे—

आदिनाथो महादेवि महाकालो हि यः स्मृतः।
गुरुः स एव देवेशि सर्वमन्त्रेषु नापरः॥
शैवे शाक्ते वैष्णवे च गाणपत्ये तथैन्दवे।
महाशैवे च सौरे च स गुरुर्नात्र संशयः॥
मन्त्रदाता गुरुः साक्षात् शिव एव परात्परः।
मन्त्रप्रदानकाले हि मानुषे गिरिनन्दिनि॥
अधिष्ठानं भवेत्तस्य महाकालस्य शङ्करि।
अतो न गुरुता देवि मानुषे नात्र संशयः॥

इत्यादिना मन्त्रदातुः गुरोः शिवाभिन्नतां प्रतिपाद्य, तस्मिन् अन्यथाबुद्धिकरणे दोषमाह—

गुरौ मनुष्यबुद्धिं तु मन्त्रे चाक्षरबुद्धिताम्।
प्रतिमासु शिलाबुद्धिं कुर्वाणो नरकं व्रजेत्॥

अतो येषां कर्मस्वनधिकारस्तेषां श्रेयसे गुरुणैव कर्म कर्तव्यम्, वक्ष्यमाणस्मृतिवचनैस्तथैव निर्णयात्।

यत्तु—शारदायां 'शूद्राय प्रणवस्थाने चतुर्दशस्वरं संयोज्य मन्त्रमुपदिशेदि'त्यादिशूद्रस्यानधिकारं पुरस्कृत्य तदर्थं कर्मकरणेऽपि स्वकल्पोक्तप्रकारं विहाय पौराणमन्त्रैरेवानुष्ठानमिति वदति कश्चित्। तत्तुच्छम्; शारदोक्तप्रकारस्य भिन्नविषयतया ब्राह्मणद्वारा कर्मकरणविषयेऽनुपयोगित्वात्। शारदोक्तप्रकारस्तु दीक्षाविषयकः। अतोऽत्र स न विचारपदमधिरोहति। शारदायामपि अनुग्राह्य इति पदेन गुरुणाऽनुग्रहपूर्वकं स्वयमेव तदर्थं कर्म कर्तव्यम्। एवं च पुरोदीरितप्रेरक-सूचकादिषु अन्यतमद्वारा यागव्रतादिना शूद्रस्य श्रेय इति शारदातिलक-दीक्षापटलवचननिचयहृदयम्। तथा चोक्तं तत्रैव शारदातिलके—

एकाब्देन भवेद्योग्यो ब्राह्मणोऽब्दद्वयान्नृपः।
वैश्यो वर्षैस्त्रिभिः शूद्रश्चतुर्भिर्वत्सरैर्गुरोः।
स शुश्रूषुः परिग्राह्यो दीक्षायागव्रतादिषु॥

अत्रापि 'परिग्राह्य' इत्यनेन दीक्षा-याग-व्रतादिषु स परिग्राह्यः, तस्य तादृशेषु कर्मसु त्यागो न कर्तव्यः। एतेन ब्राह्मणद्वारा तस्य कर्माधिकार एव प्राप्नोति, न तु शूद्रानधिकारः।

वस्तुतस्तु—गुर्वाचार्य - पुरोहितादिना वैदिको मन्त्रः, पौराणिको वा मन्त्रः, तान्त्रिको वा मन्त्रः स्वयमेवोच्चार्यः। तत्र शूद्रस्य दीक्षितस्य उपस्थितिर्न दोषाय, अन्यत्र तु दोषायैवेति शारदातिलकहृदयवेदिभिः शिष्टैः शूद्रोऽधिकृतो ब्राह्मणद्वारा कर्मकरणाय। ये च पुनः शूद्रेण वृता तत्प्रतिनिधिरूपमृत्विक्त्वं स्वीकृत्य तान्त्रिकं पौराणं वैदिकं वा कर्म कुर्वन्ति न ते शारदातिलकाभिप्रायवेदिन इति। एवं च शारदातिलकं पुरतो निधाय शूद्रस्य ब्राह्मणद्वारा कर्मकरणं निषेधन्ति, ते सद्भिरुपेक्ष्या एव।

यच्च—शूद्रस्य वेदाक्षरश्रवणदोषाम्नानात् 'श्रवणे त्रपुजतुभ्यां श्रोत्रपूरणम्' इति श्रुतेस्तस्य वैदिककर्मकरणाधिकाराभाव इति चेत्। सत्यम्; शूद्रस्य वेदोच्चारणे श्रवणे च दोषश्रवणादेव सर्वा अपि क्रियास्तूष्णीं कर्तव्याः। परं ताश्च क्रिया वैदिकैरेव लिङ्गादिविशिष्टैः विधिवाक्यैः प्रवर्तन्ते, न स्वतन्त्रतया नापि ब्राह्मणादिद्विजानामनुकरणरूपेण कपोलकल्पितेन येन केनापि विधिना।

'तूष्णीं क्रियाः शूद्रस्ये'त्यस्य अयमभिप्रायः—उत्पत्तिविधि-गुणविधि-प्रयोगविध्याद्यनुगृहीता निषे-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कादि-श्मशानान्ताः क्रियाः शूद्रस्य ब्राह्मणादिवदेव कार्याः। ताश्च यथा स शूद्रो मन्त्रं न शृणुयात्तथा तूष्णीम्भावमासाद्य मनसोच्चारितैर्मन्त्रैः पुरोहितगुर्वाचार्यादयः कुर्युः। एतेन शूद्रकर्तृकेषु निषेकादिश्मशानान्तेषु कर्मसु ब्राह्मणद्वारा वैदिकेन विधिना तूष्णीम्भावमवलम्ब्य मन्त्रानुसन्धाने न दोषः। वैदिकं न कुर्यादिति पक्षे तु विधिवाक्याभावादप्रवृत्तिरेव।

अथ चेद् ब्रवीषि—स्मार्तैः पौराणिकैस्तान्त्रिकैर्वा विधिवाक्यैस्तेषां प्रवृत्तिरिति। हन्त, मूढ! न जानासि किं स्मृतीनां पुराणानां तन्त्राणां वा वेदमूलकतया प्रामाण्यम्? स्मृत्युक्तैर्विधिवाक्यैः अनुमितवेदविधयः प्रवर्तन्त इति च। स्मृतिषु, पुराणेषु, तन्त्रेषु च शूद्रस्याध्ययनानधिकार एवेति च। तस्मात् विधयस्तु वैदिका एव। तन्निवर्तनं हि गुर्वाचार्यपुरोहितादिद्वारैवेति समञ्जसम्। यत्र च विशिष्टकार्येषु शूद्रस्यापि वैदिकमन्त्रोच्चारो विधिबोधितस्तत्र रथकारादीनां निषादस्थपतिप्रभृतीनां च तावन्मात्रोच्चारेऽध्ययनेऽपि च न दोषः। स्पष्टमेतत् तन्त्रवार्तिकादौ। यत्र पुनर्महाव्याहृत्यादिहोमादिविधयः, तत्रापि ब्राह्मणद्वारा व्याहृतिहोमः। तेन ब्राह्मणद्वारा क्रियमाणेषु कर्मसु ब्राह्मणैः कृतेषु वैदिकमन्त्रोच्चारेषु न दोषः। यत्र शूद्रकर्तृकं कर्म, तत्र तूष्णीम्भावेन मनसोच्चारणम्, न तु उच्चैरित्येव तात्पर्यम्।

ननु महाव्याहृतिहोमादौ 'अग्निवायुसूर्येभ्यो नमः' 'इदमग्निवायुसूर्येभ्यो न ममे'ति देवतानामाक्षेपेण नमोऽन्तेन होमस्य पौराणकर्मदर्पणादौ दृष्टत्वादिति चेत्? तदपि शास्त्ररहस्याज्ञानविलसितम्। शूद्रस्य होमो ब्राह्मणद्वारैव। ब्राह्मणस्य मन्त्रस्थाने नामाक्षेपस्यावैधतयाऽवैधमेव तदिति शास्त्रदृशां न तिरोहितम्।

ननु 'आकृष्णेने'त्यत्र 'जपाकुसुमसङ्काशमि'त्यादयः पौराणमन्त्रा ऊह्यन्ते तथैव ब्राह्मणद्वारा कर्मकरणेऽपि पौराणमन्त्रा ऊहनीया इति चेत्? धिङ् मूढ! नायमूहः, किन्तु आक्षेप एव। ऊहस्तु द्रव्यदेवतादिविनिमये यथोक्तेष्वेव मन्त्रेषु। 'सूर्याय त्वा जुष्टं निर्वपामी'त्यत्र 'अग्नये त्वा जुष्टं निर्वपामी'त्ययमूहः, न तु 'रवये त्वा जुष्टं निर्वपामी'ति। 'जपाकुसुमे'त्यादिमन्त्राणामुच्चारणं तु 'आकृष्णेने'त्यस्य मन्त्रस्य श्रोत्रसाक्षात्कारे दोषश्रवणात् पौराणमन्त्रस्य च श्रवणाधिकारसत्त्वात् यजमानस्य सन्तोषावहत्वादेवोच्चारो ब्राह्मणद्वारा, न तु साक्षात् शूद्रस्येति हृदयम्।

वस्तुतस्तु—'सूर्याय नमः' इत्यनेन नमस्कारमन्त्रेणैव निर्वाहः। तावता यजमानस्य सन्तोषो न भवतीत्यतो 'जपाकुसुमे'त्यादि पौराणमन्त्राणां यायजूककृता प्रवृत्तिः। महाव्याहृत्यादौ अग्निवायुसूर्यदेवताकत्वेऽपि 'अग्निवायुसूर्येभ्यो नम' इत्यस्य व्याहृतित्वाभावे ब्राह्मणद्वारा भूरादिव्याहृतिहोम एव।

एवञ्च शूद्रकर्तृकेषु विष्णुयागादिषु 'श्रावयेच्चतुरो वर्णान् कृत्वा ब्राह्मणमग्रतः' इत्यादिवाक्यैः शूद्रस्य पुराणवाक्यश्रवण - दोषाभावकथनात्, तूष्णीम्भावेन क्रियामात्रसम्पादनेन यजमानस्य सन्तोषाभावदर्शनाच्च, ऋत्विग्भिः पौराणमन्त्राणामेव उच्चारः कार्य इति शिष्टानुसरणं शास्त्ररहस्यवेदिनां न तिरोहितम्। तदर्थमेव 'शूद्रकमलाकरादि'ग्रन्थावतरणम्।

वस्तुतस्तु—शूद्रस्य गुरुमुखादुपदिष्टदेवतोपासनमन्त्रातिरिक्तमन्त्रोच्चारणनिषेध एव, पुराणानामपि वेदतुल्यत्वात्। मन्त्राणां च तत्तदृषिदृष्टत्वादेव मन्त्रत्वम्। अन्यथा कृतकत्वादफलवत्त्वात्प्रतारणामात्रं पर्यवस्यति। तथा च पौराण-तान्त्रिकमन्त्राणामपि शिवादिदृष्टत्वादुपदिष्टत्वाच्च दीक्षादिना तदुच्चारणाधिकारत्वात् तावन्मात्रोच्चारणं शूद्रस्य रथकाराधिकरणन्यायेनेति शास्त्ररहस्यम्। 'इतिहास. पुराणं च पञ्चमो वेद उच्यते' इत्यादौ निःश्वसित-श्रुतौ च पुराणादेरपि परिग्रहात् तेषां व्यासादिशिवादिदृष्टत्वमेव,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न कृतकत्वमित्यन्यत्र विस्तरः। तथा च वेदवदेव पुराणतन्त्रादेरपि शूद्रस्योच्चारणनिषेधः शास्त्रेषु प्रतिपादितो विष्णुसहस्रनामभाष्यादौ तन्त्रवार्तिके आगमेषु च श्रीमच्छङ्करभगवत्पादादिभिः कुमारिलपादैर्भास्कररायादिभिश्च शास्त्ररहस्यतत्त्ववेदिभिरिति दिक्।

तन्त्रमन्त्रेषु च उपनयनेन द्विजातेर्वेदाधिकारसिद्धिवदेव दीक्षया षडध्वशोधनक्रिययाऽधिकार इत्यादि शारदादौ प्रसिद्धमेव। तत्रापि दीक्षाभेदेन मन्त्रोच्चारणादावपि न्यूनातिरेकेण अधिकारभेद इत्यन्यत्र विस्तरः। मन्त्रदीक्षा, पूर्णदीक्षा, साम्राज्यदीक्षा पारमेष्ठ्यदीक्षेति तादृशविशेषाधिकार-प्रतिपादितदीक्षाभेदेन द्विजातेरपि मन्त्रोच्चारण-तारतम्यम्। शूद्रस्य तत्तद्विशिष्टाधिकाराभावादेव गुर्वाचार्यादिद्वारैव तत्तदनुष्ठानम्। यत्र द्विजातेरपि तन्त्रमन्त्रोच्चारणे तारतम्यं तत्र कुतस्तरां शूद्रस्य मन्त्रोच्चाधिकारचर्चेति तन्त्रमर्मवेदिभिरेव विभावनीयमित्यलं पल्लवितेन।

एतेन गुरूपदिष्टातिरिक्त - पौराण - तान्त्रिकादिमन्त्राणामपि शूद्रादीनामुच्चारणनिषेधस्य सिद्धत्वात्, दीक्षादौ पूर्णदीक्षा-आचार्यदीक्षा पारमेष्ठ्यदीक्षेत्यादिषु अधिकारतारतम्यदर्शनाच्च शूद्रस्य सकलमन्त्रोच्चारणाधिकारनिरूपित - दीक्षाधिकाराभावदर्शनात्, ब्राह्मणस्यैव तादृशपूर्णदीक्षासु अधिकारसिद्धेश्च गुरूपदिष्टमन्त्रातिरिक्तमन्त्रोच्चारणे दीक्षितस्यापि शूद्रस्य नाधिकारात्; विशिष्टदीक्षासंस्कृतस्योपस्थितौ स्वल्पाधिकारिणां पूजाहोमादिविशिष्टकर्मस्वनधिकारदर्शनाच्च तस्य गुर्वाचार्यपुरोहितादिद्वारैव कर्मकरणमिति शैवागमादिरहस्यवेदिमतम्। तथा च तादृशतान्त्रिककर्मादावपि ब्राह्मणद्वारा यथोक्तमन्त्रोच्चारणपूर्वकं कर्मकरणमिति सिद्धम्।

अत एव तादृशशूद्रादेः श्रेयसे काम्यं कर्म पुरोदीरितगुर्वाचार्य-पुरोहित-प्रेरकसूचकवाचकदर्शकशिक्षकबोधकाद्यन्यतमेन ब्राह्मणेनैव तत्सम्पादनीयम्। दृश्यते च तादृशस्य नैरुज्यादिप्रसिद्धये परकृत्यादिपरिहाराय च गुर्वाचार्यादिकृतं, महामृत्युञ्जय-प्रत्यङ्गिरा-चण्डीपाठादिमन्त्रजपाद्यनुष्ठानादिकम्, राजद्वारादौ विजयलाभाय पीताम्बरादिदेवतोपासनात्मकम्, विवाहाद्यर्थं पुत्रलाभाद्यर्थं वा भूतादिबाधापरिहारार्थं च चण्डीस्तवनादकं काम्यं कर्म ब्राह्मणद्वारा शिष्टसम्प्रदायसिद्धम्।

अथायं प्रवर्तते विचारः—यदिदं कर्म किं यजमानप्रतिनिधितया ब्राह्मणेन कर्तव्यं स्वातन्त्र्येण वा? आद्ये, शूद्रप्रतिनिधितया कर्मकरणे दोषश्रवणात्। अन्त्ये, कर्तुर्ब्राह्मणस्य तादृशकामनाविरहत्वात्, अन्येन कृतस्य कर्मणोऽपूर्वस्य अन्येन सम्बन्धाभावात्, दक्षिणाग्रहणादृत्विक्तया शूद्रप्रतिनिधित्वरूपदोषोपस्थितेश्च। तन्न; न हि यजमानप्रतिनिधितया गुर्वाचार्यपुरोहितादीनां प्रवृत्तिः। प्रत्युत गुरुत्वाचार्यत्व-पुरोहितत्वादेरेव तेषां प्रवृत्तिः। गुर्वाचार्यादिशब्दप्रवृत्तिनिमित्तकस्यैव तत्र प्रयोजकतया प्रतिनिधित्वरूपर्त्विग्भिन्नतयैव तद्ग्रहणात्। अत ऋत्विजां प्रतिनिधितया कर्मनिर्वाहमात्रम्, गुर्वाचार्यादीनामुपदेशकतया गुरुत्वादिनिरुक्त्या च स्वतन्त्रतयाऽधिकारित्वम्। ऋत्विजश्च पुनर्यजमानेन दक्षिणाभिः क्रीता यजमानप्रतिनिधिरूपा एव।

अत्रेदं तत्त्वम् - यथा अध्वर्य्वादय ऋत्विजोऽध्वरेषु नियोज्यन्ते, न तथा दीक्षा-शिक्षा-प्रतिष्ठादिषु गुर्वाचार्यादयो यजमानप्रातिनिध्येन ऋत्विक्तया नियुज्यन्ते। किन्तु तत्तच्छब्दनिरुक्त्या स्वातन्त्र्येणेति तन्त्रपुराणादौ द्रष्टव्यम्। विस्तरस्य प्रकृतानुपयोगान्नेह तन्यते। दक्षिणाभिः क्रीता ऋत्विजो यजमानप्रतिनिधिरूपा एवेति कातीये कर्क-देवयाज्ञिकभाष्यादौ जैमिनीये च स्पष्टम्। तत्ततोऽवगन्तव्यम्। अतो यत्र यागादौ, अनुपनीतयजमानप्रतिनिधितया वृता ऋत्विजस्तत्र

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तु तैरपि यजमानाधिकारानुरोधेन नमोऽन्तेनैव नाममन्त्रेण जपहोमादिकं सम्पाद्यम्। अन्यथा दोषश्रवणात्। तदुक्तम्—"स्वाहा प्रणवसंयुक्तं शूद्रे मन्त्रं ददद् द्विजः। शूद्रो ब्राह्मणतामेति ब्राह्मणः शूद्रतामियात्" इति। शूद्रे इति तादर्थ्ये सप्तमी, 'चर्मणि द्वीपिनं हन्ती'त्यादिवत्। अत एव कमलाकरादिभिर्निबन्धकारैः शूद्रप्रतिनिधितया वैदिकं कर्म कुर्वतां ब्राह्मणानां दोष इत्युक्तम्। तथा च शूद्रकमलाकरे निर्णयसिन्धौ च 'दक्षिणार्थं तु यो विप्रः शूद्रस्य जुहुयाद्धविः। ब्राह्मणस्तु भवेच्छूद्रः शूद्रस्तु ब्राह्मणो भवेदि'ति पराशरवचनमुपन्यस्तम्। अत्र माधवाचार्योऽपि 'यो विप्रः शूद्रदक्षिणामादाय तदीयं हविः शान्तितुष्ट्यादिसिद्धये वैदिकैर्मन्त्रैर्जुहोति तस्य विप्रस्यैव दोषः, शूद्रस्तु होमफलं लभेतैवे'ति व्याचचक्षे। एवं च शूद्रस्यार्त्विज्यं स्वीकृत्य वैदिकं कुर्वाणस्य विप्रस्य दोषः। न तु गुर्वादिद्वारा कृतस्य वैदिकस्येति चतुरस्रम्।

गुर्वाचार्यादिद्वारा त्वयं विशेषः—पुरोदीरिता गुर्वाचार्यादयो न यजमानप्रतिनिधिरूपा ऋत्विजः। प्रत्युत उपदेष्टारो बोधकाः सूचकाः प्रेरकाश्च अनुग्रहेण परकृत्याद्विप्रशमन-ज्वरादिशान्ति-भूतोद्रवाद्युपशमनरूपोपासनाकाण्ड-प्रतिपादितेषु काम्यकर्मसु तादृशस्य शूद्रादेर्दीक्षितस्यापि अधिकाराभावाद् दैवदुर्विपाकदग्धस्य शिष्यस्योद्दिधीर्षया शिष्यश्रेयसे यथोक्तं स्वस्वकल्पोक्तं वैदिकं तान्त्रिकं मिश्रं वा स्वस्वातन्त्र्येण कर्म कुर्वाणा न दूष्यन्ति, अधिकारभेदात्। अत इदं कर्म न यजमानाधिकारप्रयुक्तम्; प्रत्युत स्वाधिकारप्रयुक्तमेवेति। अत एव द्रव्योत्सर्गपुरःसरं गुर्वाचार्यप्रभृतिभिः स्वशाखानुसारेण स्व-स्वतन्त्रानुसारेण वा स्वाधिकारेणैव तत् सम्पादनीयम्। तत्र शिष्याधिकारस्य अनपेक्षितत्वात् स्वाधिकारविचारस्यैव अपेक्षितत्वाच्चेति दिक्।

१४ नवम्बर : बालदिवसोपलक्ष्ये

भारतीय-बालोद्घोषः!

वयं भारतीया वयं भारतीयाः!
दयां सर्वभूतेषु कुर्मो वयं हि
सदाऽस्माकमस्तीह धर्मोऽन्वयं हि।
तथा कौलिकी सत्यनिष्ठाऽस्मदीया
वयं भारतीया वयं भारतीयाः॥ १॥

बलान्नैव कस्यापि भूमिं हरामो
न लोभाद्धि कस्यापि भूमौ चरामः।
शुभा स्नेहदृष्टिर्जनेषु स्वकीया
वयं भारतीया वयं भारतीयाः॥ २॥

सुमैत्रीं विधायापि विश्वासघातं
प्रकुर्मो न कोपान्मुधा रक्तपातम्।
जना ये प्रकुर्वन्ति ते नारकीया
वयं भारतीया वयं भारतीयाः॥ ३॥

सदा भारतस्य व्रतं नन्वहिंसा
विदेशेष्वपि प्रायशोऽस्य प्रशंसा।
मुदाऽस्माभिरेषा दृढं धारणीया
वयं भारतीया वयं भारतीयाः॥ ४॥

—श्री 'भुवनेशः'

यच्च—महामारी-शान्तिप्रभृतिषु सर्वसाधारणं कर्म सम्पाद्यते, तदपि तत्तद्ग्रामाधिकारिजनप्रेरणया तत्तद्ग्रामस्थशिष्टजनप्रेरणया वा सर्वजनश्रेयसे ग्रामपुरोधसा गुर्वाचार्यादिविशिष्टाधिकारप्राप्तेन वा ब्राह्मणेन स्वकल्पोक्तेनैव विधिना वैदिकं कर्तव्यम्। एतादृशेषु कर्मसु यजमानप्रतिनिधित्वस्यानवकाश एवेति विभावनीयं शास्त्रैकदृग्भिरिति सर्वं सुस्थम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri
112604

यद्धि परिव्राजकजनसम्पादितद्रव्येण तत्प्रेरणया ब्राह्मणद्वारा शतमुखादयो यज्ञा भवन्ति, तत्र तत्तज्जनाधिकारश्चिन्त्य इत्यलमप्रकृतप्रसङ्गेनेति।

यत्तु आह—कश्चन वावदूक प्रतिष्ठायामेव द्रव्योत्सर्गविधानात्तत्र ब्राह्मणद्वारा कृते वैदिककर्मणि न दोषः, अन्यत्र तु द्रव्योत्सर्गस्य विधानाभावाद् दोष एवेति। तदज्ञानविलसितम्; द्रव्योत्सर्गो नाम स्वाधिकाराभावे अधिकारिणे तादृशकर्मकरणाय द्रव्यत्यागः। तद्यथा प्रतिष्ठायां तथा अन्यत्राप्यतिदेष्टव्यम्। स्पष्टं चैतज्जैमिनीये निर्द्रव्याधिकरणे।

यत्र पुनर्वैदिककर्मण एव महाव्याहृत्यादौ नियमः, तत्रापि आचार्य-पुरोहितादिब्राह्मणद्वारा तत्सम्पादनीयम्। स्पष्टं चैतत् निर्णयसिन्ध्वादौ दत्तकप्रकरणे तृतीयपरिच्छेदे स्त्रीशूद्रादिकमधिकारिणं प्रकृत्य—'अत एव शूद्रकर्तृकहोमो विप्रद्वारैव पराशरेणोक्त' इति 'स्त्रियाश्च होमासम्भवः, तथापि व्रतादिवद्विप्रद्वारा होमादि कारयेदिति हरिनाथादयः। सम्बन्धतत्त्वेप्येवम्। एवं शूद्रस्यापि। 'स्त्रीशूद्राश्च सधर्माणः' इति स्मृतेरिति च विप्रद्वारा होमकरणमुक्तम्। एवमेव महाव्याहृतिहोमं प्रत्यत्य प्रथमपरिच्छेदेऽपि 'शूद्रस्य प्रतिष्ठादिवद् विप्रद्वारा व्याहृतिहोमः इति वर्धमान' इत्याह कमलाकरभट्टः।

एवं च अतिदिष्टेन विधिना गुर्वाचार्यपुरोहितादिना यजमानस्य श्रेयसे स्वयं स्वशाखोक्तं वैदिकं कर्म कर्तव्यम्। तदर्थं च द्रव्योत्सर्गे च न दोषः। द्रव्योत्सर्गे नियमविधेरदृष्टत्वात्। उद्दिष्टकर्मसम्पादनाय स्वसत्तानिवृत्तिरूप-द्रव्यत्यागस्यैव उत्सर्गपदेन ग्रहणाच्च।

यच्चोत्प्रेक्षितम्—अन्येन कृतं कर्म अन्यस्य श्रेयसे न भवतीति चेत्? सत्यम्; तत्रायं विवेकः'—गुर्वादिना यदुद्देशेन कर्म सङ्कल्प्यते तस्यैव फलप्राप्तेः। अन्यथा शान्त्यादौ वश्यादौ आभिचारके च व्यभिचारापत्तेः। एवं च विप्रद्वारा कर्मसम्पादनमन्यत्, ऋत्विजा विप्रेण कर्मकरणं चान्यत्। आद्ये, गुरुशिष्यादिसम्बन्धः; द्वितीये प्रातिनिध्यम्। प्रातिनिध्येन वैदिककर्मकरणे यजमानाधिकारातिक्रमे च दोषः। शिष्यश्रेयसे गुर्वादिना देवताराधनं पुण्यम्।

एवमेव ब्राह्मणादिद्वारा महामृत्युञ्जयादि-चण्ड्यादि-रुद्रादि-जपहोमाद्यनुष्ठानेऽप्यूहनीयम्। अन्यथा ब्राह्मणद्वारा देवप्रतिष्ठादौ महामारीशान्त्यादौ च दोष एव स्यात्, न तु तथा। एवं पौराणमन्त्रेष्वपि शूद्रस्यानधिकाराद् दोषतादवस्थ्यम्। तेन शूद्रस्य प्रतिनिधितया ब्राह्मणेन वैदिकं कर्म न कर्तव्यम्। ब्राह्मणद्वारा वैदिककर्मकरणे तु न कोऽपि दोष इति मतम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीमताम्, निरवद्य-विद्या-विद्योतमानमानसानाम्, निरन्तरदेशसेवाव्रतविहितजनक्लेशहरणानाम्,
विविधसुकृतसमुत्तुङ्गतमयशोराशिप्रकाशितदिङ्मुखानाम्, गीर्वाणवाणीगौरवसमुन्नयन-
बद्धपरिकराणाम्, वाराणसेय-संस्कृत-विश्वविद्यालय-कुलाधिपतीनाम्,
उत्तर प्रदेशराज्यपाल महामहिम

डॉ० श्री चेन्नारेड्डी महानुभावानाम्

कर-पल्लवयोः

शुभाभिनन्दन-प्रसूनोपहारः

यद्वीणारणिते - विनोदकलितैरष्टादशाऽपि स्फुटं
विद्याः सञ्जनिता महर्षिनिवहव्याख्यापरिख्यापिताः ।
अन्तर्ध्वान्तनिवारणं विदधते ज्योतिर्मयैर्वाङ्मयैः
सा श्रीसंस्कृतभारती वितरतु श्रेयांसि भूयांसि वः ॥ १ ॥

अन्तर्वाह्यचिकित्सते पटुतरप्रज्ञानुभावः स्फुर-
द्दीर्घोद्योग - समेधमानमहिमा संसत्समुन्नायकः ।
चेन्नारेड्डि - शिरोमणिः कृतपदो नव्ये प्रदेशेऽधुना
विद्वद्गीतगुणो मनोज्ञवचनैः सुस्वागतं विन्दतु ॥ २ ॥

विश्वेशस्य जगद्गुरोरिह पुरे श्रीविश्वविद्यालयः
सोऽयं संस्कृत-भारती - समुदया - बद्धावधान - श्चिरात् ।
सम्प्राप्तं स्वकुलाधिपं बुधमणिं सम्मानयन् मोदते
हर्षोत्कर्ष - विकस्वर - स्वर - शुभोद्गारोपहारार्पणैः ॥ ३ ॥

सम्मान्य ! त्रिकलिङ्गमण्डलशिरोऽलङ्कार ! सारस्वत-
स्रोतःसन्ततिवारिवाह ! जनतास्नेहैकदुग्धाम्बुधे ! ।
भावत्कैरयमुन्नतिं परतरां प्रान्तो नितान्तोल्लसद्-
विद्यावैभवसद्यशोविलसितैः सद्यः समारोहतु ॥ ४ ॥

विद्याराधनसावधानहृदयैश्छात्रैर्वृताः सर्वतो
विद्वांसः सह कर्मचारिभिरिमे प्रीता भवत्सङ्गमात् ।
उन्मीलद् - भवभाव - सौरभमयं श्रीमत्कराम्भोरुहे
वाचामेव विवेदयन्ति विकसत् - पद्यप्रसूनाञ्जलिम् ॥ ५ ॥

निवेदकाः—

वाराणसेयसंस्कृतविश्वविद्यालयीया
अध्यापका विद्यार्थिनः कर्मचारिगणश्च

दिनांकः
२१-११-७४

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूर्योदयस्य नियमाः

पत्र-संहिता

१. 'सूर्योदय'-मासिकपत्रस्य वार्षिकं शुल्कं रूप्यकपञ्चकं वर्तते। धनादेश (मनीआर्डर) द्वारा तत्प्रेषणीयम्। वी० पी० द्वारा प्रेषणे ५० पणाः पृथक् प्रदेयाः स्युः।

२. आवर्षं गम्भीरसाहित्यसमन्विताः १२ अङ्काः प्रकाश्यन्ते। नवीनग्राहकत्वं प्रथमाङ्कतः (जनवरी-अङ्कतः) एव स्वीक्रियते। माध्यमिकेन केनापि अङ्केन ग्राहकत्वं न स्वीक्रियेत।

३. आंग्लमासस्य २६ दिनाङ्के 'सूर्योदयः' प्रकाशितो भवति। वारद्वयं संशोध्य ग्राहकेभ्यः सः प्रेष्यते। अतस्तदलाभे पूर्वं स्वकीय-पत्रालयतस्तदनागमनस्य निर्णयं कृत्वैव १० दिनाङ्कानन्तरं वयं सूचनीयाः।

४. लेख-कवितादीनां भाषा संयता, सरला, शुद्धा च भाव्या। प्रकाशनीय-लेखादीनां स्पष्टाक्षरैः कर्गजस्यैकपृष्ठे एव लेखनमावश्यकम्। अस्वीकृता लेखादयः पोस्टविभागीय-चिटिका (टिकट) प्राप्त्यनन्तरं परावर्तयितुं शक्यन्ते।

५. सम्पादकीय-विषयसम्बद्धे पत्र-व्यवहारे 'सम्पादकः' इति, व्यवस्थाविभागीय-पत्रव्यवहारे च 'व्यवस्थापकः' इति च स्पष्टं लेखनीयम्। तेन उत्तरलाभे मुधा विलम्बो न भवेत्।

विज्ञापन-शुल्कम्

सूर्योदये सुरुचिपूर्णं विज्ञापनं प्रकाश्यते। एकवारं तस्य प्रकाशनस्य शुल्कक्रमश्च अधोलिखितोऽस्ति सार्वकालिकस्य दीर्घकालिकस्य च विज्ञापनस्य कृते विशेष-सौविध्याय पत्र-व्यवहारः कार्यः।

साधारणस्य प्रतिपृष्ठस्य	१००) रु०	साधारणस्य प्रत्यर्धपृष्ठस्य	६०) रु०
साधारणस्य चतुर्थांशपृष्ठस्य	३५) रु०	आवरण-चतुर्थपृष्ठस्य	२००) रु०
आवरण-द्वितीय-तृतीयपृष्ठयोः	१५०) रु०	प्रथमावरणपृष्ठे विज्ञापनं न स्वीक्रियेत।	

—सङ्केतः—

'सूर्योदय'-कार्यालयः, भारतधर्म-महामण्डलम्, जगतगंज, वाराणसी।

सम्पादकः, प्रकाशकः, मुद्रकश्च—गोविन्द नरहरि वैजापुरकरः,
श्रीभारतधर्ममहामण्डलम्, जगतगंज, वाराणसी कैण्ट।
मुद्रण-स्थलम्—आनन्दकानन प्रेस, सी-के० ३६/२०, वाराणसी।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri